लोगेऽवि गाहा। व्याख्या– **लोकेऽपि अशुचिगन्धिनः,** केचिदवयवा इति गम्यते, **विपरिणताः** पर्यायान्तरेण **दूरतो** = दूरादागता **न दुष्यन्ति,** तथोपलब्धेः। उपपत्तिमप्याह– **न च मारयन्ति परिणताः** सन्तः **दूरगता एव विषावयवा** इति गाथार्थः॥२८८॥

(टि०) १. ०ज्झास० खं०॥ **२. हु** जे१ को०॥ **३. ०ध्याऽसाध्यात् द्वयं कार्य्यं** जि०। **०ध्याऽसाध्यकार्य्यं** जि१॥ **४. ति** खं० विना॥ **५. भवतु** ला० जि०॥ **६. सिद्धि** जे१ को०॥

(वि०टि०) ◆. प्रस्फोटनं कृत्वा = आधाकर्म्मावयवापसारणाय अङ्गुल्यादिभिः प्रोच्छनं कृत्वा इत्यर्थः॥

इत्थमनन्तरोक्तं सूक्ष्मपूति उद्गमपूति न भवतीति अभिधाय शेषद्रव्यैरशनादिभिस्तद् यथा भवति तथाऽभिधित्सुराह–

सेसेहि तु दव्वेहिं जावतियं फुसइ तत्तियं पूई।
लेवेहिं तिहिं[१] पूतिं कप्पइ कप्पे कए तिगुणे॥ २८९॥

सेसेहि तु गाहा। व्याख्या– **शेषैस्तु द्रव्यैः** "**डाए लोण**" इत्याद्युपलक्षितैरशनादिभिः करणभूतैर्**यावत् स्पृशति,** कश्चित् कर्त्तेति गम्यते, '**तत्तियं पूति**' त्ति तावन्मात्रं सर्व्वं तद्भाजनस्थं पूति भवति। पाठान्तरं वा '**जावइयं पुट्ठमेत्तियं पूतिं**'।

तत्पुनर्**लेपैस्त्रिभिः** करणभूतैः **पूत्येव,** किमुक्तं भवति ? जम्मि आहाकम्मियं[२] पिढरे रद्धं तम्मि अकतकप्पे अप्पणो रद्धं तं पूतिं, पुणो पूतिं, पुणो पूतिं, ण परतो; अह पुण[३] आहा(?आय)भावेण दव्वंतरपक्खिवणत्थं णिरवयवकप्पिते तो ण होज्जा वि[४]। तथा '**कल्पते कल्पे कृते त्रिगुण**' इति को भावार्थः ? जम्मि भायणे भत्तपाणपूतियं गहियं तत्थ अण्णं घेत्तुं कप्पति तीसु कप्पेसु कतेसु त्ति[५] गाथार्थः॥२८९॥ एतदेव व्याचष्टे–

इंधणमादी मोत्तुं चउरो सेसाणि होंति दव्वाणि।
तेसिं पुण परिमाणं तयप्पमाणादि आरब्भ॥२९०॥

इंधणमादी गाहा। व्याख्या– **इन्धनादीनि** = इन्धन-धूम-गन्धादीनि **मुक्त्वा** = परित्यज्य **चत्वारि**◆ **शेषाणि**✱ **भवन्ति द्रव्याणि** '**डाए लोण**' इत्याद्युपलक्षितान्यशनादीनि। **तेषां पुनश्चतुर्णां** द्रव्याणां **परिमाणं** शेषपूतिकर्तृत्वे इदं यदुत **त्वक्प्रमाणादेराभ्य** तयप्पमाणेणं सित्थप्पमाणेणमित्यादि एतावताऽपि स्पृष्टं तदन्यत् पूति भवतीति गाथार्थः॥ २९०॥

आधाकर्म्मपाक एव ग्रहणविधिमाह–

पढमदिवसम्मि कम्मं तिण्णि य दिवसाणि पूइयं होइ।
पूईसु तिसु ण कप्पइ कप्पति ततिओ जया कप्पो॥२९१॥

पढम० गाहा। व्याख्या– ▽**प्रथमदिवसे कर्म्म** आधाकर्म्मपाके गृहमेव, **त्रयश्च दिवसाः पूतिर्भवति**। तदेव गृहं **पूतिषु त्रिषु न कल्पते** तत्र किञ्चित् ग्रहीतुम्।

(टि०) १. ०हि उ पू० जे४ भां०॥ **२. पिहडे** जि० जि१॥ **३. अहभा०** जि० जि१॥ **४. हि** जि०॥ **५. भावार्थः** जि१॥
(वि०टि०) ◆. पू.मलयगिरिसूरिमते 'चत्वारि'शब्दः इन्धन-धूम-गन्ध-बाष्पपरः, **पू.हरिभद्र**सूरिमते तु चत्वारिशब्दो अशन-पान-खादिम-स्वादिमपरोऽस्माकमाभाति। **मलय०**वृत्तौ त्वित्थं अभिहितम्– "इन्धनावयवादीनि चत्वारि पूर्वोक्तानि मुक्त्वा शेषाणि द्रव्याणि अशनादीनि पूतिकरणप्रवणानि ज्ञातव्यानि॥" ✱. शेषाणि डाए-लोण इत्याद्युपलक्षितानि चत्वारि अशनादीनि द्रव्याणि पूतिविषयाणि भवन्ति इति वाक्ययोजना कर्त्तव्या॥ ▽. प्रथमदिवसे आधाकर्म्मणः पाकः कृतः तस्मिन् दिवसे आधाकर्म्म व्यक्तम्। ततः त्रयो वासराः पूतिदोषवत् तत्पाकगृहं भवति। तदेव गृहम् = गृहगताऽशनादिकं त्रिषु पूतिषु = पूतिदोषवद्दिनेषु न कल्पते ग्रहीतुमित्याशयः॥

भण्डकविधिमाह– **कल्पते**, स्वभण्डकं परभण्डकं चेति गम्यते, **तृतीयो यदा कल्पः** कृतो भवति। [१]ननु एतदविशोधिकोटि कथमस्य कल्पत्रयाच्छुद्धिरिति ? उच्यते– निश्च्छोटनकरीषोद्वर्त्तनाद् ऊर्द्धमेतदिति। अन्ये त्वभिदधति प्रथमकल्पव्यतिरेकेण अन्ये त्रयो गृह्यन्त इति गाथार्थः॥२९१॥

आधाकर्म्मण्युक्तेऽपि तदन्यविशेषप्रतिपादनाय तदभिधानपुरस्सरमुपसंहरन्नाह–

समणकडाऽऽहाकम्मं समणाणं जं कडेण मीसं तु।
आहार उवहि वसही सव्वं तं पूइयं होइ॥२९२॥

समण० गाहा। व्याख्या– **श्रमणार्थं कृतमाधाकर्म्मोच्यते**। इह च **श्रमणा** निर्ग्रन्था एव न शाक्यादयोऽपि। **श्रमणार्थं यत्** [२]**कृतं** तेन **मिश्रं तु** सर्व्वं तत् पूति इति योगः। तत्पुनराहारः = अशनादिः, **उपधिः** = रजोहरणादिः, **वसतिः** प्रसिद्धा, **सर्व्वमेतत्पूति भवति** न आहार[३] एवेति गाथार्थः॥२९२॥

एतत्परिज्ञानोपायमाह–

सङ्घस्स थोवदिवसेसु संखडी आसि संघभत्तं वा।
पुच्छित्तु निउणपुच्छं संलावाओ वऽगारीणं॥ २९३॥ दारं॥

सङ्घस्स गाहा। व्याख्या– **श्रावकस्य स्तोकदिवसेष्वतिक्रान्तेषु सङ्खडी[४]रासीत् सङ्घभक्तं वा** उपलक्षणत्वादन्यद् वा किञ्चित् ग्लानसम्पातादि। अथैवं व्यतिकरे सति **◆प्रष्टुं निपुणप्रश्नेन** विजानाति 'पूत्येतद्'ति [५]**संलापाद् वा अगारीणाम्**। ता हि [६]मुग्धतया भक्त्यतिशयख्यापनार्थं अपृष्टाऽपि कदाचित् कथयन्त्येवेति गाथार्थः॥२९३॥

व्याख्यातं **पूतिद्वारम्**। अधुना **मिश्रजातद्वारं** व्याचिख्यासुराह–

मीसज्जायं जावंतियं च पासंडसाहूमीसं च।
सहसंतरं न कप्पइ कप्पइ कप्पे कए तिगुणे॥२९४॥

मीसजातं गाहा। व्याख्या– मिश्रं जातं = उत्पन्नम्, कृतमिति **मिश्रजातम्**, स्वगृहमानुषाणां भिक्षाचरादिभिः सह अशनादीति गम्यते। एतच्च त्रिविधमित्याह– **यावदर्थं च पाखण्डि-साधुमिश्रं च**, मिश्रशब्दः प्रत्येकमभिसम्बध्यते, यावदर्थमिश्रम्, पाखण्डिमिश्रं साधुमिश्रं च। ओघोद्देशाच्च भिन्नमिदम्, तत्र ह्यात्मार्थमेवाऽऽरम्भे कृते तन्दुलादिप्रक्षेपः, इह त्वारम्भे एव मिश्र इति। इदं तु **सहस्रान्तर**गतमपि **न कल्पते**, वक्ष्यमाणविषोदाहरणादिति।

भाजनविधिमाह– **'कल्पते कल्पे कृते त्रिगुणे'** इति त्रिषु [७]कल्पेषु कृतेषु कल्पते भाजनमिति गाथासमासार्थः॥२९४॥ अवयवार्थस्तु भाष्यादवसेयः। तत्राऽस्य सम्भवमेवाभिधित्सुराह–

(टि०) १. **आह नन्वेत०** जि०॥ २. **क्रियते** ला० जि१॥ ३. **०हारमेवे०** जि० ला०॥ ४. **०खडेरा०** जि०॥ ५. **सम्भाषाद्** जि० जि१॥ ६. **मुखरतया** जि०॥ ७. **कल्पेषु कल्पते भा०** ला०। **कल्पेषु कृतेषु भा०** जि० जि१। अस्माभिः सन्दर्भानुसारेण सम्यक्पाठो योजितः॥

(वि०टि०) ◆. **प्रष्टुम्** = प्रश्नयित्वा इत्यर्थः।

दुग्घासे तं समइच्छिया व अद्धाणसीसए जत्ता।
[१]सड्ढी बहुभिक्खयरे मीसज्जायं करे कोइ॥२९५॥

दुग्घासे गाहा। व्याख्या– दुःखेन ग्रासोऽस्मिन्निति **दुर्ग्रासं** = दुर्भिक्षं तस्मिन् दुःखितसत्त्वालम्बनेन, **तद्दुर्ग्रासं समतिक्रान्तो** वेति ततो व्यपेतो दुःखदर्शनेन, **अध्वानशिरसि** = कान्तारादिनिर्गमप्रवेशमार्गे खिन्नभिक्षाचराऽऽलम्बनेन, **'जत्त'**त्ति प्राकृतशैल्या यात्रायां गिरिनगरादौ तीर्थबहुमानेन **श्राद्धः** कश्चित्सत्त्वः **'बहुभिक्षाचर'** इति बहुषु भिक्षाचरेषु सत्सु **मिश्रजातं** उक्तशब्दार्थं **करोतीति** एवमस्य सम्भव इति गाथार्थः॥२९५॥ साम्प्रतमाद्यं मिश्रजातं तत्परिज्ञानोपायं चाभिधित्सुराह–

जावंतट्ठासिद्धं ण एंति तं देह कामियं जइणं।
बहुसु [२]उ अपहुप्पंते भणाइ अण्णं पि रंधेहि॥२९६॥

जावंत० गाधा। व्याख्या– **'यावदर्थसिद्धमि'**ति यावन्तः केचनागमिष्यन्ति तदर्थे सिद्धमिति यावदर्थमिश्रजातमिदमिति स्वरूपम्।

परिज्ञानविधिस्तु अगारो भणति– **"यावदर्थसिद्धम्, न चागच्छन्ति** ते यावन्तः केचनः, **तद् ददध्वं** दानद्रव्यं **कामिकं** = इच्छया पर्याप्तं **यतिभ्यः** = साधुभ्यः" इति। तथा **बहुषु** वा भिक्षाचरेष्व-**प्रभवति** सति सिद्धे **भणत्यगारः**– **"अन्यदपि राध्नुहि** येन पर्याप्तं भवति" इति गाथार्थः॥२९६॥

द्वितीय-तृतीयभेदावाह–

अत्तट्ठा रंधंतो पासंडीणं पि बितियओ छुभइ।
निग्गंथट्ठा तइओ अत्तट्ठाए [३]वि साधेइ॥२९७॥

अत्तट्ठा गाहा। व्याख्या– **आत्मार्थं राध्यन्** किमप्योदनादि तदन्यभिक्षाचरव्युदासेन **पाखण्डि-नामपि** निमित्ते उक्तप्रथमाऽपेक्षया **द्वितीयो** मिश्रजातकर्त्ता **क्षिपत्यादित** एवाऽरभ्य उदक-तन्दुलादीन्; **निर्ग्रन्थार्थं तृतीयः**, पाखण्डिनामपि व्युदासेन **आत्मार्थमपि साधयति** निर्ग्रन्थार्थमपीति मिश्रजातम्। परिज्ञानोपायः पूर्ववदिति गाथार्थः॥२९७॥ एतच्च सहस्रान्तरगतमपि न कल्पते इति सदृष्टान्तमिदमाह–

विसघातियपिसियासी मरइ तमण्णो वि खाइउं मरइ।
इय पारंपरमरणे अणुमरइ सहस्ससो जाव॥२९८॥

विसघादि० गाहा। व्याख्या– विषेण घातितो = विषघातितस्तस्य पिशितं = मांसं तदस्नातुं (?तदशितुं) शीलमस्येति = **विषघातितपिशितासी(?शी)**, असौ **म्रियते**। **[*]तमन्योऽपि** तथाविधः कश्चिद् भक्षितुमुपयुज्य [४]म्रियते एव, तस्याऽपि विषदिग्धत्वात्। **'इय'** एवं **'परम्परामरणे'** **"सुपां सुपो**

(टि०) १. सड्ढी को० विना॥ **२. य** जे१ को०॥ **३. चिरं बेंति** जे१ को०। **वि रंधंतो** जे४ भां०॥ **४. ०मुभुज्य** जि० जि१॥
(वि०टि०) ❖. यद्वा तद्दुर्भिक्षं समतिक्रान्तः = प्राप्तपर्यन्तः कश्चित् पुरुषः स्वयं बुभुक्षाकष्टानुभवनेन भिक्षाचरान् प्राप्य मिश्रजातं करोतीति आशयः॥ *. **तम्** = विषघातितपिशिताशिनमित्यर्थः॥

भवन्ती''ति लक्षणात् परम्परामरणेन **अनुम्रियते** सत्त्वजालं **सहस्रं यावत्**, सहस्रघातिविषसामर्थ्यत इति गाथार्थः ॥२९८॥ दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह–

एवं मीसज्जायं चरणप्पं हणइ साहु सुविसुद्धं।
तम्हा तं नो कप्पइ पुरिससहस्संतरगतं पि॥२९९॥

एवं गाहा। व्याख्या– **एवं मिश्रजातं** यद् अविशोधिकोट्यन्तर्गतं पाखण्डि-साधुमिश्रजातमिति भावः, **चरणात्मानं हन्ति** = घातयति **सुविशुद्धमपि**, सावद्यत्वात्। यस्मादेवं **तस्मात् न कल्पते पुरुषसहस्रान्तरगतमपि**, भगवद्वचनप्रामाण्यादिति गाथार्थः॥ २९९॥

अत्रैव भाजनविधिमभिधित्सुर्यदुक्तं ''**कप्पति कप्पे कते तिगुणे**'' तदाह–

णिच्छोडिए करीसेण वावि उव्वट्टिए ततो कप्पा।
[१]सुक्कावित्ता गेण्हइ अण्णे चउत्थे असुक्के वि॥३००॥ दारं॥

णिच्छोडिय गाहा। व्याख्या– **निच्छोटिते** = दृढं निर्लेपीकृते सति **करीषेण वाऽपि उद्वर्त्तिते** सति, भाजन इति गम्यते, तत्र त्रयः कल्पा दीयन्ते, न त्वविशेषेण [२]तदनु **शुष्कापयित्वा** भाजनं **गृह्णात्यशनादी**ति अयं विधिः।

अन्ये त्वाचार्याः प्रतिपादयन्ति– **चतुर्थे** कल्पे दत्ते सति **अशुष्केऽपि** गृह्णातीति गाथार्थः॥ ३००॥

प्रतिपादितं **मिश्रजात**द्वारम्। साम्प्रतं **स्थापना**द्वारमाह–

सट्ठाण-परट्ठाणे दुविहं ठवियं तु होइ नायव्वं।
खीराइ परंपरए हत्थगय घरंतरं जाव॥३०१॥

सट्ठाण० गाहा। व्याख्या– इह साध्वर्थं यद् अशनादेः स्थापनमसौ स्थापनोच्यते। तत्र स्थापना स्थापितमित्यनर्थान्तरम्, अतो भेदत इदमेवाह– **स्वस्थान-परस्थानयोर्द्विविधं स्थापितमि**ति। अत्र स्वस्थानं देयाऽपेक्षया चुल्ली वा अवचुल्ली वा, दधि-क्षीरगृहादि (वा) तत्र [३]स्थापितं शाल्योदन-गुल-क्षीरादि स्वस्थानस्थापितम्; परस्थानं तु छब्बकादि, तत्र स्थापितं परस्थानस्थापितम्। इत्थमिदं द्विप्रकारं **तु**शब्दः परम्परा-ऽनन्तर-[४]चिरेत्वरविशेषणार्थः, **भवति ज्ञातव्यं**, तीर्थकरवचनात्। [५]दातुकामेन तत्र **क्षीरादि परम्परस्थापितम्**, आदिशब्दाद् इक्ष्वादिपरिग्रहः। '**हस्तगते गृहान्तरं यावत्**' इति अधि[६]कृतगृहाङ्गण-[७]भाजामेव गृहान्तरविनिर्गताऽगारिहस्तस्थप्राभृतिकादि स्थापनेति गाथाक्षरार्थः॥३०१॥

(टि०) १. सलंहेसु कयकप्पे तिण्णिओ से सुक्खो दवंमि जे१ को०॥ **२. तदन्वपि शुष्कयित्वा** जि०॥ **३. तत्** जि० ला०॥ **४. चिरेतर** जि१॥ **५. आदातु०** जि० विना॥ **६. कृत्यगृ०** जि०॥ **७. भाजन एव** जि०॥

(वि०टि०) ◆. पू.मलयगिरिसूरिमते तु न केवलं अविशोधिकोट्यन्तर्गतं पाखण्डि-साधुमिश्रजातं परम्परया पुरुषसहस्रान्तरगतमपि चरणात्मानं हन्ति अपि तु यावदर्थिकमिश्रजातमपि हन्ति। तथा च तट्टीका– ''एवं सहस्रवेधकविषमिव यावदर्थिकपाखण्डि-साधुविषयं मिश्रजातमप्येकेनान्यस्मै दत्तं तेनाऽप्यन्यस्मायित्येवं परम्परया पुरुषसहस्रान्तरगतमपि साधोः सुविशुद्धं चरणात्मानं हन्ति...'' इति **मलय०**॥

अवयवार्थस्तु भाष्यादवसेयः।

चुल्ली अवचुल्ली वा ठाणट्ठाणं तु भायणं [१]पिढरो।
सट्ठाणट्ठाणम्मि य भायणठाणे य चउभंगो॥ ३०२॥
छब्बग-वारगमादी होइ परट्ठाण [२]ओ अणेगविहं।
सट्ठाणे पिढरे छब्बए य एमेव दूरे वि॥ ३०३॥
एक्केक्कं तं दुविहं अणंतर परंपरे य णायव्वं।
अविकारि कयं दव्वं तं चेव अणंतरं होइ॥ ३०४॥
उच्छू-खीरादीयं विकारि अविकारि घय-गुलादीयं।
परियावज्जणदोसा ओदण-दहिमादिगं वावि॥ ३०५॥
उब्भट्ट [३]परिण्णायं अण्णं लद्धं पयोयणे [४]घेत्थी।
रिणभीताव अगारी दहिं ति दाहं सुए [५]ट्ठवइ॥३०६॥
णवणीय मंथु तक्कं ति जाव अत्तट्ठिता व गेण्हंति।
देसूणा जाव घयं कुसणं पि य जत्तियं कालं॥ ३०७॥
रस-कक्कब-पिंडगुला मच्छंडिय-खंड-सक्कराणं च।
होइ परंपरठवणा अण्णत्थ व जुज्जए जत्थ॥ ३०८॥
भिक्खग्गाही एगत्थ कुणइ बितिओ उ दोसु उवओगं।
तेण परं उक्खित्ता पाहुडिया होइ [६]ट्ठविया उ॥३०९॥ दारं॥

[७]तत्र स्थापनाद्वारं पिण्डनिर्युक्तौ॥ छ॥
कृतिर्हरिभद्राचार्यस्येति।
ग्रन्थतः त्रयोदशशतानि त्रिपञ्चाशाधिकानि॥ अङ्कतः १३५३॥

(टि०) १. पिहडे जे१ को०॥ २. मो जे२ विना॥ ३. पडिण्णा० खं०॥ ४. ०त्थं जे१ को०॥ ५. ठवणा जे२ विना॥ ६. ठवणा खं०॥ ७. पिण्डनिर्युक्तेः टीकाखण्डं हरिभद्राचार्यकृतं समाप्तमिति। प्रणि० ला०॥

हिताहारा मिताहारा अप्पाहारा य जे नरा ।
न ते विज्जा तिगिच्छंति अप्पाणं ते तिगिच्छगा ॥

- पि० नि० ६८४

॥ अर्हम्॥

श्रीवीराचार्यैरनुसन्धिता

पिण्डनिर्युक्तिवृत्तिः

॥ ॐ नमः॥

प्रणिपत्य जिनवरेन्द्रं वीरं वागीश्वरीं च सर्व्वीयाम्।
देद्दाचार्य्यं च गुरुं निष्पादितशिष्यसङ्घातम्॥१॥
हरिभद्रसूरिविरचितटीकायाः साधुपिण्डनिर्युक्तेः।
स्पष्टं व्यधत्त शेषं **वीराचार्य्यो** यथाशक्त्या॥२॥

अथ **स्थापना**द्वारव्याख्यानानन्तरं क्रमप्राप्तं **प्राभृतिका**द्वारमाह–

पाहुडिया वि य दुविहा बादर सुहुमा य होइ नायव्वा।
ओसक्कण[१] उस्सक्कण[२] कप्पट्टीए[३] समोसरणे॥३१०॥

पाहुडिया गाधा। व्याख्या– तत्र प्राभृतमिव प्राभृतिका, यथा किञ्चिद् वस्तु परमभक्त्या दीयमानं प्राभृतमुच्यते, तद्वत् भिक्षाऽपि साधवे **प्राभृतिके**ति।

सा चोपाधिभेदाद् **द्विविधा**, तद्यथा– **बादरा सूक्ष्मा** च। तत्र अवसर्प्पणोत्सर्प्पणभेदाभ्यां पुनरेकैका द्विविधेति सम्बन्धनीयम्। तत्र विवक्षितकालावधेरधः सर्प्पणं = अवसर्प्पणम्, विविक्षितकालादारतः करणमित्यर्थः। तद्विपरीतं तूत्सर्प्पणमिति निर्युक्तिगाथापादत्रयाक्षरार्थः, चतुर्थपादार्थं तूपरिष्टाद् वक्ष्याम इति निर्युक्तिगाथासमुदायार्थः॥३१०॥

तत्र प्रत्यासत्तेर्न्यायाद् अवसर्प्पणभेदभिन्नसूक्ष्मप्राभृतिकाप्रतिपादनार्थमाह भाष्यकारः–

कन्तामि ताव पेलुं तो ते दाहामि पुत्त ! मा[४] रोद।
तं जइ सुणेइ साहू न गच्छती तत्थ आरंभो॥३११॥

कन्तामि गाहा। व्याख्या– **'कृणन्मी'**ति कृती वेष्टने (**पा० धा०** १४४७) इत्यस्य रौधादिकस्य उत्तमपुरुषेकवचनान्तमेतत्, कर्त्तनं करोमीत्यर्थः, **तावत् पेलुं** = रूतपोणिकां **ततः** = कर्त्तनक्रियाविरमे **तव दास्यामि**। "हे **पुत्र** ! **मा रोदीः**" इत्येवं स्वसुतमाह जननी उत्थिता सती, साध्वर्थमिति गम्यते उत्तरगाथातः, **तद्** एतत् गृहिणीप्रलपितं **यदि श्रृणोति साधुस्ततो** नेच्छति[*] तदाहारादिकम्, मा भूदारम्भकृतो दोष इति। कर्त्तनक्रियासमाप्तौ दास्यामीति साध्वागमनमुद्दिश्य उत्थाय पुत्रस्याऽपि ददातीत्यवसर्प्पणमिति भावनेति गाथार्थः॥३११॥ अमुमेवार्थं स्पष्टयति–

(टि०) १. उवसक्कण ओसक्कण खं०॥ **२. अहिसक्कण** जे१ को०॥ **३. कब्बट्टे चेव ओस०** खं०॥ **४. रोव** खं० विना॥
(वि०टि०) ◆. वीराचार्यमते ओसप्पण उसप्पण इति पाठः स्यादिति अस्माकं आभाति॥ ***. वीराचार्यमते 'साहू न गच्छती'** स्थाने **'साहू णेच्छती'** इति मूलपाठः स्यादिति अस्माकं आभाति॥

अण्णट्ठ उट्ठिया वा तुब्भ वि देमि त्ति किं ति परिहरइ।
किह दाणि ण उट्ठिहिसी ? साहुपभावेण लब्भामो॥ ३१२॥

अण्णट्ठ गाहा। व्याख्या– "**अन्यार्थमुत्थिता** साध्वर्थमिति यावत् **भवतोऽपि दास्यामी**"ति एतद् वचो डिम्भमातुः श्रुत्वा साधुः पृच्छति– "**किमेतद् ?**" **इति**, तया चाख्याते **परिहरति**, भिक्षामिति गम्यते।

प्राप्ते च साधौ डिम्भ एवमाह– **किं** साम्प्रतमपि **न उत्तिष्ठसि** ? अवश्यं साधुभिक्षादानार्थमुत्थातव्यं भवत्या, अतोऽहमपि मुनेः **प्रभावाल्लप्स्य** इति गाथार्थः॥३१२॥ तत्र प्रतिपादिता अवसर्प्पणरूपा सूक्ष्मप्राभृतिका। साम्प्रतं तूत्सर्प्पणरूपसूक्ष्मप्राभृतिकाप्रतिपादनार्थमाह–

मा ताव झंख पुत्तग ! परिवाडीए इहेइही साहू।
एयट्ठमुट्ठिया[१] ते दाहं सोउं विवज्जंति ॥ ३१३॥
अंगुलियाए घेत्तुं कड्ढइ कप्पट्ठओ घरं जत्तो।
किं ति ? कहिए ण गच्छइ[२] पाहुडिया एस सुहुमा उ॥ ३१४॥ दारं॥

मा ताव गाहा। **अंगुलियाए** गाधा। व्याख्या– डिम्भेन याचिता जननी एवमाह– "**मा तावत् प्रलप पुत्रक ! परिपाट्या एष्यत्यत्र साधुः, एतदर्थं** = साध्वर्थमुत्थिता **भवतोऽपि दास्यामि**।" एतच्च **श्रुत्वा वर्जयन्ति** साधवस्तद्वस्तु इति प्रथमगाथार्थः॥३१३॥

अङ्गुल्या ग्रहीतुं◆ माकर्षति डिम्भः, साधुमिति गम्यते, स्वगृहं **यतः***। साधुस्तमाह– "**किमिति** मां नयसि ?"। स वक्ति– त्वदर्थमुत्थिता ममाऽपि भोजनं दास्यति।" एवं ज्ञात्वा **न** तत्र **गच्छती**ति। **एषोत्सर्प्पणसूक्ष्मप्राभृतिके**ति द्वितीयगाथार्थः॥३१४॥

उक्ता द्विविधाऽपि सूक्ष्मप्राभृतिका। साम्प्रतं '**कप्पट्ठीए समोसणे**'त्ति इत्यनेन निर्युक्तिगाथाचतुर्थपादेन प्राक् संसूचितां बादरामपि द्विभेदामाह–

पुत्तस्स[३] विवाहदिणं ओसरणेऽतिच्छिते सुणिय सड्ढो।
ओसक्के[४] तो सरणे संखडिपाहेणगदवट्ठा ॥ ३१५॥

पुतस्स गाहा। व्याख्या– **पुत्रस्य विवाहदिनं समवसरणे[§]ऽतिक्रान्ते श्रुत्वा श्राद्धकोऽवसर्प्पयति समवसरणे▽ सङ्खडीप्रहेणक-द्रवार्थम्**। इयमत्र भावना– निजसुतविवाहमङ्गलं समवसरणकालादूर्द्धं चिकीर्षितं समवसरणकाल एव करोति साधुसंविभागार्थमिति गाथार्थः॥३१५॥

उक्ताऽवसर्प्पणरूपा बादरप्राभृतिका। अधुनोत्सर्प्पणरूपां बादरमाह–

(टि०) १. एयस्स उट्ठि० खं० विना॥ **२. वच्चइ** जे२॥ **३. ओसक्कं तो** जे१ को०॥

(वि०टि०) ◆. ग्रहीतुम् = गृहीत्वा इत्यर्थः॥ ***. यतः** = प्रतीत्यर्थः इति ला०टि०॥ **§. समवसरणे** = साधुसमुदाये इत्यर्थः॥ **▽**. साधुसमुदायस्य सङ्खडीगतलड्डुक-तन्दुलधावनादिदानार्थं विवाहदिनं श्राद्धकोऽवसर्प्पयति इत्याशयः॥

अप्पत्तम्मि व ठवियं ओसरणे होहिइ त्ति [१]उक्कसणं।
तं पागडमियरं वा करेइ उज्जू अणुज्जू वा॥ ३१६॥

अप्पत्तंमि उ गाधा। व्याख्या– **अप्राप्त एव स्थापितं** विवाहदिनं **समवसरणे**, समवसरणकालादधः स्थापितमित्यर्थः, तद्दिनमुत्सारयति, समवसरणकाल एव करोतीति भावः। **तद्** अवसर्प्पणमुत्सर्पणं वा **ऋजुः** श्रावकः **प्रकटं करोति** यथा साधवोऽपि संविद्रते **इतरस्तु अनृजुस्तथा** करोति यथा मुनयोऽपि न *विदन्तीति गाथार्थः॥३१६॥ एतच्चावसर्पणादिकं किमर्थं करोतीत्याह–

मंगलहेउं पुण्णट्ठया व ओसक्कियं दुहा पगयं।
उस्सक्कियं ति किं ति ? य पुट्ठे सिट्ठे विवज्जंति॥३१७॥

मंगल० गाधा। व्याख्या– **मङ्गलहेतुं पुण्यार्थं वा** यतः साधुसंविभागदानात् महन्मङ्गलं पुण्यं वाऽतोऽवसर्पितमुत्सर्पितं वा। "**किं** कारणमयमारम्भः ?" एवं साधुना **पृष्टे** श्रावकेन च ऋजुनाऽऽख्याते "भवदर्थमिदम्" अन्यतो वा श्रुते **वर्जयन्ति** तमाहारमिति गाथार्थः॥३१७॥

प्राभृतिकोपभोगदोषदर्शनार्थमाह–

पाहुडिभत्तं भुंजइ ण पडिक्कमए य तस्स ट्ठाणस्स।
एमेव अडति बोडो लुक्कविलुक्को जह [२]कवोडो॥३१८॥

पाहुडि० गाहा। व्याख्या– यथोक्तं **प्राभृतिकाभक्तं भुङ्क्ते; न प्रतिक्रामति तस्मादपराधस्थानाद्** अव्यावृत्या तदेवासेवत इत्यर्थः। **एमेव** = वृथैव **अटति बोडः** = मुण्डो, द्रव्यमुण्ड इति भावः, स चैवमुत्प्रेक्ष्यते– **लुप्तविलुप्तो यथा कपोत** इति गाथार्थः॥३१८॥

उक्तं **प्राभृतिकाद्वारम्**। अधुना **प्रादुष्करणद्वारं** प्राप्तम्, तत्र तावत् प्रथमं तत्सम्भवमाह–

लोयविरलुत्तिमंगं तवोकिसं जल्लखउरियसरीरं।
जुगमेत्तंतरदिट्ठिं अतुरियऽचवलं सगिहमेंतं॥३१९॥
दट्ठूण य अणगारं सड्ढी संवेदमागया काइ।
विपुलऽण्णपाण घेत्तूण निग्गया निग्गओ सो [३]य॥३२०॥
णीयदुवारम्मि घरे ण सुज्झइ एसण त्ति काऊणं।
[४]णीहम्मिए अगारी अच्छइ विलिता व [५]गहिएणं॥३२१॥

(टि०) १. **उक्किसइ** खं०॥ २. **कमोडो** जे१ को०॥ ३. **उ** जे१॥ ४. **णीहरियंमि** जे२॥ ५. **उ** जे२॥

(वि०टि०) ◆. निश्चितं विवाहदिनं किल अनायाते साधुसमुदाये भविष्यति ततो न किमपि मदीयं विवाहसत्कं साधूनामुपकरिष्यतीति कृत्वा विवाहं समवसरणकाले एव करोतीत्याशयः॥ *. "अथाप्रकटं तर्हि निपुणं शोधयित्वा वर्जयन्ति निपुणशोधनेऽपि यदि कथमपि न परिज्ञानं भवति तदा न कश्चिद्दोषः, परिणामस्य शुद्धत्वात्" इति **मलय०**॥

चरणकरणपरिहीणे[१] अण्णम्मि य आगए गहिय पुच्छा।
इहलोगं परलोगं कहेइ चइउं इमं लोगं॥ ३२२॥
णीयदुवारम्मि घरे भिक्खं णेच्छंति एसणासमिया।
जं पुच्छसि मज्झ कहं कप्पइ लिंगोवजीवीऽहं॥ ३२३॥
साहुगुणेसणकहणं आउट्टा तंमि तिप्पइ[२] तहेव।
कुक्कुड चरंति एते वयं तु चिण्णव्वया बितिओ॥३२४॥

लोय० गाहा। **दट्ठूण** गाहा। **णीयदुवारे** गाहा। **चरण** गाहा। **णीयदुवारम्मि** गाहा। **साहुगुणे०** गाहा। व्याख्या– **लोचेन विरलमुत्तमाङ्गं** यस्य सः, तथा **तपसा कृशं, जल्लो** = मलस्तेन **कलुषितशरीरं, युगमात्रान्तरदृष्टिं, अत्वरतिश्वासौ अचपलश्च** तम्, **स्वगृहमागच्छन्तं दृष्ट्वा चानगारं श्राद्धिका संवेगमागता। काचिद्विपुलमन्नं पानं** च **गृहीत्वा** तद्दानार्थं **निर्गता**। अत्राऽवसरे **निर्गतो** यतिरिति किमर्थं ? यतो **नीचद्वारे गृहे न शुद्धत्येषणेति कृत्वा,** यत एव**मागमः**– "**णीयदुवारं तमसं कोट्ठगं परिवज्जए**" (**दशवै०** ५/१/२०) इत्यादि। **निर्गते** च साधौ **तिष्ठत्यगारी व्रीडितेव** = लज्जितेव **गृहीतेन,** प्रदेयेनेति गम्यते।

अत्राऽवसरे **चरणकरणपरिहीणेऽन्यस्मिन् आगते,** द्रव्यसाधाविति प्रक्रमः, **गृहीते** च तेन देये **प्रश्नस्तया** कृतः– "किमित्यनेन परित्यक्ता भवता तु गृहीतेयं भिक्षा ?"। स च **इहलोक-परलोकौ** सञ्चिन्त्येहलोकं **त्यक्त्वा** परलोकमेव **कथयामास,** संविग्नपाक्षिकत्वात्। किं तद् ? इत्याह– "**नीचद्वारे गृहे भिक्षां नेच्छन्ति एषणासमिताः; यच्च पृच्छसि मम कथं कल्पते** तदहं **लिङ्गोपजीवी**"ति **साधुगुणानामेषणायाश्च कथनं** क्रियते तेनैव, साधुनेति गम्यते। एतदाकर्ण्य चिन्तयामास– "अहो दुष्करमिदं यत् स्वदोषाऽऽविष्करणं परगुणोत्कीर्त्तनं चे"ति। अतः '**आउट्टे**'ति अनुकूला **तस्मिन्** संविग्ने **तृप्यति** = तमाहारादिना प्रीणयतीति भावः।

पुनरत्रान्तरे साधुवेषविडम्बको **द्वितीयो** द्रव्यमुण्डः समागतः। सोऽपि **तथैव** तयोक्त एवमाह– "**कुक्कुड चरन्ति**[३] मातृस्थानिनोऽमी यतयः, यतो न गृह्णन्ति भिक्षाम्। अस्माभिरप्येतत् प्रागेवानुष्ठितम्, साम्प्रतं **वयं चीर्णव्रता** आस्महे" इति गाथार्थः॥३१९-३२४॥

साम्प्रतं प्रागुपन्यस्तप्रादुःकरणव्याचिख्यासयाह–

पाओकरणं[४] दुविहं पागडकरणं पगासकरणं च।
पागड संकामण कुड्डदारपाते य छण्णे य॥३२५॥

पाओकरणं गाहा। व्याख्या– **प्रादुःकरणं द्विविधं** तद्यथा– **प्रकटकरणं प्रकाशकरणं च**। तत्र

(टि०) १. **०णालसंमि** जे१ को० विना॥ २. **तं तु** खं०॥ ३. **चरियं** जि१॥ २. **पाहोक०** खं०॥

प्रकटकरणस्वरूपमाह– '**पायड संकामण**'त्ति यद्देयं तद् अभ्यन्तराद्बहिर्निष्काल्य ददाति चुल्लीं वा बहिः करोतीति भावः।

साम्प्रतं प्रकाशकरणमाह– '**कुड्डदारपाए य च्छण्णे य**'त्ति [१]तत्रस्थस्यैव देयस्य कुड्यच्छेदनेन द्वारपातेन तृणादिच्छादनापनयनेन प्रकाशं करोतीति गाथार्थः॥ ३२५॥

रयणपदीवे जोती ण कप्पइ पगासणा[२] सुविहियाणं।
अत्तट्ठिय परिभुत्तं कप्पइ कप्पं अकाऊणं॥ ३२६॥

रयण० गाधा। व्याख्या– **रत्न-प्रदीप-ज्योतिर्भिः प्रकाशना[३] न कल्पते सुविहितानाम्;** '**अत्तट्ठिय**'त्ति स्वीकृतं गृहस्थेन कल्पते। '**अपरिभुत्तं कप्पति कप्पं अकाऊणं**'ति अत्रेयं भावना– सहसाऽनाभोगतो वा प्रकट-प्रकाशदोषाघ्रातमशनादि गृहीत्वा तत् परिष्ठाप्य अन्यच्छुद्धं गृह्णाति कल्पमकृत्वैव, पात्रकस्येति गम्यते, सूचनात् सूत्रमिति गाथार्थः॥३२६॥ प्रकटकरणार्थं स्पष्टयन्नाह–

संचारिमा[४] उ चुल्ली बहिं व चुल्ली पुरा कया तेसिं।
तहि [५]रंधंति कयाती उवही पूतिं च पागो य॥३२७॥

संचारिमा उ गाधा। व्याख्या– '**संचारिमे**'त्ति अभ्यन्तराद् बहिश्चुल्लिं सञ्चारयन्ति, **बहिर्वा पूर्व्वकृतायां चुल्ल्यां** राध्नुवन्ति, वाशब्दात् साध्वर्थमभिनवां वा चुल्लिं कुर्व्वन्ति। **तत्र द्वौ** दोषावाह च– **उपधिपूतिः पाकश्च,** उपधिना चुल्लिरूपेण पूतिराहारो भवति पाकप्रवृत्तिश्चेति भाव इति गाथार्थः॥३२७॥

अन्यदा यदर्थं प्रकटनादि कृतवती तमेषणासमितं साधुं दृष्ट्वा एवमाह अगारीति–

णेच्छह तिमिसे[६] त्ति ततो बाहिरचुल्लीए साहु ! सिद्धण्णे।
इयं सोउं परिहरए पुट्ठे सिट्ठंमि[७] वि तहेव॥३२८॥

णेच्छह गाहा। व्याख्या– यतो यूयमन्धकारे **नेच्छथ** ग्रहीतुम्, भिक्षामिति गम्यते प्रक्रमाद्, अतो **बहिश्चुल्ल्यां सिद्धं** = राद्धं, प्राकृतशैल्या '**णे**'त्यस्माभिः '**साधो**'इत्यामन्त्रणम्, **इदं च श्रुत्वा परिहरति।** स्वयं वा **पृष्टे (शिष्टेऽपि)** परिहरति **तथैवेति** गाथार्थः॥ ३२८॥

एतच्च स्वीकृतं कल्पते। कथमस्य सम्भव इत्याह–

मच्छिय घम्मा अंतो बाहि पवायं पगासमासण्णं[८] ।
इति अत्तट्ठिय गहणं पागडकरणे विभासेयं[९]॥३२९॥

(टि०) १. **तत्स्वस्यैव** जि१॥ २. **०सणे** खं०॥ ३. **०शनान्न क०** जि०॥ ४. **व** खं०। **य** जे४ भां०॥ ५. **रंधेति** खं०॥ ६. **०संति** खं०॥ ७. **उ** खं० विना॥ ८. **सण्णे** जे१ को०॥ ९. **०भासेसा** खं० जे१॥

(वि०टि०) ◆. 'पाओ'त्ति सूचनादाहारपाकदोषः = भक्तादिपचनगतं दूषणं स्वयोगेन प्रवृत्तोऽपि ह्याहारपाकः साध्वर्थं बहिःकृतम् इति दोषः, चः समुच्चये, इहोपधिपूतित्वं प्रसङ्गादुक्तमिति पाक इत्यनेनैव प्रक्रान्तं तथा चुल्ल्या पृथक्कृते पूतित्वमुत्तरति परं प्रकटनदोषेण न कल्पते... इति **वीर०**॥ ✱. ''प्रादुष्करणशङ्कायां किमर्थमयमाहारो अद्य गृहस्य बहिस्तात् पक्वः ? इत्येवं पृष्टे तया ऋजुतया यथावस्थिते कथिते तथैव परिहरति'' इति **मलय०**॥

मच्छिय गाधा। व्याख्या– ◆**मक्षिका घर्म्मश्रान्तः** = मध्ये **बहिः** पुनः **प्रवातं, प्रकाशमासन्नं** च **इति** = एवं **आत्मार्थीकृते ग्रहणं प्रकटकरणे विभाषेयमिति** गाथार्थः॥३२९॥

पुनरपि प्रकाशकरणं स्पष्टयति तदाह–

कुड्डस्स कुणइ छिड्डं दारं वड्ढेइ कुणइ अण्णं वा।
अवणेइ छायणं वा ठवेइ रयणं व दिप्पंतं॥३३०॥
जोइ-पदीवे कुणइ व तहेव कहणं तु पुट्ठऽपुट्ठे वा।
[१]अत्तट्ठिए तु गहणं [२]जोइ-पइवे उ वज्जित्ता॥ ३३१॥ दारं॥

कुड्डस्स गाहा। **जोइ०** गाहा। व्याख्या– **कुड्यस्य करोति छिद्रम्, द्वारं वर्द्धयति, करोत्यन्यद्** वा **अपनयति च्छादनं वा स्थापयति रत्नं वा दीप्यमानम्। ज्योतिःप्रदीपौ करोति वा तथैव कथनं** यथा प्रकटकरणे **पृष्टेऽपृष्टे वा** परिहरति, **आत्मार्थीकृते** तु ग्रहणं ***ज्योतिःप्रदीपौ वर्जयित्वेति** गाथार्थः॥३३०-३३१॥

[३]पागडपगासकरणे कयम्मि सहसा व अहवऽणाभोगा।
गहियं विगिंचिऊणं गेण्हइ अन्नं अकयकप्पे॥३३२॥

व्याख्यातं **प्रादुःकरणद्वारं**॥छ॥ अधुना **क्रीतकृतद्वारमाह**–

कीयगडं पि य दुविहं दव्वे भावे य [४]दुविहमेक्केक्कं।
आयकियं च परकियं परदव्वं तिविह चित्ताई॥३३३॥

कीयगडं गाहा। व्याख्या– तत्र क्रयणं क्रीतं भावे निष्ठाप्रत्ययस्तेन कृतं = निर्व्वर्त्तितं **क्रीतकृतमिति**, साध्वर्थमिति गम्यते। तच्चोपाधिभेदाद् **द्विविधम्**, तद्यथा– **द्रव्ये भावे चेति**, अत्र तृतीयार्थे सप्तमी। **तच्चैकैकं द्विविधम्**, तद्यथा– **आत्मक्रीतं परक्रीतं च**। तत्र यत् **परद्रव्यक्रीतं** तत् **त्रिविधं**– सचित्ता-ऽचित्त-मिश्रद्रव्यक्रीतं भवति। तत्र सचित्तं त्रिविधं द्विपद-चतुष्पदा-ऽपदस्वरूपेण दासा-ऽश्व-धान्यादि[५]क्रयेण, अचित्तेन हिरण्यादिना, मिश्रेण सभाण्डोपकरणेन दासादिनेति गाथार्थः॥३३३॥

उक्तं परद्रव्यक्रीत[६]म्। साम्प्रतमात्मक्रीतमाह–

(टि०) १. ०त्तट्ठियादि ग० जे४ भां० विना॥ **२. दोसु वि य जहा पुरकएसु** जे१ को०॥ **३.** इयं अधिका गाथा **वीर०-मलय०वृत्तौ** विवृता उपलभ्यते। विशेषजिज्ञासुभिरस्या विवरणं तद्वृत्तितोऽवसेयम्॥ **४. ०विहे** जे२॥ **५. क्रमेण** जि० जि१॥ **६. ०तम् द्रव्यविषयमाह** जि१॥

(वि०टि०) ◆. यत्यर्थं पूर्वं बहिश्चुल्ल्यादि कृत्वा काचिदेवं चिन्तयति– च गृहस्य मध्ये बहवो मक्षिका अन्धकारं च पाकस्थानाद् भोजनस्थानं दूरस्थं बहिश्च प्रवातं तेन मक्षिकादयो न भवन्ति तथा प्रकाशमासन्नं च पाकस्थानाद् भोजनस्थानं तस्माद् अद्यप्रभृति अत्रैव वयं सदैव आत्मनिमित्तं पक्ष्याम इत्येवमात्मार्थीकृते कल्पते इति भावः॥ *. ज्योतिःप्रदीपौ वर्जयेत् ताभ्यां प्रकाशितमात्मार्थीकृतमपि न कल्पते, तेजस्काय-दीप्तिसंस्पर्शनाद् इत्याशयः॥

आयकीयं पि य दुविहं दव्वे भावे य [1]दव्वे चुण्णादी।
[2]भावे उ परस्सट्ठा अहवा वी अप्पणा चेव॥३३४॥

आतकीयं गाहा। व्याख्या– **आत्मक्रीतमपि द्विविधं द्रव्ये भावे चे**ति। तत्र **द्रव्ये चूर्णादयो भावे तु 'परस्स[3]ट्ठ'**त्ति परभावेन क्रीतं संयतार्थं **'अहवावि अप्पणा चेवे'**ति आत्मभावेनेति गाथार्थः॥३३४॥ साम्प्रतमात्मक्रीतं द्रव्यविषयमाह–

निम्मल्ल-गंध-गुलिया वण्णग-पोत्ता य आयकय दव्वे।
गेलण्णे उड्डाहो पउणे चडुकारि अहिकरणं॥३३५॥

णिम्मल्ल० गाहा। व्याख्या– **निर्म्माल्य-गन्ध-गुलिका-वर्ण्णक-वस्त्रादिभिरात्मक्रीतं द्रव्ये,** कोऽत्र दोषः ? इत्याह– चूर्णादिप्रदानान्तरं नितरां मान्द्ये मरणे वा गृहस्थस्य **उड्डाहः** = प्रवचनोपघातः स्यात्। अथ कथञ्चिन्नीरोगत्वं ततश्चा[4]टुकारिता साधोर**धिकरणं** चेति गाथार्थः॥३३५॥

उक्तं द्रव्यक्रीतम्। साम्प्रतं भावक्रीतमाह; [4]तत्तु स्व-परभावभेदाद् द्विधा। तत्र परभावक्रीतं स्पष्टयन्नाह–

वइयाए मंखमादी परभावक[5]ओ तु संजयट्ठाए।
उप्पायणा णिमंतण कीयगडे अभिहडे ठविए॥३३६॥

वइया० गाहा। व्याख्या– व्रजादिषु **'मंख[◆]माई परभावकउ'**त्ति मङ्खादेः परभावेन क्रयः संयतार्थम्, **तु**शब्दः पूरणार्थः, स च मङ्खः क्षीराद्युत्पाद्य साधूनामन्त्रयति। अत्र च दोषत्रयमाह– क्रीतकृता-ऽभ्याहृत-स्थापनारूपमिति निर्युक्तिगाथासमुदायार्थः॥३३६॥ अमुमेव स्पष्टयन्नाह–

सागारिमंखछंदणपडिसेहो पुच्छ बहुगते वासे।
कयरिं दिसिं गमिस्सह ? अमुगिं तहिं संथवं कुणइ॥३३७॥
दिज्जंते पडिसेहो कज्जे घेत्थं णिमंतण जतीणं।
पुव्व[6]गय आगतेसुं संछुभई एगगेहम्मि॥३३८॥

सागारि० गाहा। **दिज्जंते** गाहा। व्याख्या– **सागारी** = शय्यातरः **मङ्खो** देवगृहवित्तो देवल इत्यनर्थान्तरम्, सागारी चासौ मङ्खश्च (इति) विग्रहः, तस्य सम्बन्धिनी निमन्त्रणा, तस्याः **प्रतिषेधः**, साधुभिः कृत इति गम्यते। तेन चाननुगृहीतेन दित्सुना पृच्छा कृता– "गतप्राये **वर्षा**काले **कतरस्यां दिशि** यूयं **गमिष्यथ** ?"। तेऽप्यूचुः "**अमुकस्यां** दिशि।" **तत्र** चाग्रतरं गत्वा मङ्खः **संस्तवं** = परिचयं **करोति, दीयमाने** च क्षीरादौ **प्रतिषेधः** क्रियते अनेन, किमभिदधता ? – "**कार्ये ग्रहीष्यामी**"ति। स च **निमन्त्रणां** करोति **पूर्व्वगतः** पश्चादागतेषु साधुषु। स च क्षीरादि मीलयित्वैकत्र स्थापयति।

(टि०) १. **दव्वचु०** खं०॥ २. **भावंमि** खं० जे२ को०॥ ३. **०सट्ठं तु पर०** जि०॥ ४. **तत्र** जि१॥ ५. **०कयं** खं० जे४ भां०॥ ६. **०गते** खं०॥

(वि०टि०) ◆. **मङ्खः** = **देवपूजक** इति ला० टि०॥

महत्तरगृहादौ **'संच्छूभइ'** इति प्रवेशयति गाथाद्वयार्थः ॥३३७-३३८॥

गतं परभावक्रीतम्। अधुना आत्मभावक्रीतमाह–

धम्मकहि-वादि-खमए णिमित्त-आतावए सुतट्ठाणे।
जाती-कुल-गण-कम्मे सिप्पम्मि य भावकीयं तु॥३३९॥

धम्मकहि गाहा। व्याख्या– **धर्म्मकथि-वादि-क्षपके निमित्ताऽऽतापके श्रुतस्थाने जाति-कुल-गण-कर्म्मणि शिल्पे चैतेषु** स्थानेष्वात्मभावक्रीतं, सम्भवतीति क्रिया अध्याहार्य्या। तत्र **धर्मकथी** यो धर्म्मं कथयति, **वादी** यो वादं विदधाति, **क्षपको** मासाद्युपवासतपःकर्त्ता, **निमित्त** इति तद्वान् गृह्यते, अर्शादि ( ) पाठाद् अच्प्रत्ययात्, शीतोष्णादिष्वात्मानं आतापयतीति **आतापकः**, **श्रुतस्थान** इति गणि-वाचका-ऽऽचार्योपाध्यायादयो गृह्यन्ते। **जातिर्ब्राह्मणादिका, कुलमुग्रकुलादि, गणः** सारस्वतादिः, **कर्म्म** कृष्यादिकं **शिल्पं** च चित्रादीति गाथापदार्थः ॥३३९॥ आत्मभावक्रीतसम्भवमाह–

धम्मकहाआक्खित्ते धम्मकहाउट्ठियाण वा गेण्हे ।
कहयंति साहवो च्चिय तुमं व कहि [१]पुच्छिते तुसिणी॥३४०॥

धम्मकहा० गाहा। व्याख्या– **धर्म्मकथाऽऽक्षिप्तेभ्यः** = अनुरक्तेभ्यो **'धम्मकधाउट्ठियाण व'**त्ति धर्म्मकथाऽनुकूलितेभ्यो वा **गृह्णात्या**हारादि। "किं **त्वं धर्म्मकथी** ?" इति **पृष्ट** एवमाह– "**साधव एव धर्म्मं कथयन्ति।**" **तुष्णीं** वाऽऽस्ते इति गाथार्थः॥ ३४०॥ प्रकारान्तरेण चाह–

किं वा कहेज्ज छारा दगसूयरिया व [२]अहवऽगारत्था।
किं छगलगगलवलया मुंडकुडुंबी व किं कहए॥ ३४१॥

किं वा गाहा। व्याख्या– **'किं वे'**ति न किञ्चिदित्यर्थः **कथयेयुः 'छारा'** इति सरजस्काः **'दगसूअरिया व'** इति साङ्ख्या [३]**'ऽगारत्था'** इति गृहाश्रमिणः **किं** वा **'छगलगगलवलय'**त्ति मीमांसका **'मुण्डकुटूम्बी'**ति रक्तभिक्षव एते वराकाः **किं कथयन्ती**ति गाथाभावार्थः॥३४१॥

एमेव वाइ-खमए निमित्त-आतावगम्मि य विभासा।
सुयठाणं गणिमादी अहवा वाणाय(?यणा)रियमादी॥३४२॥ दारं॥

एमेव गाधा। व्याख्या– **एवमेव** यथा धर्म्मकथिनि तथा **वादिनि, क्षपके, निमित्ते आतापके च 'विभाषे'**ति विविधा व्याख्येत्यर्थः, पश्चार्द्धं गतार्थमिति गाथार्थः॥३४२॥

व्याख्यातं **क्रीतकृतद्वारम्**। अधुना **प्रामित्यद्वारमाह**–

पामिच्चं पि य दुविहं लोइय लोउत्तरं समासेण।
लोइय सज्झिलिगादी [४]लोउत्तर वत्थमादीसु॥३४३॥

(टि०) १. **अच्छए** जे१॥ २. **किं व** खं०॥ ३. **०ख्याः गार०** ला०॥ ४. **०ज्झिलमादी** जे१ को०॥

पामिच्चं गाधा। व्याख्या– **प्रामित्यं** = साध्वर्थमुच्छिद्य दानलक्षणं **द्विविधं लौकिकं लोकोत्तरं** च **समासेन** = संक्षेपेण। तत्र **लौकिके** '**सज्झिलिगाई**'ति भगिन्याद्युदाहरणमित्यर्थः, **लोकोत्तरे वस्त्रादि**विषयमुदाहरणमिति गाथार्थः ॥३४३॥ तत्र तावत् लौकिकमुदाहरणमाह–

सुयअभिगमणायविही बहि पुच्छा एग जीवति ससा ते।
पविसण पागनिवारण उच्छिंदण तेल्ल जतिदाणं॥३४४॥
अपरिमियणेहवुड्ढी दासत्तं सो य आगओ पुच्छा।
दासत्तकहण मा रुद अचिरा मोएमि अप्पाहे[१]॥३४५॥
भिक्खुदगसमारंभे कहणाउट्टो कहिं[२] भे वसहि त्ति।
सम्मवया आहरणं विसज्जकहणा कतिवया तु॥३४६॥

सुयअभिगम० गाधा। **अपरिमिय०** गाहा। **भिक्ख०** गाहा। व्याख्या– श्रुताधिगमेन ज्ञातो विधिः – क्रियारूपो येन साधुना सः = **श्रुताधिगमज्ञातविधिः**, स च विहरन् स्वजनदर्शनार्थं ग्रामं जगाम। तत्र च **बहिर्व्यवस्थितेन** कश्चित् **पृष्टः**। तेनोक्तं– "**एकैव जीवति स्वसा ते**"। स च स्वसृगृहं **प्रविष्टः** तया च **पाकः** समारब्धः। तेन च **निवारिता**। ततश्चोच्छिद्य तया **तैलं** दत्तम्। **अपरिमितस्नेहवृद्ध्या** च **दासत्वमभूत्** तस्याः। **स च** भूयोऽप्यागतो। बहिः **पृच्छा** कृता, **दासत्वकथनं** च श्रुत्वा तेनोक्तं– "**मा रुदिहि, अचिरान्मोचयामी**"ति सन्दिष्टम्। तेन च भिक्षार्थं प्रविष्टेन भगिनीस्वामिगृहे **उदकसमारम्भो** निवारितः। तेन च[३] प्रह्वीभूतेन साधुः पृष्टः– "**क्व भवतां वसतिरिति** ?"। स चाह– "नास्ति नो वसतिः"। तेन च दत्ता। धर्मकथापूर्व्वकं **सम्यक्त्वव्रतानि** ग्राहितः **स्थापत्योदाहरणं**[४] चाख्यातम्। तत्र पुत्र**विसर्जनकथनम्**,[५] तेन च तद्भगिनी विसर्जिता प्रव्रजिता च। **कियन्तो** चेदृशा इति गाथात्रयसमुदायार्थः ॥३४४-३४६॥

भावार्थस्तु कथानकादवसेयः। तच्चेदं– तेणं कालेणं तेणं समयेणं **कोसल**विसए एगो कुलपुत्तओ होत्था। सो य धम्मं सोऊण संजायसंवेगो णिक्खंतो। कालेण[६] य समहिगयसुत्तत्थकिरियाकलावो सयणदंसणत्थं[७] गओ। बहिट्ठिएण पुच्छितो एगो पुरिसो "को णे सण्णायगाणं जीवति ?"। तेण भणियं– "उच्छण्णं सव्वं पि ते कुलं णवरमेगा भगिणी ते जीवति"। ततो इमं णिसामिऊणं पविट्ठो भगिणीगेहं। सा य तं णिमित्तं पागं कुणमाणी णिवारिता साहूणा। "अहो ! एस भट्टारगो पागं ण गेण्हइ" त्ति चिंतेंतीए उच्छिंदिऊण दिण्णं से तेल्लं। गहियं साहूणा। तओ य विहरिओ साहू। तेल्लं पि अपरिमियसिणेहवुड्ढीए वड्ढमाणं जातं बहुयं। ततो तं दाउमचायंतीए दासत्तं पडिवण्णं। कालांतरेण पुणो वि आगओ साहू। मुणियं च से दासत्तं बहिट्ठिएणेव। ततो तेण अप्पाहितं "मा रुअ; अचिरेण च तं दासत्ताओ मोएमि"। एवं

(टि०) १. **एत्ताहे** भां० जे४॥ २. **०हिं च भे वसहिं** - खं०॥ ३. **स्पष्टीभूतेन** जि१॥ ४. **व्याख्यातं** ला०॥ ५. **कथानकं तेन** जि१॥ ६. **कमेण** जि०॥ ७. **०त्थमागओ** जि१॥

[१]संधारेऊण पविट्ठो भिक्खट्ठा भगिणिसामिगिहं। उदगसंघट्टभिक्खापडिसेहे कए पुच्छियं घरवइणा, साहूणा वि समयपरिकहणाए आउट्टाविएण भणियमणेण "कहिं ते वसहि त्ति ?"। साहूणा भणियं– "णत्थि"। ततो दिण्णा से वसही, ट्ठिओ तत्थ। धम्मकहाए य गाहितो संमत्ताणुव्वताणि। बहुवोलीणवासे य गंतुकामेण आउच्छिओ गहवई कहियं च **थावच्चो**दाहरणं, जहा– **थावच्चो** सावओ जाओ। जहा य तेण य अभिग्गहो गहितो "जो मम कुलातो कोइ पव्वयति स मया ण [२]वारेयव्वो"। तस्स य पुत्तो पव्वज्जाए उवट्ठिओ, ण य तेण व(?वा)रिओ, पव्वइओ य। तेण वि इमं सोऊण एसो च्चिय गहिओ अभिग्गहो। एत्थंतरंमि सा वि तस्स साहुणो भगिणी पव्वज्जाए उवट्ठिया; मुक्का तेणं पव्वतिया य।

केत्तिया वा एवंविहा भविस्संति तम्हा ण घेतव्वं पामिच्चं ति।

एते चेव [३]उ दोसा सविसेसतरा तु वत्थपाएसु।
लोइयपामिच्चेसुं लोगुत्तरिया इमे अण्णे॥३४७॥

एए गाहा। व्याख्या– **एत एव दोषाः सविशेषतरास्तु वस्त्रादिषु लौकिकप्रामित्येषु लोकोत्तरास्तु अमी अन्ये** वक्ष्यमाणा भवन्तीति गाथार्थः॥३४७॥ ते चामी–

मइलिय-फालिय-[४]खोसिय-हिय-णट्ठे वावि अण्ण मग्गंते।
अवि सुंदरे वि दिण्णे दुक्कररोयी कलहमाई॥३४८॥

मइलिय० गाहा निगदसिद्धा॥३४८॥

उच्चत्ताए दाणं दुल्लभ खग्गूड-अलस पामिच्चं[५]।
तं पि य गुरुस्स पासे [६]ठवेइ सो देइ मा कलहो॥३४९॥ दारं॥

उच्चत्ताए गाहा। (व्याख्या–) उत्सर्गतः प्रामित्यं न कार्य्यम्, सीदतस्तु **उच्चतया** = मुधिकतयैव दातव्यम्, द्वितीयपदमाश्रित्याह– **दुर्लभे** वस्त्रे **शठाऽऽलसयोर्वा प्रामित्यं** सम्भवति, तच्च कथं कार्य्यम् ? देयं **गुरोः** समर्प्पयति **स** एव **ददाति मा** भूत् **कलह** इति गाथार्थः॥३४९॥

उक्तं **प्रामित्य**द्वारम्। अधुना **परिवर्त्ति**तद्वारमाह–

परियट्टियं पि दुविहं लोइय लोउत्तरं समासेणं।
एक्केक्कं पि य दुविहं तद्दव्वे अण्णदव्वे य॥३५०॥

परियट्टि० गाहा। व्याख्या– **परिवर्त्तनं** = परिवर्त्तितम्, वस्तुना वस्तुग्रहणम्, तच्च **द्विविधं लौकिकं लोकोत्तरं** च **समासेन**। **एकैकमपि द्विविधं**– **तद्द्रव्य**विषयं **अन्यद्रव्य**विषयं **चे**ति। तद्द्रव्यपरिवर्त्तो घृतेन घृतं गृह्णाति, अन्यद्रव्यपरिवर्त्तो घृतेन तैलमिति गाथार्थः॥३५०॥

साम्प्रतं अस्योदाहरणप्रदर्शनाय आह– '**अवरोप्परे**' त्यादिगाथात्रयम्।

(टि०) १. **संपाहारे०** जि० जि१॥ २. **धरेयव्वो** जि० ला०॥ ३. **य** खं०॥ ४. **खोलासिय** जे१ को०॥ ५. **०मिच्चे** जे२॥ ६. **ठवंति** खं०॥

अवरोप्परसज्झिलगा संजुत्ता दो वि अण्णमण्णेणं।
पोग्गलिय संजयट्ठा परियट्टण संखडे बोही॥३५१॥
अणुकंप भगिणिगेहे दरिद्द परियट्टणा य कूरस्स।
पुच्छा कोद्दवकूरे मच्छर णाइक्ख पंतावे॥ ३५२॥
इतरो वि य पंतावे णिसि ओसमिताण[१] तेसि दिक्खा य।
तम्हा उ ण घेत्तव्वं कइ वा जे उवसमेहिंति[२]॥ ३५३॥

वसंतपुरे नगरे द्वौ वणिजौ **देवदत्त-धनदत्त**नामानौ बभुवतुः। तत्र देवदत्तभगिनी **लक्ष्मी**नाम्नी धनदत्तेनोद्वूढा धनदत्तभगिनी च **बन्धुमती** देवदत्तेनेति। अन्यदा देवदत्तभ्राता पूर्व्वप्रव्रजितो विहरन् अनुकम्पया भगिनीलक्ष्मीगृहं प्रविष्टः। सा च दारिद्र्यात् कोद्रवोदनेन भ्रातृगृहात् परिवर्त्त्य शाल्योदनं सादरमदात् तस्मै। देवदत्तश्च भुञ्जानो बन्धुमत्या[३] अभिहितो– "ददामि कोद्रवोदनं यदि ते रोचते नो चेत्तिष्ठतु"। ततः कुपितेन वृत्तान्ताकथने तया ताडितयोक्तं– "तवैव भगिन्या नीतः शाल्योदनः, किमिति मां ताडयसीति ?"। धनदत्तेनाऽपि ममाऽनया लघुत्वमानीतमिति लक्ष्मीरपि ताडिता। विदितवृत्तान्तेन च साधुना धर्म्मकथयो-पशमय्य सर्वाणि प्रव्राजितानि इति।

कियन्तो चेदृशा भविष्यन्तीत्यतः परिवर्त्तितं न ग्राह्यमिति गाथात्रयार्थः॥३५१-३५३॥

उक्तं लौकिकपरिवर्त्तितम्। अधुना लोकोत्तरमुच्यते– यच्छ्रमणः श्रमणेन सह वस्त्रादिपरिवर्त्तनं करोति तल्लोकोत्तरपरिवर्त्तनम्। तत्र चामी दोषाः–

ऊणहियदुब्बलं[४] वा खर-गुरु-छिण्ण-मइलं असीयसहं।
दुव्वण्णं वा णाउं विपरिणमे अण्णभणिओ वा॥ ३५४॥

ऊणहिय० गाहा। व्याख्या– **न्यूनाधिक-दुर्ब्बल-खर-गुरु-छिन्न-मलिना-ऽशीतसह-दुर्व्वर्णा**दिदोषान् **ज्ञात्वा विपरिणमेदे**कतरः स्वयम**न्य**चोदितो वेत्यतः परिवर्त्तनं न कार्य्यम्॥३५४॥

❖द्वितीयपदमाश्रित्याह–

एगस्स माणजुत्तं न उ बिइए एवमाइ कज्जेसु।
गुरुपामूले[५] ठवणं सो दलयइ अण्णहा कलहो॥ ३५५॥ दारं॥

एगस्स गाहा। व्याख्या– **एकस्य मानयुक्तं[६]** न परस्य, न्यूनाधिकं वस्त्रादीति, परिवर्त्तनसम्भवे विधिमाह– **गुरुपादमूले स्थापनं स ददाति** मा[७] भूत् **कलहादयो** दोषा इति गाथार्थः॥३५५॥

उक्तं **परिवर्त्तित**द्वारम्। अधुनाऽभ्याहृतमुच्यते–

(टि०) १. ०मिऊण जे२। **०सवियाण** खं० जे२ विना॥ **२. ओसमेहिंति** भां० जे४, **ओसावहिंति** जे१,२॥ **३. अभिहतो** जि०॥ **४. ऊणाहि०** जे१,२॥ **५. ०रुपायमूले** खं०॥ **६. ०युक्तं अपरस्य** जि० जि१॥ **७. भूदवच्छलकल०** ला०॥
(वि०टि०) ❖. द्वितीयपदम् = अपवादपदम् इति ला० टि०॥

अभिमुखं आहृतं– आनीतं = अभ्याहृतं, गृहस्थादिनेति गम्यते, तच्च द्विभेदमित्याह–

आइण्णमणाइण्णं णिसीहाभिहडं च णोणिसीहं च।
णिसिहाभिहडं ठप्पं[१] णोणिसीहं तु वोच्छामि॥३५६॥

आइण्ण० गाहा। व्याख्या– तद् अभ्याहृतं **आचरिता-ऽनाचरित**भेदाद् द्विधा, पुनरप्येकैकं निशीथा-ऽनिशीथभेदाद् द्विधैव, तत्र **निशीथं** प्रच्छन्नम्, तद्विपरीतं **नोनिशीथम्**। तत्र तावन्निशीथाभ्याहृतं **स्थाप्यं नोनिशीथा**ऽभ्याहृतं **तु वक्ष्यामीति** गाथार्थः॥ ३५६॥ तद् द्विविधमित्याह च–

सग्गाम-परग्गामे सदेस[२]-परदेसमेव[३] बोधव्वं[४]।
दुविहं तु[५] परग्गामे जल-थल णावोडु जंघाए॥ ३५७॥

सग्गाम-परग्गामे गाधा। व्याख्या– यत्तु नोनिशीथाभ्याहृतं तत् **स्वग्राम-परग्राम**भेदा(द्) द्विधा। तत्र यत् परग्रामाभ्याहृतं तत् **स्वदेश**परग्रामाभ्याहृतं **परदेश**परग्रामाभ्याहृतं चेति। अत्र स्वदेश-परदेशयोश्चतुर्भङ्गिका कार्या। तत् सर्वमपि परग्रामाभ्याहृतं **द्विविधं जल**पथेन **स्थल**पथेन वा। यत् तज्जलपथेन तदपि द्विविधैव **जङ्घा**भ्यां **नाव**ादिना चेति गाथार्थः॥३५७॥ अमुमेवार्थं सविशेषमाह–

जंघा-बाहु-तरीय व जले थले खंध अरखुरनिबद्धा।
संजम-आयविराहण तहियं पुण संजमे काया॥३५८॥

जंघा० गाहा। व्याख्या– **जङ्घा**भ्यां **बाहु**भ्यां **तरी** = नौः तया वा **जले** = जलविषये, **स्थले** तु **स्कन्धकेन** '**अरखुरनिबद्ध**'त्ति निबद्धशब्दः प्रत्येकमभिसम्बध्यते, ततश्चारनिबद्धा = गन्त्री तदादिना खुरनिबद्धेन = रासभादिना, द्वितीयार्द्धेन[६] दोषानाह– '**संजमे**'त्यादि स्पष्टमिति गाथार्थः॥ ३५८॥

साम्प्रतं जल-स्थलाऽपायानाह–

अत्थाह गाह-पंका मगरोहारा जले अवाया उ।
कंटा-ऽहि-तेण-सावय थलंमि एए भवे दोसा॥ ३५९॥

अत्थाह गाधा। व्याख्या– ◆**अथाह-ग्राह-पङ्क-मकर**-कच्छपा **जले** = जलविषया **अपायाः**, नवरं **ओहारः** = कच्छपः। **कण्टका-ऽहि-स्तेन-श्वापदाः स्थल**विषया अमी **दोषा** इति गाथार्थः॥३५९॥ उक्तं परग्रामाभ्याहृतम्। साम्प्रतं स्वग्रामाभ्याहृतमाह–

सग्गामे वि य दुविहं घरंतरं नोघरंतरं चेव।
तिघरंतरा परेणं घरंतरं तं तु नायव्वं॥ ३६०॥

सग्गामे गाहा। व्याख्या– **स्वग्रामा**भ्याहृतं **द्विविधं** तद्यथा– **गृहान्तरा**भ्याहृतं **नोगृहान्तरा**भ्याहृतं

(टि०) १. ०प्पं वोच्छामी नोनिसीहं तु भां० जे४॥ **२. देसप०** जे१ भां० जे४ विना॥ **३. ०धव्वे** जे१,२ को०॥ **४. च** खं०॥ **५. यत्र नोनि०** जि१। **यत्तन्नोनि०** जि०॥ **६. दोषमाह** ला०॥

(वि०टि०) ◆. "अस्ताघे = पदादिभिरलभ्यमानेऽधोभूभागे अधोनिमज्जनलक्षणोऽपायो भवति" इति **मलय०**॥

च। अनयोः स्वरूपमाह– **त्रिगृहान्तरात् परतो गृहान्तराभ्याहृतम्**, चतुर्थगृहादेरानीतमेतच्चानाचरितं त्रिगृहान्तराभ्याहृतमाचरितमेवेति गाथार्थः॥३६०॥

णोघरंतरऽणेगविहं वाडग-साही-णिवेसण-[1]गिहेसु।
काये खंधे मिम्मय-कंसेण व तं तु आणेज्जा॥३६१॥

णोघरंतर गाधा। व्याख्या– **नोगृहान्तरमनेकविधं** तद्यथा– **वाडग-साही-णिवेसण-गिहेसु वाटकः** = व्यवच्छिन्नो ग्रामस्य पृथग्निवेशः, **साही** = ग्रामगृहाणामेक[2]पाटी, निवेशनं = एकनिष्क्रमणप्रवेशानि द्वे बहूनि वा गृहाणि, **गृहं** = यद्दूरतरव्यवस्थितमेककम्, एतद्विषयमभ्याहृतं भवति तस्य चानयनं **कापोत्या, स्कन्धेन मृन्मय-कांस्य**भाजनादिना चेति गाथार्थः॥३६१॥

नोनिशीथमनाचरितं प्रकारान्तरेणाह–

सुण्णं व असइ कालो पगयं व पहेणगं [3]व पासुत्ता।
इति एति काइ घेत्तुं दीवेइ य कारणं तं [4]तु॥३६२॥

सुण्णं व असइ गाहा। व्याख्या– काचिद् गृहिणी अभ्याहृतमानीयैवमाह– यदा यूयं प्रविष्टास्तदा **शून्यं** गृहमासीद् भिक्षा**कालो** वा **नासीत्, प्रकृतं** = भोज्यमुच्यते, **तद्वा** जातं **प्रहेणकं** वाऽऽयातं **प्रसुप्ता** वाऽहं आसमिति गाथार्थः॥३६२॥

स्वग्रा(मपरग्रा)माचरिता-ऽनाचरितं नोनिशीथाभ्याहृतमुक्तम्। अधुना परग्रामाभ्याहृतनिशीथमाह–

एसेव कमो नियमा निसीहाभिहडे वि होइ णायव्वो।
अविदियदायगभावं निसिहाभिहडं तु नादव्वं॥३६३॥

एसेव गाहा। व्याख्या– **एष एवानन्तरोक्तः क्रमो नियमान्निशीथाभ्याहृतेऽपि ज्ञातव्यः**। अस्य स्वरूपमाह– **अविदितः** = अज्ञातो **दायकस्य भावो** [5]यस्मिन् तत्तथेति गाथार्थः॥३६३॥

अथ कथमस्य सम्भवः ? तद् आह–

अइदूरजलंतरिया कम्मासंकाए मा ण घेच्छंति।
आणेति संखडीओ सड्ढो सड्ढी व पच्छण्णं॥३६४॥

अइदूर० गाहा। व्याख्या– **अतिदूरमिति** कृत्वा नागच्छन्ति अत्र यतयो **जलान्तरिता** वा आगता वा **आधाकर्माद्याशङ्क्या न गृहीष्यन्ते** एतदालोच्य **आनयति सङ्खडीतः श्राद्धः श्राद्धी वा प्रच्छन्नमिति** गाथार्थः॥३६४॥

निग्गम देउल दाणं दियादि सण्णादिनिग्गते दाणं।
सिट्ठंमि सेसग[6]हणं दिंतऽन्ने वारयंतऽण्णे॥३६५॥

(टि०) १. **गिहे य** खं०॥ २. **०कपरिपाटी** जि१॥ ३. **तु** जे२॥ ४. **तु पागडं** खं०॥ ५. **०स्मिंस्तथैवेति** जे१॥ ६. **गमणं** जे२ विना॥

णिग्गमण गाधा। व्याख्या– साधु**निर्गमनमार्गे देवकुलादौ दानं द्विजातिभ्यः, सञ्ज्ञाकारण-निर्गत**साधोः प्रदानम्, तेन **कथिते शेष**साधुभिश्च [१]गृहीतं दातारश्च केचनो **ददत्यन्ये** निकृत्या **वारयन्ती**ति गाथार्थः॥३६५॥

भुंजण अजीरपुरिमड्ढगादि अच्छंति भुत्तसेसं वा।
आगम निसीहिगादि ण भुंजते सावगासंका॥३६६॥

भुंजण गाहा। व्याख्या– तदाहृतं कैश्चित् भुक्तं अन्ये **त्वजीर्ण**प्रत्याख्यात**पुरिमार्द्ध**कादयोऽभुक्तास्**तिष्ठन्ति भुक्तशेषं वा** तिष्ठति। अत्रान्तरे दातृश्रावका**गमनं निषेधिकाकरणादि**ना ज्ञात्वा **न भुञ्जते** दातृश्रावकमायाऽऽशङ्कयेति गाथार्थः॥३६६॥ अर्द्धभुक्ते चायं विधिः–

उक्खित्तं णिक्खिप्पइ आसगतं मल्लगम्मि पासगते।
खामित्तु गया सड्ढा ते वि य सुद्धा असढभावा॥३६७॥

उक्खित्तं गाहा स्पष्टार्था॥३६७॥ स्वग्रामाभ्याहृतनिशीथमाह–

[२◆]णीयं पहेणगं मे अमुगत्थ गयाए संखडीए वा।
वंदणगट्ठ पविट्ठा देइ तयं पट्ठिय नियत्ता॥३६८॥

णीयं गाहा। व्याख्या– "**नीतं प्रहेणकं मया अमुकत्र** न च गृहीतम्, **सङ्खडी**गतया वा न भुक्तमुद्धृतमानीतं वन्दनार्थमिह प्रविष्टे"ति श्राविका [३]साधूनिदमाह। ततः कतिचित्पदानि दत्त्वा निवृत्त्योक्तं– "यदि कल्पनीयं [४]गृह्णीध्वम्" ॥३६८॥ प्रकारान्तरेणेदमाह–

[*५]लद्धं पहेणगं वा नियगाणं नेच्छियं व तं तेहिं।
सागारि सयज्झिए वा पडिकुट्ठा संखडे रुट्ठा॥३६९॥

लद्धं गाहा। व्याख्या– **शय्यातरी**गृहे '**सयज्झिय**' त्ति प्रातिवेशिनी मातृस्थानेन प्रहेणकमानीत[६]वती तया च **प्रतिषिद्धा** असङ्खडं कृत्वा **रुष्टा** निर्गच्छन्ती साधूनाह– "यदि कल्पनीयं ततो गृह्णीध्वमि"ति॥३६९॥

एयं तु अणाचिण्णं दुविहं पि य आहडं समक्खायं।
आइण्णं पि य दुविहं देसे तह देसदेसे य॥३७०॥

एयं तु गाहा। व्याख्या– **एत**(द्)द्विविधमप्यनाचरितं स्वग्राम-परग्रामनिशीथाभ्याहृतं समाख्यातम्। गाथापश्चार्द्धेन निशीथाभ्याहृतमाचरितमाह– **आचरितमपि द्विविधं देशविषयं देशदेशविषयं चेति**

(टि०) १. श्रुतं ला०॥ **२. लद्धं** जे४ भां०॥ **३. ०नेवमाह** जि० जि१॥ **४. गृहीतं** जि१॥ **५. नीयं** भां० जे४॥ **६. ०वती भवती तया** जि१॥

(वि०टि०) ◆. मलयगिरिसूरिमतेन तथा वीरगणिमतेन 'लद्धं' इति पाठः, सन्दर्भानुसारेण अस्माकं स पाठः सम्यग् भाति॥ ***. . मलयगिरिसूरिमतेन तथा वीरगणिमतेन 'नीयं'** इति पाठः, स पाठः प्रकरणानुसारेण अस्माकं समीचिनं आभाति॥

गाथार्थः ॥३७०॥ अनयोः स्वरूपमाह–

हत्थसयं खलु देसो आरेणं होदि देसदेसो तु[१]।
आइण्णे तिण्णि गिहा ते वि य उवयोगपुव्वागं[२]॥३७१॥

हत्थसयं गाहा। व्याख्या– **हस्तशतं खलु देशस्तदारतस्तु देशदेशः**। गृहत्रयाभ्याहृतमाचरितं तदप्युपयोगपूर्वकमिति गाथार्थः॥ ३७१॥ हस्तशतादिसम्भवमाह–

परिवेसणपंतीए दूरपवेसे य घंघसालगिहे।
हत्थसयादाइण्णं गहणं परतो उ[३] पडिकुट्ठं॥३७२॥

परिवेसण० गाहा। व्याख्या– **परिवेषणपङ्क्तौ दूरप्रवेशे च घङ्घशालागृहादौ[४] हस्तशतादाचरितं ग्रहणं परतस्तु प्रतिषिद्धमिति** गाथार्थः॥३७२॥ तद् आचरितं त्रिधेति। आह च–

उक्कोस-मज्झिम-जहण्णगं तु तिविहं तु होइ आइण्णं।
करपरियत्त जहण्णं सयमुक्कोस[५] मज्झिमं सेसं॥३७३॥

उक्कोस० गाहा। व्याख्या– **उत्कृष्ट-मध्यम-जघन्यकं त्रिविधं तु भवत्याचरितम्, करपरिवर्त्तरूपं जघन्यमुत्कृष्टं** हस्तशतादानीतं **मध्यमं शेषमिति** गाथार्थः॥३७३॥

उक्तमभ्याहृतद्वारम्। इदानीमुद्भिन्नद्वारमाह–

पिहिउब्भिण्णकवाडे फासुय अप्फासुए य बोधव्वे।
अप्फासु पुढविमाई फासुय छगणातिदद्दरए॥३७४॥

पिहिउद्भिन्न० गाहा। व्याख्या– उद्भेदनं = उद्भिन्नम्, तद् द्विधा पिहितोद्भिन्नं कपाटोद्भिन्नं च। तत्र पिहितं– स्थगितमुद्भिन्नं = पिहितोद्भिन्नम्, कपाटोत्प्रेरणलक्षणं कपाटोद्भिन्नम्। तत्र पिहितोद्भिन्नं प्रासुकमप्रासुकं च, अप्रासुकं **पृथिव्यादि, प्रासुकं** गोमय-दर्दरकादि, दर्दरको वस्त्रचर्म्मादिबन्धनलक्षण इति गाथार्थः॥३७४॥ अत्र दोषमाह–

उब्भिण्णे छक्काया दाणे कयविक्कए य अधिगरणं।
ते चेव कवाडम्मि वि सविसेसा जंतमाईसु॥३७५॥

उद्भिन्ने गाहा। व्याख्या– तत्र **चोद्भिद्यमाने** षड्जीवनिकायवधो भवति। तथोद्भिन्ने च **दान-क्रय-विक्रय**आदिविषयमधिकरणं भवति। **त एवाऽनन्तरोक्तदोषाः कपाटोद्घाटनेऽपि, सविशेषतरास्तु यन्त्र**कपाटादिष्विति गाथार्थः॥३७५॥ षड्जीवनिकायवधसम्भवमाह–

सच्चित्तपुढविलित्तं लेलु सिलं वावि दाउमोलित्तं।
सच्चित्तपुढविलेवो चिरं पि उदगं अचिरलित्ते॥३७६॥

(टि०) १. **य** जे१ को०॥ २. **०ग काऊणं** खं० जे१ को०॥ ३. **य** खं०॥ ४. **०लादौ गृहादौ** ला०॥ ५. **०क्कोसेयरं मज्झं** जे१ को०॥

सच्चित्त० गाहा। व्याख्या– **सचित्तपृथिवीकायेन लिप्तं** स्याल्लेष्टुं **शिलां वा दातुमुपलिप्तं, सचित्तपृथिवीलेपश्चिरमप्यास्ते उदकमप्यचिरलिप्तेति** गाथार्थः ॥३७६॥

एवं तु पुव्वलित्ते काया उल्लिंपमाणे [१]दो होज्जा।
तिम्मेउं उवलिंपइ जउमुद्दं वावि तावेउं॥३७७॥

एवं गाहा। व्याख्या– **एवं** = अनन्तरोक्तप्रकारेण **पूर्व्वलिप्ते कायविराधना** पश्चादुपलिप्यमानेऽपि कायद्वयस्य पृथिव्युदकरूपस्य विराधना **स्यात्**, कथम् ? यतस्तेमितुमुपलिम्पते, **जतुमुद्रां वाऽपि तापयितुं** ददाति। तत्र च वाय्वग्न्योर्विराधना स्यात्, तथा तत्रैव पनक-बीजादिवनस्पतिकायविराधना तथा त्रसकुन्थु-पिपीलिकादीनां च त्रसकायविराधनेति गाथार्थः ॥३७७॥ अमुमेवार्थमाह–

जह चेव पुव्वलित्ते[२] काया दाउं पुणो वि तह चेव।
उल्लिप्पंते काया मूइंगादी नवरि[३] छट्ठे॥३७८॥

जह चेव गाहा। व्याख्या– **यथा चैव पूर्व्वलिप्ते** समुद्भिद्यमाने **काया** विराध्यन्ते देयं **दत्त्वा पुनरपि तथा चैवोपलिप्यमाने काया** विराध्यन्ते। **'मुइंगाइ'**त्ति पिपीलिकादिविराधना **नवरं 'छट्ठे'**त्ति त्रसकायविषयेति गाथार्थः ॥ ३७८॥ उद्भिन्ने च दोषानाह–

परस्स तं देइ स एव गेहे तेल्लं व लोणं व घयं गुलं वा।
उग्घाडियं तं तु [४]करेइऽवस्सं सविक्कयं तेण किणाइ [५]वण्णं॥३७९॥

'परस्से'त्यादिरूपकम्। तत्प्रसङ्गेनैव **परस्य तद्ददाति** स्वगृहे च, वस्तुभेदमाह– **तैलं वा लवणं वा घृतं गुडं वा 'उग्घाडियं तं तु'** [६] इति सप्तम्यर्थे द्वितीया उद्घाटिते तस्मिन् पुनर्दाता **करोत्यवश्यं विक्रयं तेन वा क्रीणात्यन्यदि**ति रूपकार्थः ॥३७९॥

दाण-कय-विक्कए चेव ▽[७]होंति अहिगरणमजतभावस्स।
निवडंति जे [८]य तहियं जीवा मूइंग-मूसाई॥३८०॥

दाण० गाहा। व्याख्या– **दान-क्रय-विक्रयाश्चैवं भवन्ति**। तन्निमित्तं **चाधिकरणं अयतभावस्य। निपतन्ति ये** पुनस्तत्र **जीवाः कीटिका-मूषिकादय**स्तच्चाधिकरणमिति गाथार्थः ॥३८०॥

[९]जहेव कुंभाइसु पुव्वलित्ते उब्भिज्जमाणे य हवंति काया।
उल्लिंपमाणे [१०]वि तिहा तहेव काया कवाडंमि[११] विभासियव्वा॥३८१॥

'जह चेवे'त्यादिरूपकम्। **यथा चैव कुम्भादिषु पूर्व्वलिप्तेषूद्भिद्यमानेषु च भवन्ति कायविराधनालक्षणा दोषाः, उपलिप्यमानेष्वप्येवं त्रिधा** = त्रिप्रकारा विराधना, यथा पिहितोद्भिन्ने **तथैव**

(टि०) १. ते चेव खं० जे१ विना॥ **२. ०लित्तं** जे१ को०॥ **३. ०वर** जे२॥ **४. ०करेतवस्सं** खं०॥ **५. धम्मं** जे१॥ **६. उद्घाटितं तु** जि१॥ **७. होति** जे२॥ **८. ण** जे१॥ **९. जह चेव** जे२॥ **१०. य** जे१॥ **११. ०मि य भासि०** जे२॥
(वि०टि०) ❖. दातुम् = दत्वा इत्यर्थः॥ ***. वीरगणिमते 'ते चेव'** इति पाठः॥ **▽. वीरगणिमते 'होति'** इति पाठः॥

कायविराधना **कपाट**विषया **विभाषितव्ये**ति रूपकार्थः ॥३८१॥ विशेषतः कपाटोद्भिन्नदोषानाह–

घरकोइल-संचारा आवत्तणपीढियाए[1] हेट्ठुवरिं।
णिंते ठिए य अंतो डिंभाई पेल्लणे दोसा॥ ३८२॥

घर० गाहा। व्याख्या– **गृहकोकिला[2]-सञ्चार**आदिविषया विराधना **आवर्त्तनपीठिकाया अधस्तादुपरि** च कपाटे **नीयमाने** आनीयमाने च, **स्थितेषु चान्तर्डिम्भादिषु प्रेरणे दोषाः**, सञ्चारः = कीटिकानगरः, आवर्त्तनपिठिका = [3]भूमिकेति गाथार्थः ॥ ३८२॥ अपवादमाह–

घेप्पइ अकुंचियागम्मि कवाडे पतिदिणं परिवहंते।
अजऊमुद्दियगंठी परिभुज्जइ दद्दरो जो य॥ ३८३॥ दारं॥

घेप्पइ गाहा। व्याख्या– **गृह्यते अकुञ्चिकाके कपाटे**– अविद्यमाना कुञ्चिका [4]यस्मिंस्तत्तथा तत्र गृह्यते [5]अथवाऽविद्यमानक्रेङ्कारवे कपाटे गृह्यते, **प्रतिदिनं परिवहति** सति, **अजतुमुद्रितग्रन्थिः** [6]= जतुमुद्रारहितग्रन्थिः, श्लथपाशकनिबद्ध[7] इत्यर्थः, **परिभुज्यते दर्दरो यश्च** तत्र ग्रहणं भिक्षायाः कल्पत इति गाथार्थः ॥३८३॥ उक्तमुद्भिन्नद्वारम्॥ छ॥ अधुना **मालापहृतमाह**–

मालोहडं पि दुविहं जहण्णमुक्कोसगं[8] च बोद्धव्वं।
अग्गपदेहि जहण्णं तव्विवरीयं तु उक्कोसं॥ ३८४॥

मालोहडं पि गाधा। व्याख्या– **मालापहृतमपि द्विविधं जघन्यमुत्कृष्टं च** ज्ञातव्यम्। **अग्रपद्भ्यां जघन्यं तद्विपरीतं तूत्कृष्टमि**ति गाथार्थः ॥३८४॥ जघन्यस्योदाहरणमाह–

भिक्खू जहन्नगंमी गेरुय उक्कोसगंमि दिट्ठंतो।
अहिडसण मालपडणे य एवमाई भवे दोसा॥३८५॥
मालाभिमुहिं दट्ठूण अगारिं निग्गओ तओ साहू।
तच्चन्नियआगमणं पुच्छा य अदिन्नदाण त्ति॥३८६॥
मालम्मि कुडे मोदग सुगंध अहिपविसणं करे डक्का।
अण्णदिणसाहुआगम निद्दय कहणा य संबोही॥३८७॥

भिक्खू गाहा। **मालाभिमुही** गाहा। **मालम्मि** गाहा। आसामर्थः कथानकादवसेयस्तच्चेदं–

इहेव **भारह**वासे **जयपुरे** णगरे **जक्खदिण्णो** णाम गाहावई होत्था। **वसुमती** से भारिया। अण्णया य गोयरचरियाए विहरंतो समागतो तेसिं गिहे साहू। उट्ठिया वसुमती मालोहडं भिक्खं दाउं। तो अकप्पो

(टि०) १. याइ हे० जे१,२ विना॥ **२. ०लकासञ्च०** जि१॥ **३. चूलिके०** जि० ला०॥ **४. स्मिंस्तथा** ला०॥ **५. यद्वाऽवि०** ला० विना॥ **६. ०द्रिते ग्र०** ला०॥ **७. ०बद्धे** ला०॥ **८. तु** जे१॥

(वि०टि०) ❖. परिभुज्यते = प्रतिदिनं बध्यते छाद्यते च। इति **वीर०**॥ ***. अग्रपद्भ्यां** = उपरिस्थं वस्तु गृहीतुमशक्तेन उत्पाटिताभ्यां पार्ष्णिभ्यामित्यर्थः॥

त्ति काऊण पडिसेहेऊण णिग्गओ साहू। तयणंतरं पविट्ठो तच्चण्णियो पुच्छिओ जक्खदिण्णेण–"भो कीस इमिणा भिक्खा ण गहिया ?"। तेण भणियं– "अदिण्णदाणा इमे वराया, केवलमेएसिं सत्थयारेण गलओ ण मोडिओ"। तओ असंबद्धो त्ति णाऊण किमणेण जंपाविएण दवाविया से भिक्खा। वसुमती य जाव मालट्ठियकुडगाउ हत्थं च्छोढूण मोयगे गेण्हति ताव य सुरभिगंधपविट्ठेण अहिणा करे डक्क त्ति आउलीहूउ जक्खदिण्णो जीवाविया गारुडिएणं। अण्णदिअहम्मि पुणो समागतो सो साहू भणितो जक्खदिण्णेण– "भयवं ! कीस विआणंतेणावि ण साहितो भुयंगमो; अहो ! भे णिद्दयत्तणं"। साहुणा भणितं– "ण मे णाओ भुयंगमो किंतु अम्हाण मालोहडभिक्खागहणं सपच्चवाय त्ति काऊण पडिसिद्धं, जओ एवमागमो– "**णीसेणी फलगं पीढमि (दशवै० ५/१/६७) त्यादि**"। एवं धम्मकहापुव्वयं संबोहेऊण निग्गओ साहु त्ति गाथात्रयार्थः ॥३८५-३८७॥ अत्रैव दोषान्तरापादनमाह–

आसंदि-पीढ-मंचग-जंतोदूखल पडंते[१] उभयवहो।
वोच्छेद पदोसादी उड्डाहमणाणिवादो य[२]॥३८८॥

आसंदी० गाहा। व्याख्या– **आसंदी-पीठ-मञ्चक-यन्त्रोदूखलेभ्यः पतन्त्यामुभयवधो** भवति तस्याः कायानां च, तद्द्रव्या-ऽन्यद्रव्यव्यवच्छेदः, **प्रद्वेषादयः, उड्डाहोऽज्ञानिवादश्चेति** गाथार्थः ॥३८८॥

उत्कृष्टमालापहृतस्योदाहरणमाह–

एमेव य उक्कोसे वारण निस्सेणि गुव्विणीपडणं।
गब्भित्थिकुच्छिफोडण पुरतो[३] मरणं कहण बोही॥३८९॥

एमेव गाहा। व्याख्या– **एवमेव चोत्कृष्ट**मालापहृते, दोषजालं वाच्यमिति शेषः। शेषार्थस्तु कथानकादवसेयस्तच्चेदं– साहू भिक्खट्ठा पविट्ठो। णिस्सेणिमालोहडं भिक्खं दलमाणीं अगारीं पडिसेहेऊण णिग्गमो। तयणंतरं[४] च पविट्ठो परिव्वायगो पुच्छितो गहवतिणा– "कीस ण गहिया साहुणा भिक्खा ?"। तेण[५] भणियं– "अदिण्णदाणा इमे।" ततो तस्स भिक्खाणिमित्तं णिस्सेणिमारुहंती दड त्ति पडिया गोहुमजंतोवरि, फोडिया तीए कुच्छी, फुरुफुरायमाणो य णिवडिओ से गब्भो, मया य। अण्णदिअहम्मि आगएण साहुणा पुच्छिएण तहेव संबोहेऊण पव्वाविती त्ति गाथार्थः ॥३८९॥

अथवा मालापहृतस्य त्रैविध्यं दर्शयन्नाह–

उड्ढमहे तिरियं[६] पि य अहवा मालोहडं भवे तिविहं।
उड्ढेयमहोतरणं भणियं कुंभादिसू[७] उभयं॥३९०॥

उड्ढ० गाहा। व्याख्या– **ऊर्ध्वमधस्तिर्यक्[८] चाऽथवा मालापहृतं भवेत् त्रिविधम्। ऊर्ध्व-मिदं** यन्निश्रेण्या द्विभूम्याद्यारोहणलक्षणम्, **अधः** कोष्टिकाद्यवतरणम्, **कुम्भोष्ट्रिका** तदादिषूभयमिति

(टि०) १. ०डंति खं०॥ २. वा जे२॥ ३. फुरंत खं० जे१ जे२ को०॥ ४. तयाणंतरं जि१॥ ५. ऽणेण जि०॥ ६. उभयं पि खं०॥ ७. तिर्य्यक्ष्वप्यऽथ० जि०॥ ८. कुण्डोष्ट्रिका जि०॥

गाथार्थः ॥३९०॥ इदं तु मालापहृतं न भवतीत्याह–

दद्दर-सिल-[१]सोवाणे पुव्वारुढे अणुच्चमुक्खित्ते।
मालोहडं न होती सेसं मालोहडं होइ॥३९१॥

दद्दर० गाहा। व्याख्या– निश्चला-ऽशुषिरा-ऽसंसक्तदर्दरशिलासोपानादिषु **पूर्वारूढः** साधुना-ऽनुच्चोत्क्षिप्त[२]पात्रकादौ यद्ददाति तन्**मालापहृतं न भवति शेषं** तु **मालापहृतं भवती**ति गाथार्थः॥३९१॥

उच्चोत्क्षिप्ता-ऽनुच्चोत्क्षिप्तयोः स्वरूपमाह–

तिरियायतउज्जुकतेण[३] गेण्हए जं करेण पासंतो।
एयमणुच्चुक्खित्तं उच्चुक्खित्तं भवे सेसं॥३९२॥ दारं॥

तिरियाय० गाहा। व्याख्या– **तिर्यक्** तिरश्चीनेनाऽऽयतेन = प्रसारितेन **ऋजुकृतेन यद्** वस्तु ग्राह्यं **करेण गृह्णाति पश्यन्नेतदनुच्चोत्क्षिप्तं उच्चोत्क्षिप्तं भवेच्छेषमि**ति गाथार्थः॥३९२॥

उक्तं **मालापहृत**द्वारम्। अधुनाऽऽच्छेद्यद्वारमाह–

अच्छेज्जं पि य तिविहं पभू य सामी य तेणए चेव।
अच्छेज्जं पडिकुट्ठं समणाण ण कप्पते घेत्तुं॥३९३॥

अच्छेज्जं गाधा। व्याख्या– आच्छेदनीयं = आच्छेद्यम्, आच्छिद्य यद् ददातीत्यर्थः, तदुपाधिभेदात् **त्रिविधं**, तद्यथा– **प्रभु-स्वामि-स्तेन**विषयम्। तत्र प्रभुः गृहादेः, स्वामी ग्रामादीनाम्, स्तेनः प्रतीतः, तद् एतदाच्छेद्यं त्रिविधमपि **प्रतिषिद्धं श्रमणानां न कल्पते** ग्रहीतुमिति गाथार्थः॥३९३॥

तत्र प्रभुविषयमाच्छेद्यस्वरूपमाह–

गोवालए य भयएऽखरए पुत्ते य धूय सुण्हा य।
अचियत्त-संखडाई केइ पओसं जहा गोवो॥३९४॥[४]

गोवाल० गाहा। व्याख्या– **गोपालक-भृतक-दास-पुत्र-दुहितृ-स्नुषाः** प्रसिद्धार्था एतेभ्यः प्रभुराछिद्य साधवे ददाति। अत्र दोषमाह– **अप्रीत्यसङ्खड**-प्रद्वेषादयो दोषाः, **प्रद्वेषे गोपालो**दाहरणमिति गाथार्थः॥३९४॥ तदाह–

गोवपओ अच्छेत्तुं दिण्णं तु जइस्स भतिदिणे पहुणा।
पयभाणूणं दट्ठुं खिंसति भोगी रुवे चेडा॥३९५॥

गोव० गाहा। व्याख्या– **गोपदुग्धमाच्छिद्य दत्तं तु यतये भृतिदिने प्रभुणा। पयोभाजनं न्यूनं**

(टि०) १. **सोमाणे** जे२ विना॥ २. **०क्षिप्ता पा०** जि० जि१॥ ३. **गेण्हंते** जे१ को०॥ ४. **जे१** तथा **को०** प्रतौ अस्या अनन्तरं अधिका गाथा उपलभ्यते सा चेयम् - "**होइ पभू घरभाणे सामी पुण गामसामिओ भणिओ। तेण य पसिद्ध गोच्चिय एयच्छिण्णं ण गेण्हेज्जा॥**

(वि०टि०) ✱. **वीरगणि**मतेन '**०गतेण**' इति पाठः स्यात्। तथा च तट्टीका- **तिर्यक्**– तिरश्चीनः **आयतः**– प्रसारितः **ऋजुः**– अवक्रो यो बाहुस्तत्र **गतः**–स्थितस्तेन... इति **वीर०**॥ ❖. **असङ्खडः** = कलह इत्यर्थः॥

दृष्ट्वा खिंसति स्वपति[१] **भोईपत्नी**[२◆] **रुदन्ति** च **चेट**रूपाणीति गाथार्थः ॥३९५॥

पडिचरणपओसेणं भावं णाउं जइस्स आलावो।
तन्निब्बंधा गहियं हंदि स मुक्को सि मा बितियं॥३९६॥

पडियरण० गाहा। व्याख्या– यद् गोपसत्कं प्रभुणाऽऽच्छिद्य पयो दत्तं साधवे स गोपो गृहिण्या अतीव रटितः सन् सञ्जातप्रद्वेषः साधुप्रतिचरणं गवेषणं कुर्व्वन् साधुना ददृशे। तद्**भावं** च **ज्ञात्वा** तत्परितोषणार्थमेवं **आलापं** चक्रे– "प्रभु**निर्ब्बन्धान्मया गृहीतम्**, तवाऽर्पणाय चोद्यतोऽहं, न च भवद्गृहं जानामीति गृहाणेदम्"। ततो गोपेन सञ्जातोपशमेनोक्तं– "तवैव तिष्ठतु चिरं च त्वया जीवितव्यमिति **मुक्तोऽसि; द्वितीयमेवं मा** कार्षीः" इति गाथार्थः ॥३९६॥ दोषान्तरापादनार्थमाह–

णाणिव्विट्ठं लब्भइ दासी वि ण भुज्जए रिते भत्ता।
दोण्हेगयरपओसे जं काहिति अंतरायं च॥३९७॥

णाणिव्विट्ठं गाहा। व्याख्या– प्रभवे[३] रुष्टो गोप एवमाह– '**णाणिव्विट्ठं लब्भइ**'त्ति नानुपार्जितं लभ्यते, यतो **दास्यपि न भुज्यते ऋते भक्तान्**, भरणपोषणं विनेति भावः। **द्वयो**र्दातुर्ग्रहीतुश्चोपरि **प्रद्वेषं** कुर्यादन्यतरस्य वा प्रद्वेषे सति **यत् कुर्याद**सङ्खडादि कुटुम्बादेरन्तरायं **चे**ति गाथार्थः ॥३९७॥

उक्तं प्रभुविषयमाच्छेद्यद्वारम्। अधुना स्वामिविषयमाच्छेद्यमुच्यते–

सामी चारभडा वा संजय दट्ठूण तेसि अट्ठाए।
कलुणाणं अच्छेज्जं साहूण न कप्पए घेत्तुं॥३९८॥

सामी गाहा। व्याख्या– **स्वामी** ग्रामादीनां, **चारभटा** राजवल्लभाः, ते **संयतान् दृष्ट्वा तदर्थं** दरिद्र्य(?द्र)कुटुम्बिभ्य **आच्छिद्य** साधुभ्यः प्रयच्छन्ति, तच्च **न कल्पते ग्रहीतुं साधूनामि**ति गाथार्थः ॥३९८॥ किं तदाच्छिद्य ददाति[४] ? इत्याह–

आहारोवहिमाई जइअट्ठाए उ कोइ अच्छिंदे।
संखडि असंखडीए व तं गिण्हंते इमे दोसा॥३९९॥

आहार० गाधा। व्याख्या– **आहारोपध्यादि यत्यर्थं कश्चिदाच्छिद्य** दद्यात् कलहेनाऽकलहेन वेति। तदेवंविधं **गृह्णतोऽमी दोषा** इति गाथार्थः ॥३९९॥

अचियत्तमंतरायं तेणाहड एगऽणेगवोच्छेओ।
णिच्छुभणाई दोसा[५] **वियालऽलंभे य जं पावे॥४००॥ दारं॥**

अचियत्त० गाधा। व्याख्या– **अचियत्तं** = अप्रीतिः, **अन्तरायं** च कुटुम्बिनां स्यात्; **स्तेनाहृतं**

(टि०) १. सपति भोयप० ला०॥ **२. गोपपत्नी** जि१॥ **३. प्रभो रु०** ला० जि१॥ **४. ददती०** जि१ ॥ **५. ०सा तस्स अलंभे** जे४ भां०॥

(वि०टि०) ◆. भोईपत्नी = भृतकभार्या इत्यर्थः॥

अदत्तादानं च तद् भवति, **एकानेकद्रव्यव्यवच्छेदश्च, 'णिच्छुभण'**त्ति निष्कालनादयो दोषाः साधो-**र्विकाल**वसत्यलाभे च ये दोषास्ते च स्युरिति गाथार्थः ॥४००॥

उक्तं स्वाम्याच्छेद्यद्वारम्। इदानीं स्तेनकाच्छेद्यमाह–

तेणा व संजयट्ठा कलुणाणं अप्पणो व अट्ठाए।
वोच्छेद पदोसं वा ण कप्पए [१]कप्पऽणुण्णायं॥४०१॥

तेणा व गाधा। व्याख्या– **स्तेनका वा संयतार्थ**मात्मार्थं वा दरिद्रसार्थिकेभ्यः आच्छिद्य पाथेयादि साधुभ्यो दद्युः। एतच्च **न कल्पते,** यतोऽमी दोषाः– सार्थिकास्तद्द्रव्यान्यद्रव्य**व्यवच्छेद**-द्वेषादि कुर्युः। सार्थिकाऽ**नुज्ञातं** तु **कल्पते** इति गाथार्थः ॥४०१॥

संजयभट्ठा तेणा [२]आयंती वा असंथरे जतिणं।
जति देंति ण घेत्तव्वं णिच्छुभ वोच्छेद मा होज्जा [३] ॥४०२॥

एतदेवाह–

घयसत्तुयदिट्ठंतो समणुण्णाता व घेत्तुणं पच्छा।
देंति तगं तेसिं चिय समणुण्णाता व भुंजंति॥४०३॥ दारं॥

घयसत्तुय० गाहा। व्याख्या– **घृत-सक्तुदृष्टान्तेन** सार्थिकैः **समनुज्ञाताः** साधवो **गृहीत्वा [४]पश्चाद्** गतेषु चोरेषु तत् तेभ्यः सार्थिकेभ्यः प्रयच्छन्ति **समनुज्ञाता वा भुञ्जत** इति गाथार्थः ॥४०३॥

उक्तमा**च्छेद्य**द्वारम्। इदानी**मनिसृष्ट**द्वारमाह–

अणिसिट्ठं पडिकुट्ठं अणुण्णायं कप्पए सुविहियाणं।
लड्डुग[५]-जंते(त)-चोल्लग◆-संखडि-खीरावणादीसु॥४०४॥

अणिसट्ठं गाहा। व्याख्या– **निसृष्टम्** = दत्तमनुज्ञातं वा तद्विपरीत**मनिसृष्टं = प्रतिकृष्टम्,** प्रतिषिद्ध-मित्यर्थः, **अनुज्ञातं** तु **कल्पते सुविहितानाम्**। तच्च त्रिधा, तद्यथा– साधारणानिसृष्टं चोल्लकानिसृष्टं यन्त्रानिसृष्टं च। तत्र साधारणानिसृष्टमाह– **लड्डुक-यन्त्र-चोल्लक-सङ्खडी-क्षीरा-ऽऽपणादि**विषयं तद् भवतीति। तत्र यन्त्रं द्विधा– इक्षुयन्त्रं तिलयन्त्रं च, आपणं वीथिरिति गाथार्थः ॥४०४॥

साधारणानिसृष्टोदाहरणमाह–

बत्तीसा सामण्णे [६]ते कहिं ? ण्हाउं गय त्ति इति वुत्तो।
परसंतिएण पुण्णं न तरसि काउं ति पच्चाह॥४०५॥

(टि०) १. **कप्पए अणुण्णा०** खं०॥ २. **अति अन्ती** खं०॥ ३. अस्या गाथाया व्याख्या लघुवृत्त्यादर्शेषु नोपलभ्यते। अस्या गाथाया अनन्तरं एका अधिका गाथा मूलादर्शेषु उपलभ्यते सा चेयम्- **तेणगभएण घेत्तुं समणुन्नाया गिहीहिं वा पच्छा। दिंति तयं तेसिं चिय समणुण्णातो व भुंजंति॥** ४. **पश्चाद्गतेभ्यश्चोरेभ्यस्तत्** जि१ ला०॥ ५. **०गचोल्लगजंते** जे१ जे२ को० विना॥ ६. **ते वि य ण्हा०** खं० जे१॥

(वि०टि०) ◆. वीरगणि-मलयगिरिसूरिमतेन **'चोल्लग-जंते'** इति पाठः। ✱. **चोल्लक = भोजन** इति ला० टि०॥

अवि य हु बत्तीसाए दिण्णेहिं [१]तवेगमोयगो न भवे।
अप्पवयं बहुआयं जदि जाणसि देहि तो मज्झं॥४०६॥
लाभिय णिंतो पुट्ठो किं लद्धं नत्थि पेच्छिमो दाए।
इयरो वि आह णाहं देमि त्ति सहोढ चोरत्तं॥४०७॥
गेण्हण कड्ढण ववहार पच्छकड्डुड्डाह तह य निव्विसए[२]।
अपभुंमि भवे दोसा पभुम्मि दिण्णे ततो गहणं॥४०८॥

बत्तीस गाहा। **अवि य हु** गाहा। **लाभिय** गाहा। **गेण्हण** गाहा। आसामर्थः कथानकादवसेयस्तच्चेदम्– **खिइपइट्ठिए** नगरे **माणिभद्दपमुह**बत्तीसजुवाणएहिं कयं गोट्ठिभत्तं, ते य तत्थेगं रक्खवालं [३]ठावेऊण गया ण्हाणणिमित्तं। एत्थंतरम्मि भिक्खट्ठा समागओ साहू अइच्छाविओ ❖ य तेण। तओ साहुणा भणियं – "परसंतिएण पुण्णं ण तरसि काउं ति पच्चाह। किं च– बत्तीसाए मोयगेहिं दिण्णेहिं तव एगो चेव परिचत्तो हवति तासामण्णदव्वेण अप्पवएणं बहुपुण्णहेउणा कुणसु मोयगदाणेण धम्मं।" तओ इमं सोऊण भरियं से भायणं मोयगाणं पडिलाहिउ णियत्तंतो पुच्छिओ सम्मुहावडियमाणिभद्दाईहिं– "भयवं ! किं ते लद्धं ?"। तेण वि संलत्तं– "ण किंचि।" तओ बला [४]पुलोइयं तेहिं, दिट्ठं मोयगभरियं से भायणं। पुच्छिओ णेहिं रक्खवालो, तेण वि संलत्तं– "णाहं देमि"। तओ सलोत्तचोरो त्ति भणंतेहिं गहिओ साहू, आयड्ढिऊण पच्छाकडो, णीओ ववहारत्थाणं। पुच्छिउ य कारणिएहिं, जहट्ठियं साहियं सव्वं, तेहिं मंतियं "समुज्जुओ एस साहु" त्ति। भणिओ य– "मा पुणो एवं काहिसि णिव्विसएण गंतव्वं"ति। मुक्को।

अप्रभुसकाशात् ग्रहणे सति एवं आत्मविराधनादयो दोषा सम्भवन्ति, अतः प्रभुणा दत्तं ग्राह्यमिति गाथाचतुष्टयार्थः॥४०५-४०८॥ अस्यैव शेषभेदातिदेशमाह–

एमेव य [५]जंतम्मि वि संखडि खीरे य आवणाईसु।
सामण्णं पडिकुट्ठं कप्पइ घेत्तुं अणुण्णायं॥४०९॥

एमेव गाहा। व्याख्या– **एवमेव** यथा लड्डुकविषयं तथा **यन्त्र**-चोल्लक-**सङ्खडी**-**क्षीरा**-**ऽऽपणादि**विषयं द्रष्टव्यम्। **सामान्यानिसृष्टं प्रतिषिद्धं अनुज्ञातं** तु **कल्पते ग्रहीतुमिति** गाथार्थः॥४०९॥

[६]चोल्ल त्ति दारमहुणा बहुवत्तव्वं ति तं कयं पच्छा।
वण्णेइ गुरू सो पुण सामियहत्थीण विण्णेओ॥४१०॥

साधारणानिसृष्टमुक्तम्। चोल्लकानिसृष्टमाह–

(टि०) १. तमेग० जे१ को०॥ **२. ०सओ** जे१॥ **३. करेऊण** जि०॥ **४. पुलोयंतेहिं** ला०॥ **५. जंत चोल्लग संख०** जे२॥ **६.** इयं गाथा लघुवृत्त्यादर्शेषु न दृश्यते॥

(वि०टि०) ❖. अइच्छाविओ = अदित्सापित इत्यर्थः॥

छिण्णमछिण्णो[१] दुविहो[२] होइ अच्छिण्णो[३] णिसट्ठमणिसट्ठो[४]।
छिण्णंमि चोल्लगंमी कप्पइ घेत्तुं णिसट्ठे[५] य॥४११॥

छिण्णमछिण्णं गाहा। व्याख्या– स चोल्लको **द्विविधः छिन्नाऽछिन्न**भेदात्, नियतपरिमाणः छिन्नस्तद्विपरीतस्त्वछिन्नः। तत्र योऽसावच्छिन्नः स द्विधा **निसृष्टोऽनिसृष्टश्च**। तत्र **छिन्नचोल्लक**विषयं **कल्पते ग्रहीतुम**छिन्ने पुन**र्निसृष्टे** कल्पत इति गाथार्थः॥४११॥ अमुमेवार्थं किञ्चिद् विशेषेणाह–

छिण्णो दिट्ठमदिट्ठो जो य णिसट्ठो[६] स छिण्णऽछिण्णो[७] वा।
सो कप्पइ इयरो उ ण[८] अदिट्ठसिट्ठे बहुविणासो॥४१२॥

छिण्णो गाहा। व्याख्या– **छिन्नो दृष्टश्चादृष्टश्च**[◆] कल्पते **यश्च निसृष्टः सछिन्नोऽछिन्नो वा** कल्पते, **इतरस्तु** योऽछिन्नो यश्चानिसृष्टः **स न** कल्पते, किं निमित्तं ? यतोऽदृष्टे गृहीते पश्चात् **कथिते विनाशा**दिबहुविधदोषसम्भवादिति गाथार्थः॥४१२॥ अपवादमाह–

अणिसट्ठमणुण्णायं कप्पइ घेत्तुं तहेव अदिट्ठं।
जड्डस्स वाऽणिसट्ठं ण कप्पई कप्पइ अदिट्ठं॥४१३॥

अणिसट्ठ० गाहा। व्याख्या– **अनिसृष्टं** यदि इयन्तैरनुज्ञातं **कल्पते ग्रहीतुं तथैवादृष्टं** यत्र कथनसम्भवो न स्यात्, चोल्लकानिसृष्टमुक्तम्। जड्डानिसृष्टं तु गाथापश्चार्द्धेनाह– **जड्डो** = हस्ती, तस्य (अ)निसृष्टं **न कल्पते**, मे[*]ण्ठनिसृष्टं तु जड्डेनाऽदृष्टं **कल्पत** इति गाथार्थः॥४१३॥ अत्र दोषानाह–

णिवपिंडो गयभत्तं गहणादी अंतराइयमदिण्णं।
डुंबस्स[९] संतिए वि हु अभिक्ख वसहीए फेडणया॥४१४॥दारं॥

णिव० गाहा। व्याख्या– **नृपपिण्डो, गजभक्तं,** हस्तिग्रहणादि, **अन्तरायिकमदत्तादानं** चेति। **डोम्बः** = मेण्ठस्तदीयेऽपि गृहीते गजेन दृष्टे अभीक्ष्णं वसत्यपनयनादयो दोषा इति गाथार्थः॥४१४॥

उक्त**मनिसृष्ट**द्वारम्। अधुनाऽध्यवपूरकद्वारमाह–

अज्झोयरओ तिविहो जावंतिय सघरमीसपासंडे।
मूलंमि य पुव्वकते ओतरई तिण्ह अट्ठाए॥४१५॥

अज्झोयरओ गाहा। व्याख्या– **अध्यवपूरकः** स्वार्थमूलाद्रहणप्रक्षेपलक्षण**स्त्रिविधः – यावदन्तिकाध्यवपूरकः, स्वगृहमिश्राध्यवपूरकः**, साधुविषय इति भावः, **पाखण्डाध्यवपूरकश्च। मूले** आद्रहणादिलक्षणे **पूर्व्वकृते 'ओइ(?य)रइ'**त्ति तन्दुलादि प्रक्षिपति **त्रयाणामर्थाये**ति गाथार्थः॥४१५॥

(टि०) १. ०ण्णं जे१ विना॥ **२. ०विहं** खं० जे२॥ **३. ०च्छिण्णं** जे२॥ **४. ०सट्ठं** जे२॥ **५. ०सट्ठो वि** जे१॥ **६. अछिण्ण छिण्णो** जे२ जे४ भां० ॥ **७. य** जे१ को० विना॥ **८. अदिट्ठदिट्ठोवणुण्णाओ** जे१,२ को०॥ **९. संतिओ** जे४ भां० विना॥
(वि०टि०) ◆. कौटुम्बिकेन दृष्टश्चादृष्टश्च इति भावः॥ ***.** मिण्ठेन स्वलभ्यं भक्तं दीयमानं गजेनादृष्टं कल्पते इति भावः॥

ननु अवध्यवपूरक-मिश्रजातयोः कः प्रतिविशेष इत्याह–

तंदुल-जल-आदाणे पुप्फ-फले साग-वेसणे लोणे।
परिमाणे णाणत्तं अज्झोयर-मीसजाए[१] य॥४१६॥

तंदुल० गाहा। व्याख्या– **तन्दुल-जलादान-पुष्प-फल-शाक-वेषण-लवणा**दीन्येतानि अध्यवपूरके प्रक्षिपति पश्चात्, मिश्रजाते त्वादित एव साध्वर्थं तन्दुलादि मिश्रयति; एवं **परिमाण**विषयं **नानात्वमध्यपूरकमिश्रजातयो**र्नवरं वेषणं = कटुरुंडादीति गाथार्थः॥४१६॥ अत्र कल्प्याकल्प्यमाह–

जावंतिए विसोही सघरपासंडमीसए[२] पूई।
छिण्णे विसोहि दिण्णम्मि कप्पइ ण कप्पई सेसं॥४१७॥

जावंति० गाहा। व्याख्या– **यावदन्तिको**ऽध्यवपूरको **विशुद्ध**कोटिः, **स्वगृहपाखण्डमिश्रकः पूति, 'छिण्णे'**त्ति स्थाल्या गृहस्थेनोद्धृते **'विसोहि'**त्ति यावदन्तिकाध्यवपूरके **दत्ते** वा तस्मिन् **कल्पते शेषमिति** पाखण्ड-साधुमिश्राध्यवपूरकयोः उद्धृत-दत्तयोरपि **न कल्पत** इति गाथार्थः॥४१७॥

अमुमेवार्थं दर्शयन्नाह–

छिन्नंमि ततो उक्कड्ढियंमि कप्पइ पिहीकए सेसं।
आभावणाए[३] दिण्णं व एत्तियं कप्पए सेसं॥४१८॥

छिण्णम्मि गाहा। व्याख्या– यावदन्तिके **'छिण्णम्मि'** त्ति कोऽर्थः ? **ततः** स्थालीत उद्धृत्य **पृथक्कृते शेषं कल्पते आभावनया** = परिकल्पनया **दत्तं वैतावदिति शेषं कल्पत** इति गाथार्थः॥४१८॥

उक्तमध्यवपूरकद्वारम्। तदभिधानाच्च षोडशाप्युक्ता उद्गमदोषाः। साम्प्रतमेषामेव विषयविभागोपदर्शनार्थमाह–

एसो सोलसभेदो वि दुहा कीरइ उग्गमो।
एगा विसोहिकोडी[४] अविसोही तु चावरा॥४१९॥

एसो सिलोगो। **एष षोडशभेदोऽप्युद्गमो द्विधा** भवति, कथम् ? इत्याह– विशुद्धकोट्यविशुद्धकोटीभेदाभ्याम्। सङ्कोट्यन्ते बहवो दोषाः[५] सहिता मीलिता एकत्र यस्यां सा कोटी, सा च हनन-घातना-ऽनुमोदन-पचन-पाचना-ऽनुमोदन-क्रयण-क्रापणा-ऽनुमोदनभेदान्नवविधेति। पुनरेषैवोद्गमकोटी विशुद्ध्यविशुद्धिभेदाद् द्विधा, तत्रोद्गमकोटी षड्विधा विशुद्धकोटी त्वनेकविधेति श्लोकार्थः॥४१९॥

तत्रोद्गमकोटीषट्विधत्वप्रतिपादनायाह–

आहाकम्मुद्देसिगचरिमतिगं पूइ मीसजाते य।
बादरपाहुडिया या अज्झोयरए य चरिमदुगं[६] ॥४२०॥

(टि०) १. ०सजायाणं खं० जे२॥ **२. ०घरे पा०** खं०॥ **३. ०वगोए** जे२॥ **४. ०डीओ अ०** जे१॥ **५. संहिता** जि० जि१॥ **६. ०दुगो** खं०। **दुगे** जे२॥

(वि०टि०) ◆. उद्गमकोटी = अविशोधिकोटी इत्यर्थः॥

आहाकम्मुद्देसिय गाहा। व्याख्या– **आधाकर्म्म, औद्देशिकचरमत्रितयं, पूति** तथा **मिश्रजातं, बादरप्राभृतिका अध्यवपूरकचरमद्वयं** चेति गाथार्थः ॥४२०॥

उग्गमकोडी अवयव लेवालेवे य अकयए कप्पे।
कंजिय-आयामग[१]-चाउलोद संसट्ठ पूई तु॥४२१॥

उग्गमकोडी गाहा। व्याख्या– **उद्गमकोट्या अवयवेना**ऽपि यत् संसृष्टं तत् शुद्धमप्यशनादि पूति भवति। '**लेवालेवे य अकयए कप्पे**'त्ति यस्मिन् भाजने लेपा-ऽलेपद्रव्यमुद्गमकोटीसत्कं गृहीतं तद् भाजनमकृतकल्पं न शुद्ध्यति, अकृतकल्पे च शुद्धमपि गृहीतं पूतिर्भवति, **काञ्जिका-ऽऽचाम्ल-तन्दुलोदकसंसृष्टं पूतिर्भ**वतीति गाथार्थः ॥४२१॥ व्याख्यातगाथाप्रथमपादार्थमाह–

सुक्केण वि जं छिक्कं तु असु[२]इणा धोवए जहा लोए।
इय सुक्केण वि छिक्कं धोव्वए कम्मेण भाणं तु॥४२२॥

सुक्केण वि गाहा। व्याख्या– **शुष्केनाऽप्यशुचिना यत् स्पृष्टं** तद् **धाव्यते यथा लोके** इति **शुष्केनाऽपि स्पृष्टं धाव्यते** '**कम्मेणे**'ति आधाकर्म्मणा **भाजन**मिति गाथार्थः ॥४२२॥ द्वितीयपादार्थमाह–

लेवालेवे त्ति जं वुत्तं जं पि दव्वमलेवडं।
तं पि [३]घेत्तूण कप्पंति तक्कादी किमु [४]लेवडं॥४२३॥

लेवालेवे त्ति सिलोगो। **लेपा-ऽलेप इति यदुक्तं** मूलगाथायां [५]तदेव सूचयति– **यदपि द्रव्यमलेपकृतं** वल्ल-चनकादि **तदपि गृहीत्वा** भाजनं **कल्पयन्ति, तक्रादि किमु लेपकृतं** गृहीत्वा सुतरां कल्पयन्तीति श्लोकार्थः ॥४२३॥ तृतीयपादे काञ्जिकादिग्रहणे चोद्यपरिहारप्रदर्शनार्थमाह–

आधाय जं कीरइ तं तु कम्मं वज्जेहिती ओदणमेगमेव।
सोवीर-आयामग-चाउ[६]लोद कम्मं ति तो तग्गहणं करेंति॥४२४॥

आधाय रूपकम्। **आधाय यत् क्रियते तदेवाधाकर्म्मे**ति एवंविधया शङ्कया मा **वर्जयिष्यन्ति ओदनमेकमेवे**त्यतः **सौविरा-ऽऽचाम्ल-तन्दुलोदकाद्यपि** आधा**कर्म्मे**ति ज्ञापनार्थं सौवीरादिग्रहणं **कुर्व्वन्त्याचार्या** इति रूपकार्थः ॥४२४॥ उक्तोद्गमकोटी। विशुद्धकोटीमाह–

सेसा विसोहिकोडी भत्तं पाणं विगिंच जहसत्ती।
अणलक्खियमीसद[७]व्वे सव्वविवे[८]गोऽवयवे सुद्धो॥४२५॥

सेसा रूपकम्। अविशुद्धकोट्या अन्या सा **विशुद्धकोटी** क्रयण-क्रापणा-ऽनुमोदनरूपा अथवा अनेकप्रकारा यत उक्तम्–

(टि०) १. ०यामो चा० खं०॥ २. ०सुइएण खं०॥ ३. घेत्तुं ण जे१ को०॥ ४. ०वडे खं०॥ ५. तदेतत् सू० जि० जि१॥ ६. ०लोदगं खं० विना। ०लोया जे४ भां०॥ ७. दवे खं० विना॥ ८. ०गो य अवय० जे१॥

उद्देसियम्मि णवगं उवकरणे जं च पूतियं होती।
जावंतियमीसगयं अज्झोयरए य पढमपयं॥१॥
परियट्टिए अभिहडे उब्भिण्णे मालोहडे इय।
अच्छेज्जे अणिसट्ठे पाओयर कीय पामिच्चे॥२॥
सुहुमा पाहुडिया वि य ठवियगपिंडो य जो भवे दुविहो।
सव्वो वि एस रासी विसोहिकोडी मुणेयव्वो॥३॥ [ ]

विशुद्धकोटीदोषयुक्तं **भक्तपानं 'विगिंचिए'** त्ति समुद्धरेत् पतद्ग्रहादेर्**यथाशक्त्या, अलक्षितं**[१] **यन्मिश्रं द्रवद्रव्यं** तस्य **सर्वस्यैव विवेकः** कार्यो, यद्यप्यवयवाः पात्रे सन्ति तथाऽपि **शुद्धो** भवतीति रूपकस्य भावार्थः॥४२५॥ शुद्धे विशुद्धकोटीसम्बन्ध्यशनादि पतितं कथमुद्धर्त्तव्यम् ? इत्याह–

दव्वाई[२] उ विवेगो दव्वे जं दव्व जं जहिं खेत्ते।
काले अकालहीणं असढो जं पस्सई भावे॥४२६॥

दव्वाई उ गाहा। व्याख्या– **द्रव्यादि**विषयो **विवेकः**, कथम् ? **द्रव्ये यद् द्रव्यं** निपतितं तद् उद्धर्त्तव्यम्, **क्षेत्रे यद् यत्र** पतद्ग्रह[३]प्रदेशे पतितं तत् तस्मादुद्धर्त्तव्यम्, **काले** अ*कालहीनम्, **भावे त्वशठोऽरक्तद्विष्टो यत् पश्यति** तदुद्धरतीति गाथार्थः॥४२६॥

संस्तरणे विशुद्धकोट्यशनादि सर्व्वं त्याज्यमसंस्तरणे चतुर्भङ्गिकामाह–

सुक्कोल्ल[४]सरिसपाए असरिसपाए य एत्थ चउभंगो।
तुल्ले तुल्लणिवाए[५] एत्थ दुवे दोण्णि[६] वाऽतुल्ला तु॥४२७॥

सुक्कोल्ल० गाहा। व्याख्या– **शुष्कार्द्रसदृशपाते असदृशपाते च** भवति **चतुर्भङ्गिका**। **'तुल्ले तुल्लणिवाये'**त्ति तुल्ये तुल्यनिपात इत्यत्र भङ्गद्वयाभिधानं शुष्के शुष्कम् (१) आर्द्रे आर्द्रम् (४) एवंरूपौ प्रथम-चतुर्थौ, **'दोण्णि वाऽतुल्ल'** त्ति इत्यनेन द्वितीय-तृतीयभङ्गौ सूचितौ शुष्के आर्द्रम् (२) आर्द्रे शुष्कम् (३) इत्येवंरूपाविति गाथार्थः॥४२७॥ समुद्धरणविधिमाह–

सुक्के सुक्कं पडियं विगिंचिउं होइ तं सुहं पढमो।
बीयम्मि दवं छोढुं गालेंति[७] दवं करं दाउं[८]॥४२८॥
तइयंमि करं छोढुं उल्लिंचइ ओदणादि जं तरइ।
▽दुल्लभदव्वं[९] चरिमे तत्तियमेत्तं विगिंचंति॥४२९॥

(टि०) १. यस्मिन् मिश्रं ०जि१॥ **२. ०व्वादीसु वि०** खं०॥ **३. ०ग्रहविशेषे** जि१॥ **४. ०ल्ले सरि०** जे१ को०॥ **५. तत्थ** खं० विना॥ **६. ०ण्णि तुल्ला तु** खं० जे१। **ण्णि वाऽतुल्ले** जे२॥ **७. गोलें०** खं०॥ **८. काउं** जे१॥ **९. ०भदवंमि** खं०॥
(वि०टि०) ◆. पढमपयं = जावंतिय इति ला० टि०॥ ***. अकालहीनं** = परित्यजने कालस्य विलम्बो न कर्त्तव्यः॥
▽. वीराचार्यमते दुल्लभदव्वंमि इति पाठः स्याद् इति अस्माकं आभाति॥

सुक्के सुक्कं गाहा। **तइयम्मि** गाहा। व्याख्या– **शुष्के शुष्कं पतितं विवेक्तुं[१] भवति तत् सुखमिति प्रथमः, द्वितीयभङ्गे** शुष्के आर्द्रं पतितमित्यस्मिन् शुद्धद्रवं **प्रक्षिप्य गालयन्ति** पूर्व्वद्रवं **करं दत्त्वेति, तृतीयभङ्गे** आर्द्रे शुष्कमित्यस्मिन् **करं प्रक्षिप्य 'उल्लिंचइ'**त्युद्धरति **ओदनादि यच्छक्नोति, चरिमे** तुरीयभङ्गे आर्द्रे आर्द्रमित्यत्र सर्वविवेको **दुर्लभद्रव्ये** पुनस्तन्मात्रमेवाकल्प्यं **समुद्धरन्ती**ति गाथा-द्वयार्थः ॥४२८-४२९॥ उक्तमेवार्थमाह–

संथरे सव्वमुज्झंति चउभंगो असंथरे।
असढो सुज्झते जेसु मायावी तेसु लग्गती[२]॥४३०॥

संथरे सिलोगो। **संस्तरणे** पर्य्याप्तौ सत्यां **सर्व्वमुज्झन्ति; चतुर्भङ्गिका त्वसंस्तरणे** भवति। **अशठः शुध्यति येषु** पदेषु **मायावी तेषु लगति** = कर्म्मसंश्लेषं यातीति श्लोकार्थः ॥४३०॥

कोडीकरणं दुविहं उग्गमकोडी विसोहीकोडी य।
उग्गमकोडी छक्कं विसोहिकोडी अणेगविहा॥४३१॥
नव चेवऽट्ठारसगं सत्तावीसा तहेव चउप्पन्ना।
नउई दो चेव सया उ सत्तरा होंति कोडीणं[३] ॥४३२॥

उक्तं गवेषणैषणायामुद्गमद्वारम्। उत्पादनाद्वारमाह–

सोलस उग्गमदोसे गिहिणो उ समुट्ठिते वियाणाहि।
उप्पायणाय दोसे[४] साधूतो समुट्ठिए[५] जाण॥४३३॥

सोलस गाहा। व्याख्या– **षोडशोद्गमदोषान्** पूर्व्वोक्तान् **गृहस्थात् समुत्थितान् विजानीहि; उत्पादनायाः** पुनः **दोषान् साधुसमुत्थितानेव जानीही**ति गाथार्थः ॥४३३॥

उत्पादनानिक्षेपप्रदर्शनार्थमाह–

णामं-ठवणा-दविए भावे उप्पायणा मुणेयव्वा।
दव्वम्मि होइ तिविहा भावम्मि य सोलसपया तु॥४३४॥

णामं-ठवणा गाहा। व्याख्या– **नाम-स्थापना-द्रव्य-भाव**विषया **उत्पादना मन्तव्या**। नाम-स्थापने क्षुण्णत्वादनादृत्य द्रव्योत्पादनामाह– **द्रव्ये** द्रव्यविषया **भवति त्रिविधा** सचित्ता-ऽचित्त-मिश्रभेदाद्, **भावे** भावविषया **षोडशपदानी**ति गाथार्थः ॥४३४॥ तत्र सचित्ता द्विपद-चतुष्पदा-ऽपदरूपा तामाह–

आसूयमादिएहिं वालचिय-तुरंग-बीयमादीहिं।
सुय-आस-दुमादीणं उप्पायणया तु सच्चित्ता॥४३५॥

आसूय० गाहा। व्याख्या– **आसूयं** = उपयाचितकं ऋतुकालो वा **आदि**ग्रहणाद् वेतनोद-

(टि०) १. **विवेको भवति सु०** ला०॥ २. **बज्झइ** जे२। **०ग्गती उग्गमदोसा** जे१ को०॥ ३. इमे द्वे गाथे मूलादर्शेषु तथा प्रस्तुतवृत्तौ नोपलभ्येते अपि तु **वीरगणि-मलयगिरि**वृत्तौ व्याख्याते॥ ४. **०से आयसमुत्थे अओ वोच्छं** जे१ को०॥ ५. **वोच्छं** खं०॥

कादिग्रहणं तत्रैवं सम्बन्धः— उपयाचितकादिना निमित्तेन **वालिकेन** पुरुषेण करणेन **सुतस्योत्पादः**, तथा वेतनादिना निमित्तेन **तुरङ्गेन** करणभूतेनाश्वस्योत्पादः, एवमुदकादिना निमित्तेन **बीजेन** करणेन **द्रुमादेरुत्पाद** इत्येवं **सचित्तोत्पादना** त्रिप्रकारेति गाथार्थः ॥४३५॥

अचित्तद्रव्य-मिश्रद्रव्योत्पादनाद्वयप्रतिपादनार्थमाह—

कणग-रयतादियाणं जहेट्ठ धाउ[१] विहिया तु अच्चित्ता।
मीसा उ सभंडाणं[२] दुपयादि कया उ उप्पत्ती॥४३६॥

कणग० गाहा। व्याख्या— **कनक-रजतादीनां यथेष्टधातूनां योनिप्राभृता**दिना या क्रियते समुत्पादना सा **अचित्तद्रव्योत्पादना; सभण्डो**पकरणानां **द्विपदा**दीनां या विधीयते समुत्पादना सा **मिश्रेति** सम्बन्ध इति गाथार्थः ॥४३६॥ उक्ता द्रव्योत्पादना। अधुना भावोत्पादनामाह—

भावे पसत्थ इतरा कोहादुप्पायणा तु अपसत्था।
कोहादिजुया धातादिणं[३] च णाणादि तु पसत्था॥४३७॥

भावे गाधा। व्याख्या— **भावे** भावविषयोत्पादना द्विविधा, तद्यथा— **प्रशस्तेतरा** च। तत्र **क्रोधाद्युत्पादना त्वप्राशस्ता,** तथा **क्रोधादियुता धात्र्यादीनां** चोत्पादना, एतदुक्तं भवति यत्— क्रोधमानादियुक्तः साधुरात्मनि धात्र्यादिभावमुत्पादयति साऽप्यप्रशस्तभावोत्पादनेति, **ज्ञानादि**भावोत्पादना तु **प्रशस्तेति** गाथार्थः ॥४३७॥

अप्रशस्तभावोत्पादनया चात्राधिकारः, सा च षोडशभेदेति। आह च निर्युक्तिकारः—

धाई दूईनिमित्ते आजीववणीमगे तिगिच्छा य।
कोहे माणे माया लोभे य हवंति दस एते॥४३८॥
पुव्विंपच्छासंथव विज्जा मंते य चुण्ण-जोगे य।
उप्पायणाए दोसा सोलसमे मूलकम्मे य॥४३९॥

धाई गाहा। **पुव्विं** गाहा। व्याख्या— **धात्री, दूती, निमित्तं, आजीवो वनीपकः चिकित्सा च क्रोधो, मानो, माया लोभश्च भवन्त्येते दश**दोषाः।

पूर्वसंस्तवः, पश्चात्संस्तवो विद्या मन्त्रश्च, चूर्णो योगश्चेत्येषणायां दोषाः षोडशो[४] मूलकर्म्मदोष इति गाथाद्वयपदानि ॥४३८-४३९॥

पदार्थं तु स्वयमेव भाष्यकृद् यथावसरं वक्ष्यति। तत्राद्यपदभेदाभिधित्सयाह—

खीरे य मज्जणे मंडणे य कीलावणंकधाती य।
एक्केक्का वि य दुविहा करणे कारावणे चेव॥४४०॥

खीरे य गाहा। व्याख्या— **क्षीर-मज्जन-मण्डन-क्रीडनाऽङ्क**विषयाः पञ्चधात्र्यो भवन्ति।

(टि०) १. ०धाउणवि० खं०॥ २. ०भंडयाणं जे१ को०॥ ३. ०धादिषु ता धा० जि०। ०धादिषु धा० जि१॥ ४. ०डशं मूलकर्म्म इति गा० ला०॥

एकैकाऽपि च द्विविधा, करणविषया **कारण**विषया **चैवे**ति गाथार्थः ॥४४०॥ धात्रीशब्दव्युत्पादनायाह–

धारयति धीयते वा धयंति[१] वा तमिइ तेण धाई तु।
जहविभवा आसि[२] पुरा खीरादी पंच धाईओ॥४४१॥

धारयइ गाहा। व्याख्या– **धारयति धीयते वा धयन्ति वा तामिति तेन धात्री**त्यभिधीयते। एतास्तु **यथाविभवमासन् पुरा क्षीर**धात्र्यादयः **पञ्च धात्र्य** इति गाथार्थः ॥४४१॥

साम्प्रतं यथा साधुः क्षीरधात्रीत्वं कारयति तथा दर्शयन्नाह–

खीराहारो रोवति मज्झ कयासाय देहि णं पज्जे।
पच्छा व मज्झ दाहिसि अलं व भुज्जो व एहामि॥४४२॥

खीराहारो गाहा। व्याख्या– पूर्व्वपरिचिताऽगार्य्या गृहं साधुर्भिक्षार्थं प्रविष्टो रुदन्तं बालकं दृष्टवेदमाह– "**क्षीराहारो रोदिति, मह्यं कृताशाय** = कृतमनोरथाय **देहि**", '**णमि**'ति वाक्यालङ्कारे, भिक्षामिति प्रक्रमः, "एनं च बालकं **पायय**[३] स्तनं **पश्चाद् वा मह्यं दास्यसि अलं वा** मम भिक्षया **भूयो वाऽहमागमिष्यामी**ति गाथार्थः ॥४४२॥ चाटुकारित्वं कुर्व्वन्निदमाह–

मइमं अरोगि दीहाउओ य होइ अविमाणिओ बालो।
दुल्लभगं[४] खु सुयमुहं पज्जेहि अहं व से[५] देमि॥४४३॥

मइ० गाहा। व्याख्या– **मतिमान् अरोगी दीर्घायुश्च भवत्यविमानितो बालो, दुर्ल्लभकं** च यतः **सुतमुखं** अतः **पायय** एनमित्येवं कारयति। स्वयं करणं त्विदं– **अहं वाऽस्य ददामि**, क्षीरमिति सम्बध्यत इति गाथार्थः ॥४४३॥ अत्र दोषानाह–

अहिगरण भद्द पंता कम्मुदय गिलाणए य उड्डाहो।
चडुगारी य अवण्णो[६] निया वण्णो व णं[७] संके॥४४४॥

अहिगरण गाहा। व्याख्या– **अधिकरणं**– जननी **भद्रक**त्वाद् अशुद्धभिक्षादानं कुर्य्यात् **प्रान्त**त्वाद्वा प्रद्वेषं यायात्, बालकस्य **कर्म्मोदयात् ग्लानत्वे** सत्युड्डाहः, **चाटुकारी**ति **अवर्ण्ण**वादो भवति, '**णीया व**'त्ति निजाः स्वजना **अन्यो वाऽन्यं** स्त्रीपुरुषसम्बन्धमाशङ्केरन्निति गाथार्थः ॥४४४॥

प्रकारान्तरेण धात्र्याः धात्रीनियोगं यथा साधुः कारयति तथा दर्शयन्नाह–

अयमवरो उ विकप्पो भिक्खायरि सट्ठि अद्धिती पुच्छा।
दुक्खसहायविभासा हियं मे धाइत्तणं अज्जो॥४४५॥

(टि०) १. **०ति धावंति तेण** खं०॥ २. **तदा** खं०॥ ३. **पोषय** जि०॥ ४. **च** जे१॥ ५. **०त्यनवमा०** जि१॥ ६. **नियगा अन्नं व** खं०॥ ७. **संको** खं०॥

(वि०टि०) ❖. 'धारयति बालकमिति धात्री, यद्वा धीयते भाटकप्रदानेन धीयते = पोष्यते इति धात्री, अथवा 'धयन्ति' पिबन्ति बालकास्तामिति धात्री..... इति **मलय०**॥ ✱. **अविमानितः** = स्तनपायित इत्यर्थः॥

अयमवरो उ गाहा। व्याख्या– **अयमपरस्तु विकल्पो भिक्षाचर्य्यां** प्रविष्टो यतिः **श्राद्धिकाम-धृतियुक्तां** दृष्ट्वा **पृच्छति**– ''किं त्वमेवं अधृतिपरा ?'' इति। सा प्रत्याह– '**दुक्खसहायविभासा, हियं मे धाइत्तणं अज्जो** ''किं कथितेन तस्य यो न करोति दुक्खनिग्रहम्''। साधुर्ब्रवीति– ''अहं करोमि''। साऽप्याह– ''हतं मे धात्रीत्वं आर्य्य इति गाथार्थः॥४४५॥

भिक्षादानोद्यतां साधुस्तां वदति– ''यावद्धात्रीपदे त्वं न [१]स्थापिता तावदहं भिक्षां न गृह्णामि'' इत्यभिधाय अभिनवधात्र्याः स्वरूपमजानानः किं करोतीत्याह–

वय-गंड-थुल्ल-तणुयत्तणेहिं तं [२]पुच्छिउं अयाणंतो।
तत्थ गओ तस्समक्खं भणाइ तं पासिउं बालं॥४४६॥

वय० गाहा। व्याख्या– **वयो-गण्ड-स्थूल-तनुत्वादि**विशेषांस्तस्याः **पृच्छत्यजानानः**, तच्च श्रुत्वा कूटश्लोकान् विरचय्य अभिनवधात्रीयुतं ईश्वरगृहं जगाम, **तत्र** च **गतः** '**तस्समक्षं**'ति परिजनसमक्षं **भणति तं दृष्ट्वा बालकमि**ति गाथार्थः॥४४६॥ किं तद् ? इत्याह–

अहुणुट्ठियं व अणवेक्खियं व इणमं कुलं तु मण्णामि।
पुण्णेहिं जहिच्छाए चलई बालेण सूएमो॥४४७॥

अहुणुट्ठियं गाहा। व्याख्या– **अधुनोत्थितं वा** – साम्प्रतमीश्वरीभूतम्, '**अणवेक्खियं व**'त्ति अदृष्टपरिजनस्वरूपं **वैतत् कुलं मन्येऽहं पुण्यैर्यदृच्छया** वा **चलति** = वर्त्तते **बालेन सूचयाम** = जानीम इति गाथार्थः॥४४७॥

एवमुक्ते साधुना, परिजनेनोक्तं– ''केन हेतुना ?''। साधुराह– ''धात्री न शोभने''ति। ''कस्मादि ?''ति चेद् वैद्यकमु[३]द्ग्राहयति– शरीरसाधारणं हि स्तन्यं तच्च वातलादिभेदादनेकविधं, तद्यथा– वातिकं पैत्तिकं चैव श्लेष्मिकं सान्निपातिकं स्तन्यं चतुर्विधं प्रोक्तम्। परीक्षा तस्य कथ्यते–

कफजमधस्तात् स्तन्यं गच्छति सलिले तु वातिकम्।
तरति विस्तारि पैत्तिकं सान्निपातिकं सर्व्वलिङ्गयुतम्॥१॥

वातप्रकृतिश्चायं बालो लक्ष्यते, यत उक्तम्–

कृशो रूक्षोऽल्पकेशश्चलचित्तोऽनवस्थितः।
[४]बहुवाग् व्योमगः स्वप्ने वातप्रकृतिको नरः॥१॥

वातलस्तन्या च धात्रीत्यतो न सम्यग्योग इति गाथार्थः॥४४७॥ प्रकारान्तरेण धात्रीदोषानाह–

थेरी दुब्बलखीरा चिमिढो पेल्लियमुहो अतिथणीए।
तणुई उ मंदखीरा कोप्परथणियाइ सूइमुहो॥४४८॥

थेरी गाहा। व्याख्या– **स्थविरा दुर्ब्बलक्षीरा चिपिटः प्रेरितमुखत्वादतिस्तनवत्याः, तन्वी**

(टि०) १. **सूचिता** जि०॥ २. **०च्छियं** जे१॥ ३. **०मुद्वाहयति** ला०॥ ४. **बहुधा व्यो०** ला० विना॥

मन्दक्षीरा कूर्प्पराकारस्तन्याः शुचीमुखो भवति, बाल इति गम्यते, इति गाथार्थः॥४४८॥ वर्ण्णं चाश्रित्य यदि गौरी ततः श्यामां वर्ण्णयति गौरीनिन्दां च विदधाति, श्यामा चेद्विपरीतं वदत्याह च–

जा जेण होदि वण्णेण उक्कडा गरहए[1] य तं तेण।
गरहति समाण तिव्वं पसत्थभेदं तु[2] दुव्वण्णं॥४४९॥

जा जेण गाहा। व्याख्या– **या येन भवति वर्ण्णेनोत्कटा गर्हते च तां तेन** वर्ण्णेनेति सम्बन्धः, **गर्हितया समान**वर्ण्णा यदि पूर्व्वधात्र्यपि भवति, ततश्च **तीव्रं** = अतिशयेन **प्रशस्त**वर्ण्ण**भेदां** पूर्व्वधात्रीमाह इतरां च **दुर्व्वर्ण्णामि**ति। अत्रान्तरे स्वमतिविकल्पितान् प्रस्तुतार्थाऽभिधायकान् श्लोकान् पपाठ–

कृष्णा भ्रंशयते वर्ण्णं गौरी तु बलवर्ज्जिता।
तस्माच्छ्यामा भवेद्धात्री बलवर्ण्णैः प्रशंसिता॥१॥
जाड्यं भवति स्थूलायास्तनुक्यास्त्वबलंकरम्।
तस्मान्मध्यबलस्थायाः स्तन्यं पुष्टिकरं स्मृतम्॥२॥
अतिस्तनी तु चिपिटं खरपीना तु दन्तुरम्।
मध्यस्तनी महाच्छिद्रा धात्री सौम्यसुखङ्करी॥३॥

[3]एतच्च श्रुत्वा गृहिणी निजभर्त्तुः[4] कथयामास, तेनाऽपि तामपनीय चिरन्तन्येव[5] स्थापितेति गाथार्थः॥४४९॥

एवं धात्रीत्वं कारयतः साधोर्दोषानाह–

उव्वट्टिता पओसं छोभग उब्भामओ[6] य से जं तू।
होज्जा मज्झ वि विग्घो विसाति इयरी वि एमेव॥४५०॥

उव्वट्टिया गाहा। व्याख्या– **उद्वर्त्तिता** = अपनीता सती **प्रद्वेषं**, यायादिति क्रियाऽध्याहारः **छोभगं** = आलं वा दद्याद्**दुद्भ्रामको** = जार इत्येवं वा ब्रूयात्, **'से'** तस्य **यद्** वधादि कुर्य्यात्। या अवस्थापिता धात्री साऽपि साधुसामर्थ्यमवधार्य **भवेन्ममापि विघ्नो**ऽस्मादिति **विषादि** साधोर्दद्याद् **'इतरी वि'**त्ति या स्थापितेति **'एवमेवे'**ति यथाऽस्याश्च्यावितायाः विघ्नः कृत इति गाथार्थः॥४५०॥

उक्ता क्षीरधात्री। शेषधात्र्यतिदेशमाह–

एमेव सेसिगासु वि सुयमाइसु करण-कारणं[7] सगिहे।
इड्ढीसु य धाईसु य तहेव उव्वट्टियाण गमो॥४५१॥

[8]**एमेव** गाहा। व्याख्या– **एवमेव** यथा क्षीरधात्र्यां तथा **शेषकास्वपि सुतमातृषु करण-कारणं स्वगृहे** = सुतमातृगृहे साधोर्वाच्यम्, **'ऋद्धी'**ति ऋद्धिमतीषु[9] **धात्रीषु च तथैव** करण-कारणविधिर्वाच्यः, **उद्वर्त्तितानां** धात्रीपदच्यावितानां सकाशात् प्रद्वेषादयो दोषास्तथैव साधोर्भणनीया इति गाथार्थः॥४५१॥

(टि०) १. उ खं०॥ २. **दुवण्णा** जे१, २॥ ३. **एवं श्रु०** जि१॥ ४. **भर्त्रे** जि०॥ ५. **०न्तनोपस्थापि०** ला०॥ ६. **य व सेज्जं तु** खं०॥ ७. **०रवणं** जे१॥ ८. **एवमेव** ला०॥ ९. **०मतीसुतधा०** ला० जि१॥

मज्जनधात्रीत्वकरण-कारणविधिर्यथा साधोर्भवति तथा दर्शयन्नाह–

लोलइ महीय धूलीय गुंडिओ ण्हाण[१] अहव णं मज्जे।
जलभीरु अबलणयणो अइउप्पलणेण रत्तच्छो॥४५२॥

लोलइ गाहा। व्याख्या– साधुर्भिक्षार्थं प्रविष्टो बालकं दृष्ट्वा तज्जननीमाह– "**लोठते[२] मह्यां धूल्या गुण्डितो**ऽयं बाल इति, अतः **स्नापयैनम्, अथवै[३]नमहमेव स्नापयामी**" ति। अपनीतपूर्व्वधात्रीस्थापनार्थं द्वितीयधात्रीच्यावनाय दोषानाह– अस्नानेन अतिस्नानेन वा **जलभीरुरबलनयनश्चातिप्लावने**(न) च **रक्ताक्षो** भवतीति गाथार्थः॥४५२॥ मज्जनधात्री कीदृशं बालकं कृत्वा मण्डनधात्र्याः समर्प्पयति। तदाह–

अब्भंगिय-संबाहिय-उव्वट्टिय मज्जियं च तो बालं।
उवणेइ ण्हाण[४]धाई मंडण[५]धाईय सुइदेहं॥४५३॥

अब्भंगिय० गाहा। व्याख्या– **अभ्यङ्गित-सम्बाधितोद्वर्त्तितं[६] सम्मज्जितं च ततो बालमुपनयति स्नानधात्री मण्डनधात्र्याः शुचिदेहं** कृत्वेति गाथार्थः॥४५३॥

उक्ता मज्जनधात्री। मण्डनधात्रीत्वमङ्गीकृत्याह–

उसुगाइएहिं मंडेहि ताव णं अहव णं विभूसेमि[७]।
हत्थिच्चगा व पाए कया गलिच्चा व से पाए॥४५४॥

उसुआइएहिं गाहा। व्याख्या– '**उसुआइएहि**'त्ति "आभरणविशेषै**र्मण्डय तावदेनं अथवा**ऽहं **विभूषयामि**" इति। पूर्व्वधात्रीस्थापनायेतरस्या दोषानाह– **हस्तसत्कमा**भरणं **पादयोः कृतं ग्रीवाभरणं वा 'से'** तस्य बालकस्य **पादयोर्न्यस्तमिति** आकर्ण्य गृहिणी भर्त्रे कथयामास। स च तामपनीय प्राक्त[८]नीमेव कृतवान्, दोषसम्भवस्तु पूर्व्ववद् भावनीय इति गाथार्थः॥४५४॥

उक्ता मण्डनधात्री। साम्प्रतं क्रीडनधात्री भण्यते–

साधुर्भिक्षार्थं प्रविष्टो रुदन्तं बालकं दृष्ट्वा भणति मातरम्– "रमय तावदेनं बालकं अहं वा रमयामि" इत्येवं धात्रीत्वं कारयति करोति चेति। पूर्व्वधात्री स्थापनाय द्वितीयधात्रीदोषोद्भावनार्थं चाह–

ढड्ढरसर चुन्न[◆]मुहो मउयगिरा [९]*मउय[१०] मम्मणपलावो।
उल्लावण[११]गाईहिं व करेइ कारेइ वा किड्डं॥४५५॥

ढड्ढर० गाहा। व्याख्या– **ढड्ढरस्वर**क्रीडनेन '**छुण्णमुख**' इति क्लीबमुखो भवति, **मृदुगिरा** [१२]रमणेन **मम्मणप्रलापो** भवतीत्येवं दोषोद्भावनेन द्वितीयामुद्वर्त्य प्राक्तनीमेव स्थापयति, द्वितीयार्द्धं स्पष्टमेवेति

(टि०) १. ०हाणे जे१,२॥ **२. लोलते** जि१॥ **३. ०थवा आनयैनम०** जि०॥ **४. ण्हवणधाई** जे१॥ **५. ०धाईए** जे४ भां०॥ **६. ०तमार्जितं** जि०॥ **७. ०भूसंमि** जे१॥ **८. ०नीयामेव** ला०॥ **९. पमण** जे४ भां० जे१ विना॥ **१०. ०म्मणुल्लावो** खं० जे२॥ **११. ०णमाईहिं क०** जे१॥ **१२. भणनेन** जि० जि१॥

(वि०टि०) ◆. वीराचार्यमते 'छुण्णमुहो' इति पाठः स्यात्॥ ***. 'मउय'** इति पदं वृत्तौ न विवृतम्॥

गाथार्थः ॥४५५॥ साम्प्रतमङ्कधात्रीमाह–

भिक्षार्थं प्रविष्टः साधुर्बालकं रुदन्तं दृष्ट्वा तज्जननीं वदति– "गृहाणैनम्, अङ्के स्थापय अहं वा स्थापयाम्युत्सङ्गे" इति धात्रीत्वं कारयति करोति च। द्वितीयधात्रीदोषोद्भावनार्थमाह–

थुल्लाए विगडपाओ भग्गकडी सुक्कkडी[१] य दुक्खं च।
णिम्मंसकक्खडकरेहि भीरुओ होइ घेप्पंतो॥४५६॥

थूलाए गाहा। व्याख्या– **स्थूलायाम्** = स्थूलकट्यां स्थितो **विकटपादो** भवति, धात्र्या **भग्नकट्यां शुष्ककट्यां च** स्थितो **दुःखितो** भवति, **निर्मांस-कर्कशकराभ्यां** गृह्यमाणो भीरुको भवत्येवं द्वितीयधात्रीदोषोद्भावनेन पूर्व्वधात्रीं स्थापयतीति गाथार्थः ॥४५६॥

धात्रीपिण्डोदाहरणमाह–

कोल्लइरे वत्थव्वो दत्तो आहिंडओ भवे सीसो।
उवहरइ धाइपिंडं अंगुलिजलणे य सादिव्वं॥४५७॥
ओमे संगमथेरा गच्छ[२] विसज्जंति जंघबलहीणा।
णवभागखेत्तवसही दत्तस्स य आगमो ताहे॥४५८॥
उवसयबाहिं ठाणं अन्नाउंच्छेण संकिलेसो य[३]।
पूयणचेडे मा रुव पडिलाभण विगडणा[४] सम्मं॥४५९॥दारं॥

कोल्लइरे गाहा। **ओमे** गाहा। **उवस्सग०** गाहा। आसामर्थः कथानकादवसेयस्तच्चेदम्– अत्थि इहेव **जंबुद्दीवे** दीवे **भारहे** वासे **कोल्लइरं** नाम नगरं। तत्थ य जंघाबलपरिहीणा **संगमथेरा**भिहाणा सूरिणो परिवसंति। अण्णया य संपत्ते दुब्भिक्खकाले संगमथेरायरिएहिं समणुण्णाओ[५] णियगच्छपरिवुडो **सीहा**भिहाणसीसो पट्ठविओ सुभिक्खदेसं[६]। आयरिया वि मासकप्पेणं विहरिउमसमत्ता तं खेत्तं णवविभागे काऊण चउव्विहाए दव्व-खेत्त-काल-भावरूवाए जयणाए जयमाणा तत्थेव विहरिंसु। तत्थ दव्वओ पीढफलगाइएसु, खेत्तओ वसहिपाडएसु, कालओ एगत्थ पाडए मासं वसिऊणं बीयमासे अण्णत्थ वसहिं गवेसिउं वसति, भावओ सव्वत्थ णिम्ममत्तो।

अण्णया कयाइ आयरियपउत्तिगवेसणाणिमित्तं पट्ठविओ **सीहेण** आहिंडओ **दत्ता**भिहाणो सीसो। संपत्तो तमुद्देसं। तओ[७] आयरिया णीयावासिणो त्ति काऊण ठितो सिं पडिस्सयबाहिं। ततो सूरिणा समअं पविट्ठो भिक्खट्ठा। अण्णाउंच्छहिंडणेण असंथरमाणस्स समुप्पण्णो से संकिलेसो– "अहो णु खलु पंतकुलाणि हिंडावेति ममं एसो त्ति भद्दकुलेसु पुण अप्पणो गेण्हिस्सइ"। एवं से[८] संकिलेसपरिणामं णाऊण पविट्ठो ईसरकुलं सूरी सह तेण। तत्थ य पूयणागहगहियं चेडयं रुदंतं दट्ठूण चप्पुडियापुव्वयं भणितं

(टि०) १. **सुक्कडीए दु** जे४ भां० जे१॥ २. **गणं** खं०॥ ३. **उ** जे२॥ ४. **वियणा** भां०॥ ५. **०ण्णाय** जि० जि१॥ ६. **देसे** जि० जि१॥ ७. **गतो** जि१॥ ८. **सो सं०** जि१ ला०॥

सूरिणा– "मा रुअ चेडय" त्ति। ततो से अचिंततवसामत्थयाए पणट्ठा झत्ति कडपूयणा। ठिओ तुण्हिक्को चेडो। तओ पहिट्ठवयणपंकयाए उवणीयं से जणणीए मोयगभरियं थालं। गुरुणा भणिओ **दत्तो**– "भद्द ! गेण्हसु इमं" ति। ततो घेत्तूण "पज्जत्तं"ति भणिऊण णियत्तो **दत्तो**। गुरु वि अंतपंतेसु कुलेसु भमिऊण पत्तो उवस्सयं भुत्तं च णेहिं।

तओ आवस्सयवेलाए आलोएमाणो भणिओ गुरुणा– "भद्द ! सम्ममालोएहि।" तेण भणियं– "तुब्भेहि समं चेव विहरिउ म्हि, किमेत्थासम्मं ?" ति। गुरुणा भणियं– "सुहुमधाईपिंडो तए भुत्तो, च्छोडियाकरणेण पूयणाचिकिच्छापिंडो य।" "अहो सुहूमे[1] वि एस मे दोसे[2] पलोएइ, अप्पणो पुणो महंते वि ण पेच्छए" त्ति चिंतिऊण णिग्गओ बाहिं उवस्सयाओ। तओ जहा सण्णिहियदेवयाए गुरुपडिणीउ त्ति काऊण विउव्वियं वद्दलयं, कतमन्धयारं, जणिओ खर-फरुसमारुओ, वरिसाविओ घणो। ततो तिम्मंतेण भयविहलमाणसेण ◆वाहित्ता सूरिणो। तेहिं पि कतो सद्दो "आगच्छसु"त्ति। तेण भणियं– "अंधयारे ण पेच्छामि वसहिदुवारं।" ततो सूरिणा खेलालिद्धंऽगुलिपईवेण उज्जोविया वसही[3]। चिंतियं च णेण– "अहो दीवयपरिग्गहो वि अत्थि आयरियाणं।" समागतो गुरुसमीवं। विरइओ तेण संथारो। गुरुणा वि उवसंहरिओ अंगुलिपईवो[4]। जाए अंधयारे भणिओ गुरुणा– "अज्जो ! तुम्हे पदीवसहियाए वसहीए ट्ठायह[5] विहरंत य त्ति। लज्जितो सीसो, समागया देवता, सासिओ तीए, दिण्णं गुरुणो मिच्छादूक्कडं, पडिवण्णं पायच्छित्तं ति गाथात्रयार्थः ॥४५७-४५९॥

उक्तं धात्रीपिण्डद्वारम्। अधूना दूतीपिण्डद्वारमाह–

दूतकर्म्म गृहस्थानां विधाय यो लभ्यते पिण्डः स दूतीपिण्डः। सा च दूती द्विधेत्याह च–

सग्गाम-परग्गामे दुविहा दूई तु होदि नादव्वा।
सा वा सो वा भणती भणइ य तं छण्णवयणेणं॥४६०॥

सग्गाम-परग्गामे गाहा। व्याख्या– **स्वग्राम-परग्रामविषया द्विविधा दूती तु भवति ज्ञातव्या। 'सा वे'**ति अगारी **स वा** पुरुष इत्येतद् **भणति** प्रकटम्, **भणति** तत् सन्दिष्टं **च्छन्नवचनेने**ति गाथासमुदायार्थः ॥४६०॥ अवयवार्थमाह–

एक्केक्का वि य दुविहा पागड छण्णा य छण्ण दुविहा तु
लोगुत्तरे तत्थेगा बिइया पुण उभयपक्खे वि॥४६१॥

एक्केक्का वि य गाहा। व्याख्या– **एकैकाऽपि च** स्वग्रामविषया परग्रामविषया च पुनर्द्विधा भवति **प्रकटा च्छन्ना च**। तत्र **च्छन्ना तु द्विविधा– लोकोत्तरे तत्रैका द्वितीया पुनरुभयपक्षेऽपी**ति गाथार्थः ॥४६१॥ सन्देष्टृ-सन्दिश्यमानविषयं द्विविधं प्रकटं भवति। तत्प्रतिपादनायाह–

(टि०) १. ०हूमो जि०॥ २. दोसो जि०॥ ३. ०सहिं जि१॥ ४. पतावो जि०॥ ५. गयह जि० जि१॥
(वि०टि०) ◆. वाहित्ता = व्याहृता ला०टि०॥

भिक्खादी वच्चंतो अप्पाहणि[१] णेइ खंतियादीणं।
सा ते अमुगं माता सो[२] य पिया[३] ते इमं भणइ॥४६२॥

भिक्खाती गाहा। व्याख्या– **भिक्षाद्यर्थं व्रजन्** '**अप्पाहणि**'त्ति सन्देशकं **नयति**[४] मात्रादिसत्कं **सा तव माताऽमुकं** भणति **स च पिता तवेदं भणती**ति गाथार्थः॥४६२॥

लोकोत्तरविषयच्छन्नदूतीत्वप्रतिपादनायाह–

दूइत्तं खु गरहियं अप्पाहितो बितियपच्चया भणइ।
अविकोविता सुता ते जा आह इमं भणसु खंती॥४६३॥

दूइत्तं गाधा। व्याख्या– **दूतीत्वं खु**रेवकारार्थे **गर्हितमेव** '**अप्पाहितो**'त्ति सन्दिष्टः सन् **द्वितीय**साधुप्रत्यायनार्थं वक्ति– ''**अविकोविदा** = अकुशला **सुता तव या** वदतीदं – **भण** मम मातरमि''ति। साऽपि साधुं प्रत्याह– ''वारयिष्यामि अज्जिकां तामि''ति॥४६३॥

अभिहितं लोकोत्तरच्छन्नं दूतीत्वं उभयच्छन्नमभिधियते–

उभये वि य पच्छन्ना[५] खंत ! कहिज्जाहि[६] खंतियाए तुमं।
तं तह संजायं ति य तहेव तं अह करेज्जासि[७]॥४६४॥

उभये वि गाहा। व्याख्या– काचिद् दुहिता यथाभिलषितसम्प्राप्तमनोरथा साधुहस्ते गुप्तं जनन्याः सन्दिशति इदम्– **तत्तथैव सञ्जातम्**; साऽपि च साधुना कथिते उपयाचितदानाद्यधिकरणं च करोति॥४६४॥ उक्तं स्वग्रामविषयं दूतीत्वम्। परग्रामविषयदूतीत्वमुच्यते–

गामाण दोण्ह वेरं सेज्जायरिधूय तत्थ खंतस्स।
वहपरिणय खंतऽब्भत्थणं च णाते कते जुद्धं॥४६५॥

गामाण गाहा। व्याख्या– **ग्रामयोर्द्वयोर्वैरं** अभवत्। तत्रैकस्मिन् शय्यातरी वसत्यन्यत्र दुहिता। **तत्र** द्वितीयग्रामे भिक्षार्थं प्रस्थितस्य '**खंतस्से**'त्ति पितुः साधोः शय्यातर्य्याभ्यर्थनं कृतं यथा– ''मदीयदुहित्रे कथनीयमिदं– मदीयग्रामस्त्वदीयग्रामस्योपरि **वधपरिणत** इति यत्नेन स्थेयम्।'' साधुना च तथैव कथिते तया दुहित्रा भर्त्रे निवेदितम्। तेनाऽपि ग्रामस्य **ज्ञाते** च ग्रामः सन्नद्धः स्थितः। आगतश्च प्रतिपक्षग्रामः। सञ्जातं **युद्धमि**ति गाथार्थः॥४६५॥ तत्र किं संवृत्तमित्याह–

जामाइ-पुत्त-पइमारणं च केण कहियं ति जणवादो।
जामाति-पुत्त-पइमारएण[८] खंतेण मे सिट्ठं॥४६६॥ दारं[९]॥

जामाइ० गाहा। व्याख्या– **जामातृ-पुत्र-पतिमारणं च**, शय्यातर्य्या इति गम्यते, **केन कथितम्** ? **इति जनवादो**ऽभूत्। शय्यातरी चाह– **जामातृ-पुत्र-पतिमारकेन** '**खंतेण मे**'त्ति

(टि०) १. ०हणे जे२॥ २. व खं० जे१॥ ३. पागडं भ० खं०॥ ४. कथयति ला०॥ ५. ०च्छंता जे२॥ ०च्छण्णं खं०॥ ६. ०ज्जासु जे१॥ ७. कहेज्ज० खं०॥ ८. ०रणेण जे२॥ ९. दारं॥ दूइत्तं गयं खं०॥

मदीयपितृसाधुना कथितमिति गाथार्थः ॥४६६॥ गतं **दूतीपिण्डद्वारम्**। इदानीं **निमित्तपिण्डद्वारमाह**–

नियमा तिकालविसए वि णिमित्ते छव्विहे भवे दोसा।
सज्जं तु वट्टमाणे आउभए तत्थिमं [१]नायं॥४६७॥

णियमा गाहा। व्याख्या– **नियमात्** = नियमेन **त्रिकालविषयेऽपि** = अतीता-ऽनागत-वर्त्तमानगोचरेऽपि **निमित्ते 'षड्विध'** इति त्रिविधमपि प्रशस्तेतरभेदाभ्यां भिद्यमानं षड्विधं अथवा त्रिकालविषयमप्येकैकं लाभाऽलाभ-सुखदुःख-जीवितमरणभेदात् षड्विधमिति, तस्मिन् वध-बन्धना-ऽधिकरणादयो दोषाः स्युः। **सद्यः** = तत्क्षणादेव **वर्त्तमान**निमित्ते प्रयुज्यमाने [२]**आत्मोभय**विषया दोषाः, तत्रेदं उदाहरणमिति गाथार्थः ॥४६७॥

आकंपिया णिमित्तेण भोइणी भोइए चिरगयम्मि।
पुव्वभणियं [३]कहंते आगतो रुट्ठो य वडवाए॥४६८॥
दूराभोयण एगागि आगमो परिजणस्स पच्चोणी।
पुच्छा [४]समणे कहणं सातियंकार सुमिणादी॥४६९॥
कोवो [५]वडवागब्भं च पुच्छि[६]ओ पंचपुंडमाहंसु।
फालण दिट्ठे जइ णेवं तो तुहं अवितहं कइ वा॥४७०॥दारं॥

आगंपिया गाहा। **दूरा०** गाहा। **कोवो** गाहा। आसां व्याख्या– **आकम्पिता** = परितोषिता **निमित्तेन भोगिनी** साधवे पिण्डमदादिति गम्यते, **भोगिके** = ग्रामस्वामिनि **चिरगते**, नैमित्तिक**पूर्व्वभणितं कथयन्त्यामागतः** सन् **रुष्टो वडवागर्भं** च पृष्टवान्।

'दूराभोयण'त्ति **दूरस्थाऽऽलोचनं** अविदित एव प्रवेक्ष्यामीति **एकाकिन आगमनम्, परिजनस्य 'पच्चोणि'**त्ति सम्मुखागमनम्, भोगिकस्य **पृच्छा, श्रमण**विषयं **कथनं**, **'साइयंकारे'**त्ति प्रत्ययकरणं **स्वप्नादिना**।

कोपो भोगिकस्य, **वडवागर्भं च पृष्टः, पञ्चपुण्ड्रः**◆ किशोरक**मकथयत्, पाटनमु**दरस्य दृष्टश्च किशोरको, भोगिकेनोक्तं– **"यद्येवं न** अभविष्यत् **ततस्तवो**दरमपाटयिष्यामः।" **(अ)वितथमेवं कियन्तो वा** कथयिष्यन्तीति गाथात्रयार्थः। भावार्थस्तु कथानकादवसेयः, तच्चेदम्–

एगम्मि सण्णिवेसे गामभोइगो होत्था। सो य णरिंदाए सेणगतो। देसंतरं चिरगतस्स य से उव्वाहुलीभूया भोइणी भिक्खागयं समणं [७]पुच्छिंसु– "भयवं ! किं निमित्तं वियाणसि ?"। तेण भणियं– "जाणामि"। पुच्छियं भोइणीए– "कया भोइणो एहीइ ?"। तेण भणियं– "कल्लं"ति। तीए भणियं–

(टि०) १. नायं उदाहरणं इति खं० टि०॥ **२. आत्मपरोभय०** ला०॥ **३. कहिं ता आ०** जे१॥ **४. खमणं क०** जे१। **समण क०** खं०॥ **५. कोहो** जे१॥ **६. ०च्छिए** जे२॥ **७. ०च्छिस्सं** ला०॥

(वि०टि०) ◆. पुण्ड्रः = टिक्कक इति ला० टि०॥

"को एत्थ पच्चओ ?"। साहियां[१] तेण गुज्झदेसतिलय-सुमिणाइया पच्चया। आउट्टा तस्स भोइणी दिण्णा मोयगादि पउरा भिक्खा। बीयदियहम्मि य कया तोरणवंदणमालातिया घरसोहा। पट्ठविओ परियण सम्मुहो। णिययघरसमायारदंसणत्थमेगागी समागच्छंतो दिट्ठो परियणेणं। भणियं भोइएणं– "कहं मम आगमणं वियाणियं ?"। परियणेण भणियं– "भोइणीए सिट्ठं"। पत्तो घरं, पुच्छिया घरिणी। तीए वि सलाहमाणीए साहिओ गुज्झतिलयाइओ समणणिमित्ताइसओ। मिच्छावियप्पओ रुट्ठेण वाहरिऊण पुच्छिओ समणो– "इमीए वडवाए केरिसो गब्भो ?" त्ति। तेण भणियं– "पंचपुंडो किसोरो।" फालावियो[२] य पोट्टो, दिट्ठो जधाऽऽइट्ठो। भणियं च तेण– "जइ एयं एवं ण होंतं तो ते पोट्टं फालियं होंतं" ति। केत्तिया वं[३] एरिसा णेमित्तिणो होंति[४] त्ति, तस्मान्निमित्तपिंडो न ग्राह्य इति गाथात्रयभावार्थ इति ॥४६८-४७०॥

उक्तो **निमित्तपिण्डः**। अधुना **आजीवनापिण्डमाह**– जात्याद्याजीवनया पिण्डः = आजीवनापिण्डः।

जाई-कुल-गण-कम्मे सिप्पे आजीवणा उ[५] पंचविहा।
सूयाए असूयाए व अप्पाण[६] कहेइ एक्केक्के॥४७१॥

जाती० गाहा। व्याख्या– **जाति-कुल-गण-कर्म्म-शिल्प**विषया **आजीवना तु पञ्चविधा, सूययाऽसूयया वात्मानं कथयत्येकैकस्मिन्**, जात्यादौ इति गम्यत इति गाथार्थः॥४७१॥

अवयवार्थमाह–

जाई-कुले विभासा गणो उ मल्लादि कम्म किसिमादी।
तुण्णाइ सिप्पऽणावज्जगं[७] च[८] कम्मेतराऽऽवज्जं॥४७२॥

जाई० गाहा। व्याख्या– '**जाई-कुले विभास**'त्ति जातिर्ब्राह्मण-वैश्यादिकी मातृसमुत्था वा, कुलं उग्रकुलादि पितृवंशो वा, **गणो मल्ल-सारस्वतादिः, कर्म्म कृष्यादि, शिल्पं तूर्णन**-चित्रादि। तत्र ❖**अनावर्जनरूपं** कर्म **इतरच्छिल्पं** *आवर्जनरूपमिति गाथार्थः॥४७२॥

तत्र सूययाऽसूयया वा साधुरात्मनो जातिं प्रकाशयन्निदमाह–

होमातिवितहकरणे णज्जइ जह सोत्तियस्स पुत्तो[९] त्ति।
उसितो वेस गुरुकुले आयरियगुणे[१०] व सूएइ॥४७३॥

होमाइ० गाहा। व्याख्या– **होमादिवितथकरणे** अवितथकरणे वा **ज्ञायते यथा श्रोत्रियस्य पुत्र इति उषितो वाऽयं गुरुकुले आचार्य्यगुणान् वा सूचयती**ति गाथार्थः॥४७३॥

सम्ममसम्मा किरिया अणेण[११] ऊणाहिगा व विवरीया।
समिधा-मंता-ऽऽहुति-ठाण-जाग-काले य घोसादी॥४७४॥

(टि०) १. **०हियं** जि१॥ २. **०विये य** जि० जि१॥ ३. **य** जि१॥ ४. **होहिंति** जि० जि१॥ ५. **य** खं०॥ ६. **०प्पाणं** जे१॥ ७. **०ज्जणं** जे१,२॥ ८. **तु** जे१॥ ९. **उ** जे२॥ १०. **गुणो** जे२॥ ११. **इमेण** खं०॥

(वि०टि०) ❖. अनावर्जनरूपम् = अप्रीत्युत्पादनरूपम्॥ *. आवर्जनरूपम् = प्रीत्युत्पादनरूपम् इति **मलय०**॥

सम्मं गाहा। व्याख्या– **सम्यक्क्रियाऽसम्यक्क्रिया** वाऽनेन **कृता न्यूनाधिका विपरीता वा समिध-मन्त्रा-ऽऽहुति-स्थान-योग-काल-घोषादीनाश्रित्य** सुकृतमसुकृतं वा वदतीत्यत्र भद्रक-प्रान्तादिकृता दोषा इति गाथार्थः ॥४७४॥

उग्गादिकुलेसु[१] वि एवमेव गण[२] मंडलप्पवेसादी।
देउलदरिसण-भासाउवणयणे ◆दंड[३]मादीणं॥४७५॥

उग्गाइ० गाहा। व्याख्या– **उग्रादिकुलेष्वेवमेव** सूययाऽसूयया वा गुणदोषान् वक्तीति, **गणमाश्रित्य मण्डलप्रवेशादि** समयाचारं सूचयति, **देवकुलदर्शन-भाषोपनयन-दण्डादीनां** स्वरूपं प्रकाशयतीति गाथार्थः ॥४७५॥ कर्म्म-शिल्पविषयमाह–

कत्तरि पओयणावेक्ख वत्थु बहुवित्थरेसु एमेव।
कम्मेसु य सिप्पेसु य सम्ममसम्मेसु सूयितरा॥४७६॥ दारं॥

कत्तरि गाहा। व्याख्या– **कर्तृप्रयोजनापेक्षवस्तुबहुविस्तरेष्वप्येवमेव कर्म्मसु शिल्पेषु च सम्यगसम्यग्** वा वदति **सूययाऽसूयया** वेत्येवं जात्याद्याजीवनया यः पिण्डो लभ्यते स न कल्पते बहुदोषत्वादिति गाथार्थः ॥४७६॥ **उक्तमाजीवनापिण्डद्वारम्**। इदानीं **वनीपकपिण्डद्वारमाह**– वनीपक इति **'वनु याचने'** (**पा० धा०** १४७०) वनयति कृपणभावसन्दर्शनेन पिण्डमुत्पादयतीति वनीपकोऽर्थयिता निरुक्तिवशात्। स च पञ्चधा भवतीत्याह–

समणे माहण-किवणे अतिही साणे य होदि पंचमगे।
वणि जायण[४] त्ति वणिओ पायऽप्पणं वणेइ त्ति॥४७७॥

समणे गाहा। व्याख्या– **'समणे'**त्ति एकारान्तः शब्दः प्रथमान्तोऽत्र द्रष्टव्यः, **श्रमणो ब्राह्मणः कृपणो अतिथिः श्वा च भवति पञ्चमकः**[५]। व्युत्पत्तिमाह– **वनु याचन इत्यस्य** धातोर्**वनीपकः, प्रायेणात्मना** पिण्डादि **वनयतीति** वनीपक इति गाथार्थः ॥४७७॥ साधोर्वनीपकत्व[६]प्रतिपादनायाह–

मयमातिवच्छगं पिव वणेति आहारमादिलोभेणं।
समणेसु माहणेसु य किविणाऽतिहि-साणभत्तेसु॥४७८॥

मयमाइ० गाधा। व्याख्या– ▽**मृत**वत्सायां **मातरि** यथा कश्चिद् वत्सकं **वनयति** एवं साधुरप्यात्मानं श्रमणादिभक्तेषु वनयतीति **"वन-षण सम्भक्तौ"** (**पा० धा०** ४६३-४६४) इति अस्य रूपं *मित् सञ्ज्ञाऽप्रतिषेधात्, आत्मानं भक्तं दर्शयत्याहारादिलोभेन, केषु ? इत्याह– **श्रमण-ब्राह्मण-कृपणा-ऽतिथि-श्वभक्तेष्विति** गाथार्थः ॥४७८॥ श्रमणभेदानाह–

(टि०) १. **०कुलाइसु** जे१॥ २. **गणे** खं०॥ ३. **०मादीया** जे४ भां०॥ ४. **०यणे** खं०॥ ५. **०वतीति पञ्च०** जि० जि१॥ ६. **०त्वं प्रतिपादयन्नाह** जि१॥

(वि०टि०) ◆. **वीरगणि-मलयगिरिसूरिमते** तु **'दंडमादीया'** इति पाठः स्यात्॥ ▽. मृता पञ्चत्वमुपगता माता यस्य वत्सकस्य = तर्णकस्य तमिव गोपलकोऽन्यस्यां गवीति शेषः... इति **मलय०**॥ *. **'म' अनुबन्ध** इति ला०टि०॥

निग्गंथ-सक्क-तावस-गेरुय-आजीव पंचहा समणा।
तेसिं परिवेसणाए लोभेण वणेज्ज को [१]अप्पं॥४७९॥

णिग्गंथ० गाहा। व्याख्या– **निर्ग्रन्थ-शाक्य-तापस-गैरिका-ऽऽजीवक(काः?) पञ्च[२]धा** 'समण'त्ति श्रमणशब्दवाच्यास्तेषां **परिवेषण**वेलायां **लोभेन वनयेत् कश्चित्** साधुरात्मानं, भक्तं दर्शयेदिति गाथार्थः॥४७९॥

कश्चित् साधुरुपासकगृहं भिक्षायै प्रविष्टः, तत्र शाक्यान् भुञ्जानान् दृष्ट्वा तत्प्रशंसार्थमाह–

भुंजंति चित्तकम्मट्ठिता व कारुणिय दाणरुइणो य[३]।
अवि कामगद्दभेसु वि ण णस्सते किं पुण जतीसु॥४८०॥

भुंजंति गाहा। व्याख्या– **भुञ्जते चित्रकर्म्मस्थिता इव कारुणिका दानरुचयश्च, अपिः** सम्भावने, **कामगर्दभेष्वपि** धिग्वर्णेषु दत्तं **न नश्यति किं पुनरेतेषु यतिष्विति** गाथार्थः॥४८०॥

अत्र दोषानाह–

मिच्छत्तथिरीकरणं उग्गमदोसा य तेसु वा गच्छे।
चडुगारऽदिण्णदाणा पच्चत्थिग मा पुणो [४]एंतु॥४८१॥

मिच्छत्त० गाहा। व्याख्या– **मिथ्यात्वस्थिरीकरणमुद्गमदोषाश्च 'तेषु वा गच्छे'**त्ति तेभ्य उपासकादिभ्यः सकाशादागच्छेयुः पञ्चम्यर्थे सप्तमी तेषु वा परतीर्थिकेषु कामिकाहारे लब्धरसो गच्छेत्, प्रद्विष्टा वा शाक्या एवं ब्रूयुश्चाटुकारिणोऽदत्त[५]दानाः **प्रत्यर्थिनः** = प्रतिपक्षा **मा पुनर्भवतां गृहमागच्छन्ति**वति गाथार्थः॥४८१॥

साम्प्रतं ब्राह्मणभक्तानां पुरतो ब्राह्मणप्रशंसारूपं वनीपकत्वं यथा साधुः करोति तथा दर्शयन्नाह–

लोगाणुग्गहकारिसु भूमीदेवेसु बहुफलं दाणं।
अवि णाम बंभबंधुसु किं पुण छक्कम्मणिरतेसु॥४८२॥

लोयाणुग्गह० गाहा। व्याख्या– **लोकानुग्रहकारिषु भूमीदेवेषु बहुफलं** भवति **दानम्, अपि नाम**मात्र**ब्रह्मबन्धुषु किं पुनः षट्कर्मनिरतेषु** = यजन-याजना-ऽध्ययना-ऽध्यापन-दान-प्रतिग्रहरतेष्विति गाथार्थः॥४८२॥ कृपणभक्तविषयवनीपक[६]त्वदर्शनायाह–

किवणेसु दुम्मणेसु य अबंधवाऽऽतंकजुंगियंगेसु।
पूया[७]हज्जे लोए दाणपडागं हरइ [८]देंतो॥४८३॥

किवणेसु गाहा। व्याख्या– **कृपणेषु दुर्म्मनस्सु च अबान्धवेषु आतङ्ककयुक्तेषु जुङ्गिताङ्गेषु** = विकलाङ्गेषु **'पूयाहज्जे'** पूजाहार्य्ये **लोके**, पूजितपूजके इत्यर्थः, **दानपताकां हरति** ददिति

(टि०) १. **अप्पाणं** जे१॥ २. **०श्चमाः** ला०॥ ३. **वा** जे१ विना॥ ४. **इंतु** खं० विना॥ ५. **०त्तादानाः** जि० जि१॥ ६. **०त्वं र्शयन्नाह** जि१॥ ७. **०याहेज्जे** खं०। **०यायहोज्ज** जे२॥ ८. **देंती** जे१॥

गाथार्थः ॥४८३॥ अतिथिविषयवनीपकत्वदर्शनायाह–

पाएण देइ लोगो उवगारिसु परिचितेसुऽज्झुसिए वा।
जो पुण अद्धाखिण्णं अतिहिं पूएइ तं दाणं॥४८४॥

पाएण गाहा। व्याख्या– **प्रायेण ददाति लोक उपकारिषु परिचितेषु अध्युषितेषु** = तृप्तेषु निकटवर्त्तिषु वा **यः पुनरध्वखिन्नमतिथिं पूजयति तद्दानं** स दातेति गाथार्थः ॥४८४॥

श्वभक्तविषयवनीपकत्वप्रतिपादनायाह–

अवि णाम[१] होइ सुलभो गोण्णादीणं तणादिआहारो।
[२]धिद्धिक्कारहताणं ण य सुलभो होदि [३]सुणगाणं॥४८५॥

अवि णाम गाहा। व्याख्या– '**अपि नामे**'ति सम्भावने **भवति सुलभो गवादीनां तृणाद्याहारः धिग्धिक्कारहतानां न तु सुलभो भवति शुनामिति** गाथार्थः ॥४८५॥ श्वप्रशंसां कुर्व्वन् साधुरिदं पुनराह–

[४]केलासभवणा एते आगया गुज्झगा महिं।
चरंति जक्खरूवेणं पूयाऽपूय हियाऽहिया॥४८६॥

केलास सिलोगो। **कैलासे भवनमेषां ते तथा एते आगता गृह्यका महीं चरन्ति यक्षरूपेण 'पूयाऽपूय हियाऽहिय'**त्ति पूजया हिता अपूजया त्वहिता भवन्तीति श्लोकार्थः ॥४८६॥

एवमुक्ते साधुना श्रमणादिभक्तो यच्चिन्तयति तद्दर्शयन्नाह–

एतेण मज्झ भावो दिट्ठो लोए [५]पणायहेज्जंमि।
एक्केक्के पुव्वुत्ता भद्दग-पंतादिणो[६] दोसा॥४८७॥

एतेण गाहा। व्याख्या– **एतेन मम भावो दृष्टो** = ज्ञात इति दानादौ प्रवर्त्तते '**लोए पणायहेज्जंमि**'त्ति लोकस्य प्रणतिहार्य्यत्वाद्। **एकैकस्मिन्** वनीपकत्वे **पूर्व्वोक्ता** एव **भद्रक-प्रान्तादयो दोषा** इति गाथार्थः ॥४८७॥ श्वग्रहणस्योपलक्षणतां दर्शयन्नाह–

एमेव कागमादी साणग्गहणेण सूइया होंति।
जो वा जम्मि पसत्तो वणेइ तहिं[७] पुट्ठऽपुट्ठो वा॥४८८॥

एमेव गाहा। व्याख्या– **एवमेव काकादयः श्वग्रहणेन सूचिता भवन्ति यो वा यस्मिन् प्रसक्तस्तत्रात्मानं वनयति** = भक्तं दर्शयत्याहाराद्यर्थं **पृष्टोऽपृष्टो** वेति गाथार्थः ॥४८८॥

एवं कुर्व्वतः साधोर्दोषगरीयस्त्वख्यापनायाह–

दाणं ण होइ अफलं पत्तमपत्ते[८] [९]व संनिजुज्जंतं।
इय वि भणिए[१०] दोसा पसंसओ[११] किं पुण अपत्ते ?॥४८९॥ दारं॥

(टि०) १. **होज्ज** खं० जे१ विना॥ २. **छिच्छिक्का०** खं० जे४ भां०॥ ३. **साणाणं** जे१॥ ४. **केइला०** जे२॥ ५. **०णामहे०** खं०॥ ६. **०दिया** खं०॥ ७. **तह** जे१,२॥ ८. **०त्तेसु सं०** जे४ भां०॥ ९. **य** जे२॥ १०. **०ए य दोसा** जे२। ११. **०संसिमो** जे२॥

दाणं गाहा। व्याख्या– **दानमफलं न भवति पात्रेऽपात्रे वा संनियुज्यमानं इयन्मात्रकेऽप्युक्ते दोषा** मिथ्यात्वाधिकरणादयः, प्रशंसिते किं पुन**रपात्रे** सुतरामेव दोषा भवन्तीति गाथार्थः ॥४८९॥

उक्तं **वनीपकपिण्डद्वारम्**। अधुना **चिकित्सापिण्डद्वारमाह**– चिकित्सनं = चिकित्सा व्याधिप्रतिकारः, चिकित्स[१]या। पिण्डः चिकित्सापिण्डः। सा च सूक्ष्म-बादरभेदाद् द्विधेत्याह च–

भणइ य णाहं वेज्जो अहवा वि कहेइ अप्पणो किरियं।
अथवा वि वेज्जयाए तिविह तिगिच्छा मुणेयव्वा॥४९०॥

भणति य गाधा। व्याख्या– कश्चित् साधुर्भिक्षार्थं प्रविष्टः केनचिद् व्याध्यभिभूतेन पृष्टो– "भगवन्! व्याधिप्रतीकारं जानीषे ?"। स च **भणति**– "**नाऽहं वैद्यः**" इत्यर्थापत्त्या वैद्यः प्रष्टव्य इति सूचितम्, यतिना अबुधबोधनं कृतमित्येका चिकित्सा, **अथवाऽपि कथयत्यात्मनः क्रियां**– स्वानुभूतां चिकित्सां प्रकाशयतीति भावः, इयं द्वितीया चिकित्सा, एतच्चिकित्साद्वयमपि एका सूक्ष्मचिकित्सेति।

गाथापश्चार्द्धेन [२]बादरामाह– '**अहवा वि वेज्जियाए तिविह चिकिच्छा मुणेयव्व**'त्ति अथवाऽपि वैद्यतया[*] त्रिविधां संशोधन-संशमन-निदानपरिवर्ज्जनलक्षणां स्वयमेव चिकित्सां करोतीति गाथार्थः ॥४९०॥

अमुमेवार्थमाह–

भिक्खादिगतो रोगी किं वेज्जोऽहं ति पुच्छिओ भणइ।
अत्थावत्तीए कया अबुहाणं बोह[३]णा एवं॥४९१॥

भिक्खाइ० गाहा। व्याख्या– **भिक्षादिगतो 'रोगी'**ति रोगिणा तृतीयार्थे प्रथमा, **किं वैद्योऽहम्** ? **इति पृष्टो भणति। अर्थापत्त्या कृता अबुधानां बोधनैवमिति** गाथार्थः ॥४९१॥

एरिसगं [४]चिय दुक्खं भेसज्जेण अमुगेण पउणं मे।
सहसुप्पण्णं व रुयं वारेमो अट्ठमादीहिं॥४९२॥

एरिसगं गाधा। व्याख्या– **ईदृशकं** वा **दुःखं भैषजेनामुकेन 'प्रगुणमि'**ति उपशान्तं **मम, सहसोत्प[५]न्नं च रुजं वारयामोऽष्टमादिभिस्तपोविशेषैरिति** गाथार्थः ॥४९२॥

बादरचिकित्सायास्त्रैविध्यं दर्शयन्नाह–

संसोहण संसमणं णिदाणपरिवज्जणं च जं [६]जत्थ।
आगंतुधातुखोभे य आमए कुणइ किरियं तु॥४९३॥

संसोहण गाहा। व्याख्या– **संशोधनं** = विरेचनम्, **संशमनं** = उदीर्णव्याध्युपशमकरणम्, **निदानं** = व्याधिकारणं तत्**परिवर्ज्जनं च यद्यत्र 'आगंतुधातुखोभे'**[❖] आगामी भावी धातुक्षोभो यस्मिन्नामये स

(टि०) १. ०त्सायाः पि० जि० विना॥ २. **द्वितीयामाह** ला०॥ ३. ०हणं खं०॥ ४. **मे** जे४ भां० विना॥ ५. ०**त्पन्नां वा रुजां** जि१॥ ६. **तत्थ** जे१,४ भां०॥

(**वि०टि०**) *. वैद्यतया = वैद्यीभूय इति **मलय०**॥ ❖. आगन्तुके धातुक्षोभे च सूचनात् सूत्रमिति कृत्वा धातुक्षोभजे चाऽऽमये = रोगे समुत्पन्ने सति तत्र यत्क्रियां करोति तद्यथा... इति **मलय०**॥

तथा, तस्मिन्नाम**ये करोति क्रिया**मिति गाथार्थः ॥४९३॥

एवं चिकित्[१]सया पिण्डलाभे दोषानाह–

अस्संजमजोगाणं पसंधणं काय[२]घाय अयगोलो।
दुब्बलवग्घाहरणं अच्चुदए गेण्हणुड्डाहो॥४९४॥

अस्संजम० गाहा। व्याख्या– **असंयमयोगानां प्रसन्धना** = सङ्घटना स्यात्, **कायानां** पृथिव्यादीनां **घातः** कृतो भवति, **अयोगोलक**तुल्यो गृही नीरोगः सन् सर्व्वत्रोपतापं करोति, **दुर्ब्बलव्याघ्रोदाहरणं** चात्र दृष्टव्यं तच्चेदम्– केनचिद् भिषग्वरेण **दुर्ब्बलान्ध**व्याघ्रः सचक्षुः कृतः, यथाऽसौ अनेकसत्त्वव्यापत्तिं चक्रे तथा निरोगः कृतो गृहस्थोऽपीति, दैववशाद् **अत्युदये** रोगस्य ❖गृह्यते ऽसौ गृहस्थैः, प्रवचनोपघातः स्यादिति गाथार्थः ॥४९४॥

उक्तश्चि**कित्सापिण्डः**। साम्प्रतं **क्रोधादिपिण्डा**नाह– तत्र क्रोधनं = क्रोधः, क्रोधात् क्रोधस्य क्रोधेन क्रोधे वा पिण्डः = क्रोधपिण्डः, एवं मानपिण्डादयोऽपि वाच्याः।

यथाक्रमं क्रोधपिण्डाद्युदाहरणप्रदर्शनायाह। तत्रैषां यथासङ्ख्येन नगराण्याह–

हत्थकप्प गिरिफुल्लिय रायगिहं खलु तहेव चंपा य।
कड घयपु[३]ण्णे इट्टग लड्डुग तह सीहकेसरए॥४९५॥

हत्थकप्प गाहा। व्याख्या– **हस्तकल्पं** नगरं, **गिरिपुष्पितं, राजगृहं खलु तथैव चम्पा च**। तत्र यानुद्दिश्य साधोः क्रोधादयोऽ[४]भूवंस्तान् गाथापश्चार्द्धेनाह–

'कृतमि'ति मृतकार्य्यं तस्मिन् **घृतपूर्ण्ण**लाभे क्रोधोऽभूत्, **इट्टकाः** स्वेतो(?दो)द्वर्त्तिताः, तदलाभे मानोऽभवत्, **लड्डुकान**ङ्गीकृत्य माया सञ्जाता, लड्डुकविशेष**सिंहकेसरानु**ररीकृत्य लोभः समुदभूत्, साधोरिति सर्वत्र सम्बन्धनीयमिति गाथार्थः ॥४९५॥ क्रोधपिण्डसम्भवमाह–

विज्जा-तवप्पभावं रायकुले वावि वल्लभत्तं से।
णातुं ओरस्सबलं[५] च देइ भए कोहपिंडोऽसो॥४९६॥

विज्जा० गाहा। व्याख्या– **विद्याप्रभावं तपःप्रभावं राजकुले वाऽपि वल्लभत्वं 'से'** तस्य साधोर्ज्ञात्वा **औरसबलं च** शरीरबलम्, **ददते भयात्** क्रुद्धोऽयमपकारं करिष्यतीति **क्रोधपिण्डोऽ-सावि**ति गाथार्थः ॥४९६॥ प्रकारान्तरेण क्रोधपिण्डसम्भवमाह–

अण्णेसि दिज्जमाणे जायंतो वा अलद्धिओ [६]कुज्झे।
कोहफलंमि [७]व दिट्ठे जो लब्भइ कोहपिंडो [८]तु॥४९७॥

(टि०) १. ०त्सायाः पि० जि०,१ विना॥ २. ०घाउ खं०॥ ३. ०ण्णेहिं जे२॥ ४. भूतं ता० जि१॥ ५. ०लं जं लभते कोवपिं० जे२ विना॥ ६. कोज्झा खं०॥ ७. वि जे४ भां०॥ ८. सो जे४ भां०॥

(वि०टि०) ❖. "अयम् अनेन रोगीकृतः" इति सञ्जातकोपैर्गृहस्थैः राजकुलादौ गृह्यते॥

अण्णेसि गाहा। व्याख्या– **अन्येभ्यो दीयमाने** लाभाभावे वात्मनो **याचमानो वाऽलब्धितः क्रुध्येत्। क्रोधफले वा** साधोर्दृष्टे **यो लभ्यते क्रोधपिण्डस्तु** असाविति गाथार्थः॥४९७॥

उदाहरणमाह–

करडुयभत्तमलद्धुं अण्णहि दाहित्थ एव वच्चंतो।
थेराभोयण तइए आइक्खण खामणा दाणं॥४९८॥ दारं॥

करडुय० गाहा। व्याख्या– **करडुकभक्तमलब्ध्वा** ''**अन्यत्र दास्यथ**'' इत्येवं **व्रजन्** भणति **स्थविराभोगनं** श्रवणमित्यर्थः **तृतीये** = तृतीयवारायां**माख्यातं** स्थविरेण **क्षामणा दान**मिति गाथाक्षरार्थः ॥४९८॥ भावार्थस्तु कथानकादवसेयस्तच्चेदम्–

हत्थकप्पे नगरे साहू भिक्खं हिंडंतो मतकडसंखडीए पविट्ठो। तत्थ धिज्जाइयाणं घयपुरा दिज्जंति। सो तत्थ अणाढाइज्जमाणो चिरं अच्छिउं गंतुमणो भणति–''अण्णहिं दाहिह''त्ति भणिऊण णिग्गओ साहू। तत्थ देव्वजोएण बिइयं मतं तहेव संखडीए पविट्ठो। बितियं सो साहू अलभमाणो ''अण्णहिं दाहिह'त्ति भणंतो णिग्गओ। पुणो वि देव्वजोएण तइयं मतं तत्थ तहेव मयकडसंखडीए ततियं वारं पविट्ठो। अलभमाणो ''अण्णहिं दाहिह'' त्ति भणिऊण णिग्गतो साहू घराओ। तत्थ य एगो अंधलउवारवालथेरो तइयं पि वारं इमं साधुवयणं सोऊण सयलं कहेइ घरवतीणं; भणति–''पसाएह एयं समणं मा सव्वे वि मरिस्सह''त्ति। तेहिं वाहरिऊण खामित्ता पडिलाहिओ घयपुण्णेहिं ति। एवं च क्रोधसमुत्पादितः पिण्डो ग्रहीतुं न कल्पत इति गाथाभावार्थः।

उक्तं **क्रोधपिण्ड**द्वारम्। (साम्प्रतं) **मानपिण्ड**द्वारमाह, (तत्र) मानपिण्डसम्भवमाह–

उच्छाहिओ परेण व लद्धिपसंसाहि वा समुत्तुइओ।
अवमाणिओ परेण व जो एसइ माणपिंडो सो॥४९९॥

उच्छाहितो गाहा। व्याख्या– **उत्साहितः परेण** ''त्वमेव अस्य कार्यस्य (करणे) समर्थः'' इत्येवं भणितः, तथा **लब्ध्या** लाभेन **प्रशंसया वा** साधुजनतः श्लाघया **'समुत्तुइओ'**त्ति गर्वितः **परेण वाऽपमानितः** = तिरस्कृतः, इत्थं मानात् = मानतोऽयं पिण्ड**मेषते** आहारं **स मानपिण्डस्तु** द्वितीयार्थे च प्रथमेति गाथार्थः॥४९९॥ अस्योदाहरणार्थं गाथाष्टकमाह–

इट्ठगछणंमि परिपिंडियाण उल्लावो को णु हु पए त्ति।
आणेज्ज इट्ठगाओ खुड्डो पच्चाह आणेमि॥५००॥
जइ वि य ता पज्जत्ता अगुलघयाहिं ण ताहि णे कज्जं।
जारिसियाओ इच्छह ता आणेमि त्ति णिक्खंतो॥५०१॥

(टि०) १. क्षपणा दान० ला०॥ २. ०मुइयो खं०॥ ३. उ जे१,२॥ ४. ०ह णे आ० जे१॥ ५. ०णेहिं ति खं०॥
(वि०टि०) ❖. करडुकः = मृत इति ला० टि०॥ ✱. उवारवाल = द्वारपाल इत्यर्थः॥

ओभासिय पडिसिद्धो भणइ अगारी अवस्सिमा मज्झं।
जति लभसि तो मे णासाए कुणसु मोयं ति सा आह॥५०२॥
कस्स घर पुच्छिऊणं परिसाए अमुउ कतरो पुच्छित्ता।
किं तेणऽम्हे जायसु सो किविणो न दाहिती तुब्भं॥५०३॥
[१]दाहं ति तेण भणियं जदि न भवसि छण्हिमेसि[२] पुरिसाणं।
अण्णतरो तो ते हं परिसामज्झम्मि पणएमि॥५०४॥
सेदंगुलि बगुड्डावे किंकरे तत्थ ण्हायए[३] तहा।
गिद्धावरंखि हद्दण्णए य पुरिसाऽधमा छाउ॥५०५॥
जायसु ण एरिसो हं इट्टग मम देहि पुव्वमतिगंतुं।
[४]माला उत्तारि गुलं[५] भोएमि दिए त्ति आरूढा॥५०६॥
सितिअवणण पडिलाभण दिस्सितरी[६] बोलमंगुली णासं।
दोण्हेगतरपदोसे आयविवत्ती य उड्डाहो॥५०७॥ दारं॥

इट्टग० गाहा। **जइ वि य** गाधा। **ओहासिय** गाधा। **कस्स** गाहा। **दाहामि** गाधा। **सेयंगुलि** गाधा। **जायसु** गाधा। **सीयावण** गाधा। आसामर्थः कथानकादवसेयस्तच्चेदम्– अत्थि **कोसला**विसए **गिरिफुल्लियं** णाम नगरं। तत्थ य सेवतियाच्छणे[७] तरुणसमणाण समुल्लावे एगेण भणितं– "अज्ज अवरण्हे को किर ण लभइ इट्टगाओ, जो पच्चूसे आणेइ सो णाम लद्धिमंतो"। ततो भणियमेगेण चेल्लएण– "अहमाणेमि"। तेहिं भणियं– "किं णाम ताहिं घयगुलरहियाहिं अपज्जत्ताहि य"। तओ "जारिसियाओ इच्छह तारिसियाओ आणेमि"त्ति भणंतो णिग्गओ चेल्लओ। पत्तो इब्भगेहं। दिट्ठाओ तत्थ पज्जत्ताओ सेवतियाओ। ओभासिया अविरइया पवंचिऊण, [८]पडिसेहिओ ताए। तओ संजायाऽहंकारेण भणियमणेण– "अवस्स मए एयाओ घेत्तव्वाउ"। तीए भणियं– "जदि एयाण एगंपि लहसि ता मे णासाए मुत्तेज्जासु" त्ति। ततो णिग्गंतूण पुच्छिओ घरसामी। साहिओ परिसागओ। पत्तो तत्थ खुड्डएण भणियं– "कतरो तुम्हाणं देवदत्तो ?"त्ति। परिसापुरिसेहिं भणियं– "किं तेण ?" खुड्डेण भणियं– "किंचि जाएमि"। तेहिं भणियं– "अलं तेण किवणेण, अम्हे मग्गसु"। देवदत्तेण भणियं– 'अहं देमि"त्ति। साहुणा भणियं– "जइ एयाण च्छण्हं पुरिसाणं अण्णतरो न भवसि तओ मग्गामि"। तेहिं भणियं– "के ते छ प्पुरिसा ?" [९]चेल्लएण भणितं–

सेयंगुली गाहा। व्याख्या– 'सेयंगुलि'त्ति जधा– एगेण णियजायाणिद्देसवत्तिणा कुलउत्तएणं

(टि०) १. **दाहमि** खं०। **दाहामि** जे२॥ २. **०ण्हिमाण** खं०॥ ३. **तहा** खं० विना नास्ति॥ ४. **मालातुत्तरे** खं०॥ ५. **०लं तु भो०** जे१॥ ६. **०स्सियरे** जे२॥ ७. **०णे तद्दिणे तरु०** जि१॥ ८. **पडिसोहियाओ ताओ** जि१॥ ९. **खुड्डएण** जि१॥

छुहालुणा पच्चूसे चेव भणिया णियमहिला– ''रंधेसु जइ [१]ते रोयइ त्ति जेणाऽहं भुंजामि''। तीए सयणट्ठियाए चेव भणियं– ''जति छुहितो अवणेसु चुल्लीओ छारं, आणेहि इंधणं, अब्भुत्तेसु जलणं, जलाउण्णं काऊणमारोवेसु चुल्लीए थालीं, कोट्ठयाओ य आणेऊण पक्खिवसु तंदुले। ततो रंधिऊण साहेसु मज्झं जेणाऽहं उट्ठिऊण परिवेसामि त्ति''।

'बगुड्डावे'त्ति जहा– एगो कुलउत्तओ [२]आसंधियपेम्मरसाए भणिओ जायाए जहा– ''तलावातो उदगं ज्झत्ति आणेसु''त्ति। ततो दिवसउ लज्जमाणो रयणीए चरमजामे दिणे दिणे कुडयं घेत्तूण सलिलमाहरंतो बगे उड्डावेति त्ति।

संपयं **'किं करे'**त्ति जहा– एगो कुलउत्तओ णिययजायाए अच्चंताणुरत्तो पच्चूसे चेव सयणातो उट्ठिऊणाएसं मग्गति– ''आदिससु किं करेमि ?'' त्ति। तीए भणियं– ''उदगमाणेसु''। तं संपाडेऊण पुणो वि भणति– ''किं करेमि ?''। सा भणइ– ''खंडेसु तंदुले''। तस्समत्तीए पुणो भणति– ''किं करेमि ?''। तीए संलत्तं– ''देहि मे भोयणं''। तं दाऊण भणति– ''किं करेमि ?''। सा भणति– ''उज्झसु उच्चिट्ठ मल्लए''। तं काऊण भणति– ''किं करेमि ?'' तीए भणिओ– ''सोएसु चलणए'' त्ति।

तत्थ **'ण्हायए'**त्ति जहा– एगो तरुणो जायं ❖ भणति– ''अहं ण्हाइउमिच्छामि''। तीए भणियं– ''जइ एवं ता वट्टेऊणामलए परिहिऊण पोत्तिं घेत्तूण कुडयं वच्चसु तलायं। तत्थ जहिच्छं मज्जिऊण देवच्चणं जलापुण्णं कुडयं च घेत्तूण लहुं आगच्छसु''त्ति।

गिद्धावरंखी जहा– एगो जुवाणओ णियमहिलावयणाणुवत्ती भोयणत्थमुवविट्ठो भणइ– ''लुक्ख-मिणं भोयणं, देसु घयं''ति। तीए वि रंधंतीए तहट्ठियाए भणियं– ''इतो सरसु थेवं''ति। सो गिद्धपक्खी विव सरिउ थेवं। ततो साहिखेवं भणियमणाए– ''पुणो वि सरसु''त्ति। एवं पुणो पुणो तीए भण्णमाणो ताव सरितो जाव महिलासमीवं ति।

'हद्दण्ण'त्ति जहा– एगो कुलपुत्तओ णिययजायाणुरत्तो णिययडिंभरूवाणि उच्छंगगताणि कीलावेइ, चेडरूवसंतयाणि मुत्तपुरीसोवलित्ताइं चीवराइं पक्खालेइ, एस हद्दण्णओ त्ति।

तओ एएसु छसु वि जहाकमेण सिट्ठेसु भणियं परिसापुरिसेहिं– ''भयवं ! सव्वे वि दोसा एत्थ णिवसंति''। गिहवइणा भणियं– ''जाएसु, ण एरिसोऽहं''। चेल्लएण भणियं– ''जइ एवं ता देसु घय-गुलसणाहाओ सेवइयाओ''। ततो ''देमि'' त्ति भणंतो गओ चेल्लयसहिओ घरसमीवं। एत्थंतरम्मि साहितो से जायाभंडणवुत्तंतो खुड्डएण। ''जदि एवं ता चिट्ठसु ताव इहं''ति भणंतो पविट्ठो गेहं। भणिया गिहवइणा जाया– ''सिद्धं भोयण ?''। तीए वि तहत्ति पडिवण्णे, भणिता– ''उत्तारेसु मालाओ घयगुलं जेण [३]दुजाइणो भुंजावेमि''। ततो णीसेणीए आरूढा मालं, फेडिया तेण सिया = णीसेणि त्ति वुत्तं होइ। तओ वाहरिऊण सघयगुलपज्जत्ताहिं पडिलाहिओ चेल्लओ इट्टयाहिं। तओ तं पेच्छिऊण कतो णाए कलयलो।

(टि०) १. भे जि०॥ २. ०संधिय० जि० विना॥ ३. **बंभणो** जि१॥

(वि०टि०) ❖. **जायं** = जायां इत्यर्थः॥

खुड्डएण वि णासाणिमियंगुलिणा दावियं से णासियाए काइयावोसिरणं ति।

अत्र दोषानाह– द्वयोर्गृहपतेर्भार्यायाश्च प्रद्वेषः, तत्र वनितायाः प्रद्वेषः प्रकट एव गृहपतेस्त्वहं अनेन प्रपञ्चेन दापितः आत्मवधश्च वनितादेः सम्भाव्यते प्रवचनोपघातश्च स्यादिति गाथाष्टकार्थः ॥५००-५०७॥

प्रतिपादितो **मानपिण्डः**। अधुना **मायापिण्ड**माह– नानाविधवेष-भाषा-चेष्टादिकरणरूपया मायया समुत्पाद्यते यः स मायापिण्डः, तदुदाहरणमाह–

रायगिहे धम्मरुई असाढभूइ[१] त्ति खुड्डओ तस्स।
रायणडगेहपविसण संभोइयमोदए लंभो॥५०८॥
आयरिय उवज्झाए संघाडग काण-खुज्ज[२]-तद्दोसी।
णडपासण पज्जत्तं णिकायण दिणे दिणे दाणं॥५०९॥
धूयदुगं संदेसो दाणसिणेहकरण[३]ं रहे गहणं।
लिंगं मुय त्ति गुरुसिट्ठ विवाहे उत्तमप्पगती॥५१०॥
रायघरे[४] य कयाती णिम्महिलं णाडगं णडागच्छी।
ता य[५] विरहम्मि मत्ता उवरि गिहे दो वि पासुत्ता॥५११॥
वाघाएण णियत्तो दिस्स विचेला विराग संबोही।
इंगियणाए पुच्छा पजीवणं रट्ठपालं[६] ति॥५१२॥
इक्खागुवंस भरहो आदंसघरे य केवलं लोओ।
हारादिखिवण गमणं उवसग्ग ण सो नियत्तो त्ति॥५१३॥
तेण समं पव्वइया पंच नरसय[७] त्ति णाडए डहणं।
गेलण्ण[८]-खमग-पाहुण-थेरादिट्ठा य बितियं तु॥५१४॥दारं॥

रायगिहे गाहा। **आयरिय०** गाहा। **धूयदुगं** गाधा। **रायघरे** गाहा। **वाघाएण** गाहा। **इक्खाग०** गाहा। **तेण समं** गाहा। आसामर्थः कथानकादवसेयस्तच्चेदम्–

दीवजलहीण मज्झे सव्वाणं सव्वसारसंदोहो **जंबूदीवो** दीवो कुलसेलविभूसिओ अत्थि। तत्थ **भरह**म्मि वासे दाहिणखंडंमि अत्थि जयपयडो देसाण **मगह**देसो सोहति चक्किव्व मणुयाण। तत्थ य बहुविहगुणाभिरामं समणजणसेवियं **रायगिहं** णाम णगरं। तत्थ य पडिपक्खमत्तमायंगकुंभणिद्दलणपच्चलो पणइयणपूरियासो **सीहरहो** णाम राया। तम्मि य सीसगणपरिवुडो गामाणुगामं दूतिज्जंतो संपत्तो **धम्मरुयी** णामायरिओ। आवासिओ **गुणसिला**भिहाणे उज्जाणे तस्स य बहुविण्णाणसंपण्णो **आसाढभूती** नाम

(टि०) १. भूती य खु० जे२॥ २. खंज खं०॥ ३. दाणं सि० जे२॥ ४. गिहे जे१॥ ५. उ जे१॥ ६. ०लम्मि जे४ भां०॥ ७. ०सया उ णा० जे१॥ ८. ०ण्णे जे१॥

चेल्लओ। सो य अण्णया भिक्खट्ठा णीहरिओ। पविट्ठो णरिंदणडगेहे[1]। लद्धो तत्थ सुसंभिओ एगो मोदगो। ततो णिग्गएण चिंतियमणेण– "अहो एसो ताव आयरियाणं भविस्सति, अप्पणो अण्णं मग्गामि"। अच्छिं काणेऊण गओ। लद्धो बिइयमोदगो, "एसो वि य उवज्झायस्स भविस्सति, अप्पणो अण्णं मग्गामि।" खुज्जयरूवं काऊण अतिगओ। ततिए लद्धे "एसो संघाडइल्लस्स भविस्सति"। चतुत्थवेलाए कोढियरूवेण पविट्ठो। चउत्थो वि लद्धो। ततो एवमाइ चेल्लयविलसियं उवरितलट्ठिएण दट्ठूण चिंतियं णडेण– "अहो सुंदरो एस णडो होति, ता उवायतो एस घेतव्वो" त्ति। चिंतेऊण[2] वाहरिऊण सबहुमाणं भरियं से मोयगाणं भाणं। भणिओ य एसो– "दिणे दिणे आगंतव्वं"ति। णिग्गओ चेल्लओ। तओ साहिऊण से सयलं चेट्ठियं भणिया णडेण णियमहिला– "तुमए मोयगादिपदाणेण तहा उवयरियव्वो, धूयाहिं य अणुकूलोवसग्गेहिं तहा उवसग्गा वेयव्वो जहा णे ज्झत्ति वसमागच्छति"।

ततो णडीए तह चेव भणियाओ धूयाओ ताहिं य अणुदियहमागच्छंतस्स चेल्लयस्स सिंगारहावभाव-सवियारजंपिएहिं समावज्जियं से चित्तं। पणट्ठो गुरुवएसो, ववगता लज्जा, पम्हुट्ठो कुलाभिमाणो, उदिण्णं चारित्तावरणिज्जं कम्मं आढत्तो य परिहासखेड्डाइं काउं भणिओ य णाहिं– "जति अम्हेहिं कज्जं ता उज्झिऊण पव्वज्जं वीवाहेसु अम्हे"त्ति। तओ तहत्ति पडिवज्जिऊण गओ गुरुसमीवं। साहिओ णिययाभिप्पाओ। भणितं च गुरुणा–

"दीहरसीलं परिवालिऊण विसएसु वच्छ ! मा रमसु।
को गोपयंमि बुड्डति जलहिं तरिऊण मूढो वि[3] ॥१॥"

"भयवं ! एवमेव किंतु ण तरामि पव्वज्जं काउं" ति भणंतो मोत्तूण लिंगं गतो णडगेहं। वीवाहियाओ दोण्णि वि भणियाओ य धूयाओ पिउणा– "उत्तमपगई एसो धम्माणुरत्तचित्तो य ता तहा सुइभूयाहिं अप्पमत्ताहिं उवयरियव्वो जहा वेरग्गं ण गच्छति"त्ति। तओ भोगे भुंजंतस्स गओ से कोइ कालो।

अण्णया य णिम्महिलणाडएण राइणो दिवसपेच्छा दायव्व त्ति काऊण गया सव्वे वि रायकूलं। ततो पइरिक्कं ति काऊण ताओ णिब्भरमज्जपाणएण पम्हुट्ठचेयणाओ वियलियणियंसणाओ वमियमज्जगंधाय-ट्ठिय-भिणिभिणेंतमच्छिया दुप्पेच्छाओ सुवंति त्ति। रायणो वि दूयवियावडयाए पेच्छाए अणवसरो त्ति काऊण पच्चागया गेहं। आसाढभूती वि पविट्ठो णियं वासभवणं। तओ ताओ अच्चंतबीभच्छाओ दट्ठूण विरत्तचित्तो चिंतिउमारद्धो–

"निर्व्वाणादिसुखप्रदे नरभवे जैनेन्द्रधर्मान्विते,
लब्धे स्वल्पमचारु कामजसुखं नो सेवितुं युज्यते।
वैडूर्य्यादिमहोपलौघनिचिते प्राप्तेऽपि रत्नाकरे,
लातुं ह्रस्वमदीप्तिकाचशकलं किं साम्प्रतं साम्प्रतम् ॥१॥
प्रतिदिनमलं लोभाघ्रातश्चिनोमि रजोऽशुभम्,
वसति च तनौ व्याधिव्रातो जरा समुपगता।

(टि०) १. गेहं जि० जि१॥ २. चिंतंतेण जि० जि१॥ ३. त्ति जि१॥

हरति नितरामायुष्कालो मृतस्य महाभयम्,
किमिह शरणं ? ज्ञातं धर्म्मस्तथाऽपि विलम्ब्यते॥२॥''

ततो णीहरंतो वासभवणाओ इंगियाकारकुसलेण ससुरएण लक्खिऊण खिंसिऊण भणियाओ धूयाओ– ''भत्तारो भे विरत्तो, पट्ठिओ गंतुं, ता जीवणं मग्गह'' त्ति। मग्गितो ताहिं पडिवण्णं च णेणं। ततो सत्तरत्तेण णिम्मवियं सिरि**भरहणरिंदचक्कवट्टि**चरियसंबद्धं **रट्ठपाला**भिहाणं णाडयं ति। ततो विण्णत्तो णेहिं सीहरहणरिंदो– ''देव ! आसाढभूतिणा अपुव्वं णाडयं रइयं; तं च पंचभिपुरिसपत्तसएहिं णच्चियव्वं। ताणि पसाई करेउ देवो जेण णच्चम्ह''। ततो दिण्णाणि राइणा रायउत्ताणं पंचसयाणि। लाइयाओ सिं जहाणुरूवं भूमियाओ। ततो समाढत्तो णरिंदपुरओ णच्चिउं आसाढभूई पंचसयपरिवारो जहा **इक्खाग-कुल**णहयलामलमियंकेण सिरिभरहणरिंदचक्कवट्टिणा सट्ठीए वाससहस्सेहिं छखंडभरहविजओ कतो, जहा णिहिणो रयणाणि य समुप्पण्णाणि, जह य बारससंवच्छरितो महारायाभिसेओ कतो, पंचविहभोगा य भुत्ता एवं णच्चंतेण तह परितोसितो सपरिवारो राया जहा सव्वालंकारे खिवित्ता वि दिण्णसाहुक्कारो एक्कपोत्तितो चेव पेच्छिउमाढत्तो। एत्थंतरम्मि भरहो विव आयंसघरमतिगतो तम्मि य सरीरसिरिं पुलयंतस्स णिवडिओ अंगुलियओ। मुक्काणि य कमेण सेसाभरणाणि। जातो संवेगो, समुप्पण्णं केवलणाणं, पंचसयपरिवारेणा-ऽसाढभूतिणा कतो पंचमुट्ठिओ लोओ। गहियं दव्वलिंगं। ततो धम्मलाभिऊण णरिंदं णिग्गंतुमारद्धो। ''हा ! किमेयं''ति भणंतेण राइणा महिलाहिं य धरिउमाढत्तो ''महाराय ! किं भरहणरिंदो णियत्तो जेणाऽहं णियत्तामि''त्ति भणंतो णिग्गओ सह गहियसाधुलिंगेहिं णरिंदतणएहिं ति। पच्छा य **कुसुमपुरे** तं णाडयं णच्चिज्जमाणं बहुओ जणो पव्वइय त्ति। दट्ठं णाडयं णागरएहिं।

एवंविधो मायापिण्डो न ग्राह्यः। अपवादं त्वाह– सप्तमगाथापश्चार्द्धेन ग्लान-क्षपक-प्राघूर्ण्णक-स्थविराद्यर्थं मायापिण्डोऽपि ग्राह्य इति गाथासप्तकार्थः॥५०८-५१४॥

उक्तो **माया**पिण्डः। **लोभपिण्ड**माह– लोभाल्लोभेन लोभवतो वा पिण्डो लोभपिण्डः। अयं च क्रोधपिण्डादिष्वन्तर्भूतोऽपि लोभगरीयस्त्वख्यापनार्थं पृथक् प्रतिपाद्यत इत्याह–

लब्भंतं पि ण गेण्हइ अण्णं अमुगं ति अज्ज [१]घेच्छामि।
भद्दरसं ति [२]व काउं गेण्हइ खद्धं सिणिद्धादी॥५१५॥

लब्भंतं पि गाहा। व्याख्या– **लभ्यमानमपि न गृह्णात्यन्यत्**, '**अमुगं ति**' अमुकं हृदय-व्यवस्थितमिष्टं **ग्रहीष्यामी**ति कृत्वा। '**भद्दरसं ति**' शोभनरसमिति (**वा**) [३]**कृत्वा गृह्णाति** '**खद्धं**'ति प्रभृतं **स्निग्धादी**ति गाथार्थः॥५१५॥ उदाहरणमाह–

चंपा छणम्मि [४]घेच्छामि मोदए [५]ते य सीहेकसरए।
पडिसेह धम्मलाभं कातूणं सीहकेसरए॥५१६॥
सड्ढऽड्ढरत्त केसरभायणभरणं च पुच्छ पुरिमड्ढे।

(टि०) १. **लब्भामि** खं० जे१॥ २. **य** खं० जे१॥ ३. **मत्वा** जि० जि१॥ ४. **लब्भामि** खं० जे२॥ ५. **तीय** खं०॥

उवओग संत चोदण साहु त्ति विगिंचणे णाणं॥५१७॥ दारं॥

चंपा च्छणंमि गाहा। **सङ्घ ऽङ्घरत्त** गाहा। अनयोरर्थः कथानकादवसेयस्तच्चेदम्– **चंपाए** छणदियहे एगो खमगो अज्ज मए सिंघकेसरमोयगा घेत्तव्व त्ति गहियाभिग्गहो भिक्खं भमंतो सेसं लभमाणं पि पडिसेहेति। ततो अलब्भमाणस्स समुप्पण्णो से संकिलेसपरिणामो। ततो तग्गयचित्तत्तणउ सुण्णहिययस्स धम्मलाहभणणे वि सिंघकेसरए त्ति समुल्लवंतस्स पत्ता रयणी। अङ्घरत्तसमए य सिंहकेसर त्ति भणमाणो गतो सावयघरं। मुणियाहिप्पाएण य सावएण भरिऊण से भायणं सिंघकेसरयाणं। भणियमुवाएण– "भयवं ! पुरिमड्ढो मए पच्चक्खातो ता पुण्णो ण व ?"त्ति। दिण्णोवओगेण य साहुणा पुलोइयं गयणं, दिट्ठो तारागणपरिवुडो णहयलमज्झे मयलंच्छणो। ततो पडियागयचित्तो संमं चोइओ त्ति भणंतो णिग्गओ। ततो विहीए परिट्ठवंतस्स पसत्थज्झाणोवगयस्स अपुव्वकरण-खवगसेढिपुव्वयं समुप्पण्णं से केवलणाणं ति।

एवं केत्तिया परिचोयगा भविस्संति, तम्हा लोभपिंडो ण घेत्तव्वो त्ति गाथाद्वयार्थः॥५१६-५१७॥

उक्तो **लोभपिण्डः**। अधुना **संस्तवपिण्डमाह**– संस्तवनं = संस्तवः, परिचयः, वर्णनम्, सङ्कथनमित्यनर्थान्तरम्; स च द्विविधेत्याह–

दुविहो [१]य संथवो खलु संबंधी-वयणसंथवो चेव।
एक्केक्को [२]वि य दुविहो पुव्वं पच्छा य णायव्वो॥५१८॥

दुविधो य गाहा। व्याख्या– **द्विविधश्च संस्तवः खलु**, खल्विति वाक्यालङ्कारे, चशब्दस्तु स्वगतानेकभेदसंसूचकस्तदेव द्वैविध्यमाह– **सम्बन्धिसंस्तवो वचनसंस्तवश्च**, अनयोश्च स्वरूपं वक्ष्यति। अनयोश्चैकैको द्विविधः– **पूर्वसंस्तवः पश्चात्संस्तवश्च ज्ञातव्य** इति गाथार्थः॥५१८॥

तत्र सम्बन्धिसंस्तवं द्विभेद[३]माह–

मातिपिइ पुव्वसंथवो सासू-ससुरा[४]दिगाण पच्छा उ।
गिहिसंथवसंबंधं करेइ पुव्वं व पच्छा वा॥५१९॥

मायि० गाहा। व्याख्या– **मातृ-पित्रादिसंस्तवः पूर्वसंस्तवः**, तेषामाद्यत्वात्; **श्वश्रू-श्वशुरादीनां** सम्बन्धिसंस्तवः **पश्चात्संस्तवः**, तेषां पश्चात्कालभावित्वात्। स च भिक्षुर्गृहिसंस्तवसम्बन्धं करोति **'पुव्वं व पच्छा व'**त्ति पूर्वसंस्तवं मात्रादिलक्षणम्, पश्चात्संस्तवं श्वशुरादिलक्षणमिति गाथार्थः॥५१९॥

कथं चासौ संस्तवं करोतीत्याह–

आयवयं च परवयं णाउं संबंधते तदणुरूवं।
मम माया एरिसिया ससा व धूता व णत्तादी॥५२०॥

आयवयं च गाहा। व्याख्या– **आत्मीयं वयः** शरीरावस्थालक्षणं **परकीयं** च दातृवय इत्यर्थः, **ज्ञात्वा सम्बध्नाति तदनुरूपम्** = वयोऽनुरूपमित्यर्थः, यादृशी त्वं तादृशी **मम माता, स्वसा, दुहिता,**

(टि०) १. उ जे४ भां०॥ २. **च्चिय** जे२॥ ३. **०दमप्याह** जि० जि१॥ ४. **०दिओ** जे२॥

नप्त्रादिर्वेति गाथार्थः ॥५२०॥ सम्बन्धि(रूप)पूर्व्वसंस्तवोदाहरणमाह–

अद्धिति दिट्ठीपण्हय[१] पुच्छा[२] कहणं ममेरिसी जणणी।
थणखेवो संबंधो विधवासुण्हाइ[३]दाणं च॥५२१॥

अद्धिइ गाहा। व्याख्या– कश्चिद् भिक्षार्थं गतः साधुराहारार्थं मातृस्थानतो मातृसदृश्यगारीपुरतः '**अद्धिई दिट्ठीपण्हव**'त्ति अधृतिपूर्व्वकं दृष्टिप्रस्नवम् = साश्रुलोचनत्वं चकार। '**पुच्छ**'त्ति पृष्टस्तया "किमेतद् ?" इति। ततः कथितं च तेन– "**ममेदृशी जननी** भवत्या सदृश्याऽऽसीत्"। "अहमपि तव मातैवे'ति [४]ब्रुवत्या **कुचप्रक्षेप**[५]**प्रस्तन्मुखे** कृतः, **सम्बन्धः** सञ्जातो **विधवास्नुषादिदानं च** साधोरिति, एवं पित्रादिसम्बन्धस्याऽप्युपलक्षणमेतदिति गाथार्थः ॥५२१॥

पश्चात्संस्तवेऽप्यधृति-दृष्टिप्र[५]स्नुति-पृच्छाद्येवमेव वाच्यम्, दोषांस्तु निर्युक्तिकार एवाह–

पच्छासंथव दोसा सासू[६] विधवादिधूयदाणं च।
भज्जा ममेरिसि च्चिय[७] सज्जो घाओ[८] व भंगो व॥५२२॥

पच्छासंथव गाहा। व्याख्या– **पश्चात्संस्तवे दोषाः** ◆**श्वश्रूर्विधव(?वा)दुहित्रादिदानं** कुर्य्यात्। साधु(?साधो)र्वा **भार्य्या ममेदृशी** पूर्व्वमासीद् यादृशी त्वमित्येवमुक्ते **सद्यो घातो वा 'भंगो व'**त्ति व्रतभङ्गो वा स्यादिति॥५२२॥

श्वशुरादिष्वप्येवमेव संस्तवदोषाः वाच्याः। द्विविधस्याऽपि सम्बन्धिसंस्तवस्य दोषप्रदर्शनायाह–

मायावी चडुकारी अम्हं ओभावणं कुणइ एसो।
णिच्छुभणादी पंतो[९] करेज्ज भद्दो[१०] उ पडिबंधो॥५२३॥दारं॥

मायावी गाहा। व्याख्या– **मायावी चाटूकारी अस्माकं 'ओहावण'**त्ति तिरस्कारं **करोत्येष** श्रमणकः, तद्द्रव्यान्यद्रव्यहानिर्वध-बन्धन-निष्कालनादिदोषान् **प्रान्तः** = प्रत्यनीकः **कुर्य्यात्, भद्रकस्तु प्रतिबन्धं कुर्य्यादि**ति गाथार्थः ॥५२३॥

सम्बन्धिसंस्तवो द्विविधोऽप्युक्तः। अधुना वचनसंस्तवो द्विभेदस्तत्राऽपि पूर्व्वसंस्तवमाह–

गुणसंथवेण पुव्वं संतासंतेण जो थुणेज्जाहि।
दातारमदिण्णम्मि उ सो पुव्विं संथवो होदि॥५२४॥

गुणसंथवेण गाहा। व्याख्या– गुणास्त्यागादयस्तैः संस्तवो = **गुणसंस्तवस्तेन, पूर्व्वं** दानात्, **सता** = विद्यमानेन, **असता** = अविद्यमानेन वा **यः** साधुः **संस्तुयाद् दातारमदत्ते** दाने **स पूर्व्वसंस्तव** इति

(टि०) १. पण्हुव जे१,२॥ **२. पच्छा** जे१॥ **३. ०ण्हापदा०** जे४ भां० विना॥ **४. वदन्त्या** ला०॥ **५. प्रश्रुति** जि० जि१॥ **६. सासू य** जे४ भां०॥ **७. ०सित्तिय** जे१,२॥ **८. य** खं०॥ **९. पंता** खं० जे१॥ **१०. भद्देसु** जे२ विना॥
(वि०टि०) ◆. मम श्वश्रूस्त्वत्तुल्या अभूदिति साधुर्जल्पति; तदा सा गृहस्थी स्नेहवशाद् आत्मनर्विधवदुहित्रादिदानं कुर्य्याद् इति भावः॥

गाथार्थः ॥५२४॥ तत्स्वरूपमाह–

सो एसो जस्स गुणा वियरंति अवारिया दसदिसासु[१]।
इहरा कहासु सुणिमो पच्चक्खं अज्ज दिट्ठो सि॥५२५॥

सो एसो गाहा। व्याख्या– **स एष यस्य गुणा विचरन्त्यनिवारिता दशसु दिक्षु इतरथा कथासु श्रुणुमः प्रत्यक्षमद्य दृष्टोऽसीति** गाथार्थः ॥५२५॥ पश्चात्संस्तवमाह–

गुणसंथवेण पच्छा संतासंतेण जो थुणेज्जाहि।
दातारं दिण्णंमी[२] सो पच्छासंथवो होदि॥५२६॥

गुण० गाहा। व्याख्या– **गुणसंस्तवेन** दानात् **पश्चात् सताऽसता** वा **यः स्तुयाद्दातारं दत्ते** दाने **स पश्चात्संस्तवो भवतीति** गाथार्थः ॥५२६॥ तद्रूपमाह–

विमलीकयऽम्ह चक्खू जहत्थओ वियरिया गुणा तुब्भं।
आसि पुरा[३] मे संका संपइ निस्संकियं जायं॥५२७॥ दारं॥

विमली० गाहा। व्याख्या– **विमलीकृते अस्मच्चक्षुषी यथार्थतो[४] विचरिता गुणास्तव आसीत् पुरा मम शङ्का साम्प्रतं निःशङ्कितं जातमिति** गाथार्थः ॥५२७॥ अत्राऽपि भद्रक-प्रान्तादयो दोषा द्रष्टव्या इति। प्रतिपादितः **संस्तवपिण्डः**। अधुना **विद्या-मन्त्रपिण्डद्वयमाह–**

विज्जा-मंतपरूवण विज्जाए भिक्खुवासओ होइ।
मंतंमि सीसवेदण तत्थ मुरुंडेण दिट्ठंतो॥५२८॥

विज्जा-मंत० गाहा। व्याख्या– **विद्या-मन्त्रयोः प्ररूपणम्** = स्वरूपान्[५]वाख्यानं, कर्त्तव्यमिति शेषः, तच्चेदम्-**प्रज्ञप्त्या**दिदेवताधिष्ठिता विद्या, **नागराजा**दिदेवाधिष्ठितस्तु मन्त्रो, अथवा ससाधना विद्या साधनरहितस्तु मन्त्र इति। उक्तं च–

"इत्थी विज्जाभिहिता पुरिसो मंतो त्ति तव्विसेसोयं।
विज्जा ससाहणा वा साहणरहिओ य मंतो त्ति॥१॥ ( )

[६]विद्यायां **भिक्षूपासको भवति**, उदाहरणमिति शेषः, **मन्त्रे शिरोवेदना तत्र** = तस्यां शिरोवेदनायां **मुरुण्ड**राजेन **दृष्टान्त** इति गाथाक्षरार्थः ॥५२८॥ भावार्थस्तु कथानकाभ्यामवसेयः[७], तत्र विद्याकथानकं तावदाह–

परिपिंडितमुल्लावो अतिपंतो भिक्खुवासगो दावे।
जइ इच्छह[८] तो जाणह मं घय-गुल-वत्थाणि दावेमि॥५२९॥
गंतुं विज्जामंतण किं देमि ? घयं गुलं[९] व वत्थादी।

(टि०) १. साओ जे१॥ २. ०ण्णंमि उ सो खं० जे१॥ ३. णे खं० जे१॥ ४. विरचिता ला०॥ ५. ०पाख्या० जि१॥ ६. विद्यापिण्डे जि१॥ ७. ०कादवसे० ला०॥ ८. ०ह जाण अहं घय० जे४ भां० जे२॥ ९. च जे४ भां०॥ १०. मि खं० जे४ भां०॥

दिण्णे पडिसाहरणं केण हियं केण मुट्ठो [१०]म्हि॥५३०॥

परिपिंडि० गाधा। **गंतुं** गाधा। (व्याख्या–) **परिपिण्डिता**नां साधूनां परस्पर**मुल्लापो** यथाऽसा**वतिप्रान्तो भिक्षूपासको** न अस्मभ्यं ददाति, अतः कस्तं दापयेत् ? तत्र एको यतिराह– "**यदीच्छथ ततोऽनुजानीध्वं मां** येनाऽहं **घृत-गुड-वस्त्राणि दापयामी**"ति। ततो **गत्वो**पासकगृहं **विद्ययाऽसौ** अभिमन्त्रितः। साधूनिदमाह– "**किं** युष्मभ्यं **ददामि** घृतं गुडं वस्त्रादि वा ? दत्ते च घृतादौ उपसंहरणं कृतं साधुना विद्यायाः, तदुपसंहरणानन्तरं च समागतचेता विलपितुमारब्धः– "**केन** मदीयं **हृतं केन** वाऽहं **मुषितोऽस्मी**"ति गाथाद्वयार्थः॥५२९-५३०॥ अत्र दोषानाह–

पडिविज्जथंभणादी सो वा अण्णो व से करेज्जाहि।
पावाजीवी मायी कम्मणकारी य गहणादी॥५३१॥ दारं॥

पडिविज्ज० गाहा। व्याख्या– **प्रतिविद्यया स्तम्भनादि**, आदिशब्दाद् वध-बन्धनादि, **स** एवोपासकस्त[१]**दन्यो वा 'से'** तस्य विद्याप्रयोक्तुर्यतेः **कुर्य्यात्**; तथा लोकाश्च तमाहुः– "**पापजीवी मायी कार्म्मणकारी** चायं साधुः", ततो **ग्रहणादयो** दोषाः परिभवादिदोषा जायन्त इति गाथार्थः॥५३१॥

साम्प्रतं मन्त्रोदाहरणमाह–

जह जह पदेसिणिं जाणुगम्मि पालित्तओ भमाडेइ।
तह तह [२]सीसे वियणा पणस्सति मुरुंडरायस्स॥५३२॥

जह जह गाहा। व्याख्या– **यथा यथा प्रदेशिनीम्** = तर्जनीमङ्गुलीं **जानुनि प्रदीप्तक**सूरि**र्भ्रमयति तथा तथा शिरसि वेदना प्रणश्यति मुरुण्डराजस्य**; स च तस्मै पिण्डाद्यदादित्येवंविधश्च पिण्डो न ग्राह्यः यतोऽमी दोषाः॥५३२॥

पडिमंतथंभणादी सो वा अण्णो व से करेज्जाहि।
पावाजीवी माई कम्मणकारी भवे बिइओ॥५३३॥ दारं॥

पडिमंत० गाहा। उक्तार्थैव॥५३३॥

उक्तं **विद्यापिण्ड-मन्त्रापिण्ड**द्वयम्। अधुना **चूर्णपिण्ड-योगपिण्ड-मूलकर्म्मपिण्डा**नाह–

तत्र वशीकरणा-ऽञ्जना-ऽन्तर्द्धानकरणरूपाश्चूर्णाः, पादप्रलेपादयः सौभाग्य-दौर्भाग्यकारिणो वा औषधविशेषा योगाः, वीवाह-गर्भोत्पादन-गर्भशातनादिलक्षणं मूलकर्म्मेति। आह–

चुण्णे अंतद्धाणे चाणक्के[३] पादलेवणे [४]जोगे।
मूल विवाहे दो दंडिणी उ आदाण-परिसाडे॥५३४॥

चुण्णे गाहा। व्याख्या– **चूर्णान्तर्द्धाने चाणक्य** उदाहरणं **पादप्रलेप**लक्षणे **योगे समिता**चार्य्य उदाहरणं '**मूले**'त्ति मूलकर्म्मणि वीवाहकरणं (?णे) **द्वे दण्डिकिन्यौ** गर्भा**दान-परिशातनयो**रुदाहरणमिति

(टि०) १. ०दन्ये ला०॥ २. ०ह से सिर जे२॥ ३. ०णक्कौ जे१॥ ४. समिया जे१,२॥

गाथासमुदायार्थः ॥५३४॥

साम्प्रतं चूर्णोदाहरणमाह–

जंघाहीणा[१] ओमे कुसुमपुरे[२] सिस्सजोग रहकहणं[३]।
खुड्ड दुगंजणसुणणं गमणं देसंत ओसरणं॥५३५॥
भिक्खे[४] परिहायंते थेराणं तेसि ओमे देंताणं।
सह भोज्ज चंदगुत्ते ओमोदरियाए दोब्बल्लं[५]॥५३६॥
चाणक्क पुच्छ इट्टालचुण्ण दारं पिहित्तु[६] धूमे य।
दट्ठुं कुच्छ पसंसा थेरसमीवे उवालंभो॥५३७॥

जंघा० गाहा। **भिक्खे** गाहा। **चाणक्क०** गाहा। आसामर्थः कथानकादवसेयस्तच्चेदम्–

पाडलिपुत्ते णगरे **चंदउत्तो** राया, **चाणक्को** से मंती। तत्थ य आयरिया जंघाबलपरिहीणा ओमे गच्छं विसज्जिउकामा सीसस्स पत्तभूयस्स रहे **जोणीपाहुडं** साहेंता णिसुया पच्छण्णठिएहिं दोहिं खुड्डएहिं। तत्थ य अवधारिओ एक्को अंजणचुण्णओ। गओ गच्छो देसं। ततो य णियत्ता चेल्लया। भणिया आयरिएहिं– "दुट्ठू भे कयं जं णियत्तं ति; ता संपयं चिट्ठह"त्ति। तत्थ य अलभमाणाए भिक्खाए मा उमोयरियाए गुरूणं पीडा होउ[८] त्ति काऊण चुन्नंजणंजियलोयणा अदिस्समाणा चंदगुत्तेण सहाणुदिणं एगत्थ समुद्दिसंति। ततो संपुण्णाहाराभावाओ दुब्बलीभूओ राया। पुच्छिओ चाणक्केण– "किण्ण उद्धट्टसि ?"। तेण भणियं– आमं। "णूणमेयस्स कोवि पच्छण्णट्ठितो आहारमवहरइ"त्ति चिंतंतेण चाणक्केण पत्थराविओ भोयणमंडवे इट्टालचुण्णो, पिहियाणि दाराणि, कारावितो धूमो। तओ णिब्भरधूमगलंतंसुधोयचुण्णंजणा दिट्ठा समुद्दिसंता खुड्डया। गहिया चाणक्केण वंदिऊण विसज्जिया। जाया य दुगुंच्छा चंदगुत्तस्स। पसंसियं चाणक्केण जहा–"पवित्तीकओ तुमं रिसिकुमारएहिं"ति। चाणक्केण वि गंतूण गुरुसमीवमुवालद्धा चेल्लया। गुरुणा वि उवालंभिऊण चेल्लए उवालद्धो चाणक्को– "एरिसो तुमं सावगो जेण साहूणं पि ण जोगवहणं वहसि"। ततो मिच्छामिदुक्कडं दाऊण "भयवं ! संपयं वहामि"त्ति भणंतो वंदिऊण णिग्गओ चाणक्को त्ति॥५३५-५३७॥ अत्र दोषानाह–

जे विज्ज-मंतदोसा ते च्चिय वसिकरणमादिचुण्णेहिं।
एगमणेगपदोसं कुज्जा पत्थारओ वावि॥५३८॥दारं॥

जे विज्ज० गाहा। व्याख्या– **ये विद्या-मन्त्र**पिण्डयोर्दोषास्त **एव वशीकरणादिचूर्ण**-समुत्पादितपिण्डे सविशेषतरा दृष्टव्याः। कथम् ? स पिण्डदाता **एकस्य अनेकेषां** चोपरि **प्रद्वेषं कुर्यात्; 'पत्थारओ वावि'**त्ति समस्तसङ्घस्य वधमपीति, अतश्चूर्णपिण्डो न ग्राह्य इति गाथार्थः॥५३८॥

(टि०) १. ०घाईहीणे जे२॥ २. पुरि खं०॥ ३. ०करणं जे१,२ विना॥ ४. ०क्खं जे१॥ ५. दोवण्णं जे२॥ ६. विवेउ जे१॥ ७. भणियं ला०॥ ८. होइ त्ति ला०॥

भणितश्शून्यपिण्डः। अधुना **योगपिण्डः** कथ्यते। तत्राऽपि प्राक् तत्स्वरूपं दर्शयन्नाह–

सूभगदोभग्गकरा जोगा आहारिमा य इतरे य।
आघंस-धूम[१]-वासा पादपलेवादिणो इयरे॥५३९॥

सूभग० गाधा। व्याख्या– **सौभाग्य-दौर्भाग्यकरा योगाः**, ते चोपाधिभेदा(द्) द्विधा '**आहारिम**'त्ति अभ्यवहार्य्या **इतरे** चाऽनभ्यवहार्य्याः, **आघर्ष-धूम-वासादयोऽभ्यवहार्य्या**, तत्र आघर्षश्चन्दनं धूम-वासाः प्रतीता एव, **पादप्रलेपादयस्त्वितरे** अनभ्यवहार्य्या इति गाथार्थः॥५३९॥

तत्रानभ्यवहार्य्यपादप्रलेपोदाहरणमाह–

णदि कण्हबिण्ण दीवे पंचसया तावसाण निवसंति।
पव्वदिवसेसु कुलवति पालेवुत्तार सक्कारो॥५४०॥
जण सावगाण खिंसण समिय[२]क्खण माइठाण लेवेणं।
सावगपयत्त[३]करणं अविणय लोए चलण धोवे॥५४१॥
पडिलाभिय वच्चंता णिब्बुड णदिकूलमिलण समिगाते[४]।
[५]विम्हय पंचसया तावसाण पव्वज्ज साहा य॥५४२॥दारं॥

णइ कण्ह० गाहा। **जण** गाहा। **पडिलाहिय** गाहा। आसामर्थः कथानकादवसेयस्तच्चेदम्–

अत्थि **आहीर**विसए **अचलपुरं** णाम णगरं। तस्स य णातिदूरे **कण्ह-बेण्णा**भिहाणाओ दो णईओ। ताणं अंतरे (बंभणाम दीवे) णिवसति पंचसयतावसपरिवारो कुलवती। सो य पव्वदियहेसु जोगोवलित्तपायपाउआरूढो समुत्तरिऊण तं णदिं भोयणट्ठा णगरमागच्छति। आउट्टो तस्स लोओ पच्चक्खो एस देवो त्ति। पूयासक्कारं करेति जणाओ य संजायओहाम(?व)णेहिं सावएहिं सिट्ठं **वइरसामि**माउलग-**अज्जसमियसूरी**णं। भणियं च णेहिं– थेवमेयं जं माइट्ठाणपायप्पलेवजोगेण णइसमुत्तरणं ति। सावएहिं य विण्णायतप्पयोगेहिं गेहे णिमंतिऊण णीओ कुलवती गेहं।

अणिच्छंतस्स वि बहुमाणओ पक्खालिया से चलणा पाउआओ य। दिण्णं से भोयणं। पच्छा सयलजणपरिवु[६]डा तेण समं गता णदिसमीवं सावगा। पयट्टो कुलवई। णिब्बुडो जलमज्झे, जाया से खिंसणा। एत्थंतरंमि समागया अज्जसमियसूरिणो। लोयबोहणत्थं च चप्पुडियं दाऊण भणियमणेहिं– "बेण्णे ! पारं गंतुमिच्छामि"। लग्गा तीसे एक्कत्थ बेण्णि वि तडा। जाओ विम्हओ। गया सयलजणसहिया तावसासमं सूरिणो। पडिबोहितो लोगो। पव्वाविया पंचसया तावसाणं। एवं पवयणमुब्भासिऊण गया णगरं। सूरिणो जाया य **बंभदीवगसाह** त्ति॥५४०-५४२॥

एवंविधयोगसमुत्पादितः पिण्डो न ग्राह्य इति।

अभिहितो **योगपिण्डः**। **मूलकर्मपिण्ड**माह– तत्र मूलकर्म्मैव व्युत्पाद्यते– मूले मूलात् मूलस्य मूलमेव वा कर्म्म मूलकर्म्म। किमुक्तं भवति– सांसारिकसुखस्य मनुष्यदेहोत्पत्तेर्वा मूलं वीवाहस्तदन्तर्गतं

(टि०) १. **धूव०** जे१,२॥ २. **०यच्छण** जे१॥ ३. **०यडक०** खं०॥ ४. **मियातो** जे१,२॥ ५. **विम्हिय** जे२॥ ६. **०वुडेण ते०** जि०॥

कर्म्म मूलकर्मेति। तदुदाहरणायाह–

अद्धिति पुच्छा आसण्णविवाहो[१] भिण्णकण्णसाहणया।
आयमण-पियण-ओसह अक्खय[२] जज्जीव[३] अधिकरणं॥५४३॥

अद्धिति गाहा। व्याख्या– एगो साहू भिक्खं हिंडंतो पत्तो दाणसड्ढियाए घरं। दिट्ठा य सा अट्टदुहट्टोवगया। अद्धितिं कुणमाणी पुच्छियाणेण– "किमद्धिइं कुणसि ?" तीए भणितं–

"जो य ण दुक्खं पत्तो, जो य ण दुक्खस्स णिग्गहसमत्थो।
जो य ण दुहिए दुहिओ, कह तस्स कहिज्जए दुक्खं।"

ततो साहुणा भणितं–

"अहयं दुहिए दुक्खं पत्तो, अहयं दुक्खस्स णिग्गहसमत्थो ।
अहयं दुहिए दुहिओ मज्झं च कहिज्जए दुक्खं।"

ततो तीए भणियं– "आसण्णो मे धूयाए वारेज्जदिवसो, सा य भिण्णजोणि"त्ति। ततो तेण आयमण-पियण-ओसहपदाणेण अक्खयजोणी कता।

अत्र दोषमाह– यावज्जीवमधिकरणमिति गाथार्थः ॥५४३॥ अत्रैव द्वितीयोदाहरणमाह–

जंघापरिजितसड्ढी अद्धिति आणिज्जते मम सवत्ती।
जोगो[४] जोणुग्घाडण[५] पडिलेह[६] पदोस उड्डाहो॥५४४॥

जंघापरिजिय० गाधा। व्याख्या– **जङ्घापरिचितश्राद्धिकाम्** = गमनागमनपरिचितश्राद्धिकामित्यर्थः, **अधृतिमतीं** दृष्ट्वा साधुः पप्रच्छ। तया चोक्तं "**आनीयते मम सपत्नी** भर्त्रे"ति अन्यां परिणेष्यतीत्यर्थः। तेन च साधुना[७] योगप्रदानेन विवृतयोनिः सा कारिता। मूलपत्न्याऽपि कथितं भर्त्तुर्यथा– "असौ भिन्नयोनिः"। तेन च वेश्यया निरूपणां कारयित्वा भिन्नेति ज्ञात्वा परिहृता। एतच्च यदि कथञ्चिद् जानन्ति तत्स्वजनास्तत **उड्डाहं**[८] वध-बन्धनादींश्च साधोः कुर्व्वन्तीति गाथार्थः ॥५४४॥ एवं वा मूलकर्म्म साधुः कारयतीत्याह–

मा ते फंसेज्ज कुलं अदिज्जमाणा सुता वयं पत्ता।
धम्मो य लोहियस्स य जइ[९] बिंदू तत्तिया णरगा॥५४५॥

मा ते गाहा। व्याख्या– कश्चित् साधुर्भिक्षार्थं प्रविष्टः पिण्डलोभेन बृहत्कुमारीं दृष्ट्वा तज्जननीमेवमाह– **मा तव** दुहिता '**फंसेज्ज**'त्ति दूषयेत् **कुलं अदीयमाना** सती, वरायेति गम्यते। किं विशिष्टा? **वयः प्राप्ता**, लौकिकाश्चैवमाहुः– **धर्म्मश्च** = स्वभावोऽयं **लोहितस्य यावन्तो बिन्दवस्तावन्तो नरका** इति गाथार्थः ॥५४५॥ प्रकारान्तरेणाह–

किं ण ठविज्जइ पुत्तो पत्तो कुल-गोत्त-कित्तिसंताणो।

(टि०) १. ०वाहा जे२। **०वाह** खं०॥ **२. अक्खुय** जे१॥ **३. जोणी य अधि०** खं० जे२॥ **४. ०पयणुग्घा०** जे१॥ **५. ०डिसेह** जे१॥ **६. ०रिणिनीष्यती०** जि१॥ **७. योगप्रयोगप्रदा०** जि१॥ **८. उड्डाहो** ला०॥ **९. विज्जं** जि१॥
(वि०टि०) ❖. अधिकरणम् – मैथुनप्रवृत्तिप्रभृति॥

पच्छा वि य तं कज्जं[१] असंगहो मा य णासेज्जा॥५४६॥दारं॥

किं ण गाहा। व्याख्या– **किं न स्थाप्यते** अनेकार्थत्वाद्धातूनां किं न विवाह्यत इत्यर्थः, **पुत्रः** = तनयः **'पत्तो'**त्ति प्राप्तवयाः **कुलगोत्रकीर्त्तीनां सन्तानः** = प्रवाहः, **पश्चादपि च तद्** विवाहकर्म्म **कार्यम्,** अतोऽधुनैव क्रियताम्, न विद्यते सङ्ग्रहोऽस्येति **असङ्ग्रहः** = अपरिणीतः सन् **मा नश्येत्** = क्वापि यायादिति गाथार्थः॥५४६॥ प्रागुपन्यस्तदण्डिकिनीद्वयोदाहरणमाह–

किं अद्धिइ त्ति पुच्छा सवत्तिणी गब्भिणी त्ति मे देवी।
गब्भादाणं तुज्झ वि करेमि मा अद्धिइं कुणसु॥५४७॥

किं अद्धिइं गाहा। व्याख्या– केनचित् गोचरप्रविष्टेन यतिना पिण्डलिप्सुना दानशिला राज्ञी पृष्टा– **"किं** त्वं **अधृतिमती** ?" ति। सा चावोचत्– **"मम सपत्नी देवी गर्ब्भिणी** तस्याश्च पुत्रः समादिष्टो दैवज्ञेन।" एतदाकर्ण्य साधुराह– **"गर्भाधानं तवापि करोमि, अधृतिं मा कार्षी"**। दत्तं चौषधमिति गाथार्थः॥५४७॥ औषधप्रदानानन्तरं सा पुनरप्याह–

जइ वि सुतो मे होहिति[१] तह वि कणिट्ठो त्ति इतरो जुवराया।
देइ परिसाडणं से णाए य पदोस पत्थारो॥५४८॥

जइ गाहा। व्याख्या– **"यद्यपि सुतो मम भविष्यति** त्वदीयौषधप्रभावात् सोऽपि **कनिष्ट इति, इतरस्तु** सपत्नीपुत्रो **युवराजा** भविष्यतीति; अतस्तद्दीर्घतैव पलाशानाम्"। एवं कथिते साधुर्ददाति तत्सपत्न्या गर्भपरिशातनकृद् औषधमिति। अत्र दोषानाह– ज्ञाते च प्रद्वेष-प्रस्तारादयो दोषाः स्युरिति गाथार्थः॥५४८॥ समस्तमूलकर्म्मदोषानाह–

संखडिकरणे काया कामपवित्तिं च कुणइ एगत्थ।
एगत्थुड्डाहादी जज्जिय भोगंतरायं च॥५४९॥

संखडि० गाहा। व्याख्या– वीवाह**संखडीकरणे 'काय**'त्ति कायानां वधः **कामप्रवृत्तिं च करोति, एकत्र** संयोजितायां एकत्र वियोजितायां यावज्जीव**मुड्डाहादिर्यावज्जीवं भोगान्तरायं चे**ति गाथार्थः॥५४९॥

एवंविधमूलकर्म्मसमुत्पादितः पिण्डो न कल्पते साधूनामिति।

अभिहिता षोडशद्वारात्मिकोत्पादनैषणा, तदभिधानाच्च समाप्ता गवेषणैषणा। साम्प्रतं ग्रहणैषणायाः सम्बन्धं कुर्व्वन्नाह–

एवं तु गविट्ठस्सा[२] उग्गम-उप्पायणाविसुद्धस्स।
गहणविसोहिविसुद्धस्स होइ गहणं तु पिंडस्स॥५५०॥

एवं तु गाहा। व्याख्या– **एवं** त्वनन्तरोक्तविधिना **गवेषितस्य 'उद्गमोत्पादनाविशुद्धस्य'** तत्रोद्गमोत्पादने व्याख्यातस्वरूपे ताभ्यां विशुद्धस्य **'ग्रहणविशुद्धिविशुद्धस्य'** तत्र ग्रहणविशुद्धि-

(टि०) १. होही जे४ भां०॥ २. ०स्स तु उग्ग० खं०॥

वक्ष्यमाणलक्षणा **भवति ग्रहणमेवं पिण्डस्य** तुशब्दस्तु एवमर्थ इति गाथार्थः ॥५५०॥

तत्रोद्गमदोषा गृहिसमुत्थाः कथिताः; उत्पादना-ग्रहणैषणादोषाणां समुत्थानं कुतो भवतीति ? आह–

उप्पायणाए दोसा[१] साहुओ समुट्ठिए वियाणाहि।
गहणेसणा[२]ए दोसे [३]आय-परसमुट्ठिए वोच्छं॥५५१॥

उप्पायणा० गाहा। (व्याख्या–) **उत्पादनाया दोषान् साधुसकाशात् समुत्थितान् विजानीहि; ग्रहणैषणाया दोषान् आत्म-परसमुत्थितान् वक्ष्य** इति गाथार्थः ॥५५१॥

ग्रहणैषणादोषानां दशानां विशेषतो विषयविभागमाह–

दोण्णि उ साहुसमुत्था संकिय तह भावतो य अपरिणयं।
सेसा अट्ठ वि नियमा गिहि[४]णो य समुट्ठिए जाण॥५५२॥

दोण्णि उ गाहा। व्याख्या– **द्वौ तु साधुसमुत्थौ** दोषौ, कौ पुनस्तौ ? इत्याह– **शङ्कितदोषस्तथा भावतश्चापरिणतदोष** इति; **शेषान् अष्टावपि** दोषान्नियमाद् **गृहस्थात्मसमुत्थितान् जानीहीति** गाथार्थः ॥५५२॥ ग्रहणैषणाया निक्षेपार्थमाह–

नामं-ठवणा-दविए भावे गहणेसणा मुणेयव्वा।
दव्वे वाणरजूहं भावंमि य दसपया होंति॥५५३॥

णामं० गाहा। व्याख्या– **नाम-स्थापना-द्रव्य-भावविषया ग्रहणैषणा ज्ञातव्या**। तत्र नाम-स्थापने क्षुण्णत्वाद् अनादृत्य द्रव्यग्रहणैषणामाह– **द्रव्यग्रहणैषणायां वानरयूथमुदाहरणं 'भावम्मि य'** त्ति भावग्रहणैषणायां **दशपदानि** शङ्कितादीनि **भवन्ती**ति गाथार्थः ॥५५३॥

वानरयूथोदाहरणप्रदर्शनार्थमाह–

परेसडियपंडुपत्तं वणसंडं दट्ठु अण्णहिं पेसे।
जूहवई पडियरिए जूहेण समं तहिं गच्छे॥५५४॥

परिसडिय० गाहा। व्याख्या– **परिशटितपाण्डुपत्रं वनखण्डं [५]दृष्ट्वाऽन्यत्र प्रेषयेत् यूथपतिः,** [६]प्रेषितवानरप्रतिजागरिते **यूथेन समं तत्र 'गच्छेदि'**ति गतवान्, भूते 'लिङ्' इति गाथार्थः ॥५५४॥

सयमेवालोएउं जूहवई तं वणं समंतेणं।
वियरइ [७]तेसि पयारं चरिऊण य ते दहं गच्छे॥५५५॥

सयमेव० गाहा। व्याख्या– **स्वयमेवालोक्य यूथपतिस्तद् वनं समन्ताद् वितरति** = ददाति **तेभ्यो** वानरेभ्यः **प्रचारम्** = फलितवनखण्डे यथेष्टभ्रमणमित्यर्थः; **चरित्वा च ते** वानरा यूथाधिपतिसहिता

(टि०) १. ०सा सोऊस साधूसमुत्थिया भणिता खं०॥ २. ०णाइ दो० खं० जे१ विना॥ ३. गिहि-साहूसमुट्ठिते वो० खं०॥ ४. ०हियाण समु० खं० जे१,२॥ ५. दृष्टा जि०॥ ६. प्रेरितवानरप्रतितेः यू० जि१॥ ७. तेसु जे२॥

हृदमगच्छन्निति गाथार्थः ॥५५५॥

यूथाधिपतिः पद्मोत्पलसञ्च्छन्नं हृदं स्वयमवलोक्य वानरानाह–

ओयरंतं पयं [१]दिट्ठं उत्तरंतं न दीसई।
णालेण पियह पाणीयं ण एस निक्कारणो [२]दहो॥५५६॥ दारं॥

ओयरंतं सिलोगो। (व्याख्या–) "**अवतरद्** आरण्यसत्त्वानां **पदं दृष्टमुत्तरत्** पदं तेषां **न दृश्यते**, ततो **नालेन पिबत पानीयं नैष निष्कारणो हृद** इति श्लोकार्थः ॥५५६॥ भणिता द्रव्यग्रहणैषणा। अधुना भावग्रहणैषणामाह– सा च दशदोषरहिता शुद्धा भवति, अतस्तानेव दशदोषानाह–

संकिय-मक्खिय-निक्खित्त-पिहिय-साहरिय-दायगुम्मीसे।
अपरिणत-लित्त-छड्डिय एसणदोसा दस हवंति॥५५७॥

संकिय० गाहा। व्याख्या– **शङ्कित-म्रक्षित-निक्षिप्त-पिहित-संहृत-दायकोन्मिश्राः अपरिणत-लिप्त-छर्दितसहिताः एषणादोषा दश भवन्ती**ति गाथासमासार्थः ॥५५७॥

'यथोद्देशस्तथा निर्देशः' इति न्यायात् शङ्कितपदव्याचिख्यासयाह–

संकाए चउभंगो दोसु वि [३]गहणेसु [४]भोयणे लग्गो*।
जं संकियमावण्णो [५]पणुवीसा चरिमए सुद्धो॥५५८॥

संकाए गाहा। व्याख्या– **शङ्कायां चत्वारो भङ्गास्ते** चामी– ग्रहणे शङ्कितं भोजने च प्रथमो भङ्गको (१) ग्रहणे शङ्कितो न भोजने द्वितीयः (२) ग्रहणे निःशङ्कितो भोजने शङ्कितस्तृतीयः (३) उभयनिःशङ्कितश्चतुर्थ (४) इत्यर्थः। **'दोसु वि गहणेसु भोयणे लग्गो'** त्ति द्वयोरपि ग्रहण-भोजनयोः शङ्कायां सत्यां लग्नः = प्रायश्चित्तमापन्न इत्यर्थः, यो दोष आधाकर्म्मादि**शङ्कितस्तं प्रत्यापन्नः पञ्चविंशति**दोषाणां मध्ये **'[६]चरिमे'**त्ति निःशङ्कितपदे शुद्ध इति गाथार्थः ॥५५८॥ पञ्चविंशतिदोषानाह–

[७]उग्गमदोसा सोलस आहाकम्माइ एसणादोसा।
नव मक्खियाइ एए पणुवीसा चरिमए सुद्धो॥५५९॥

उग्गम० गाहा। व्याख्या– **उद्गमदोषाः षोडश आधाकर्म्मादयो** ग्रहणैषणादोष **नव म्रक्षितादय एते पञ्चविंशतिश्चरमो** निःशङ्कितः **शुद्ध** इति **गाथार्थः** ॥५५९॥

अशुद्धमपि छद्मस्थपरीक्षया निःशङ्कितं गृहीतं भुक्तं च शुद्धमेव भवतीत्याह–

छउमत्थो सुयनाणी गवेसए उज्जुओ पयत्तेणं।

(टि०) १. दट्ठं जे१॥ **२. दहा** जे२॥ **३. ०हणे य भो०** जे१ विना॥ **४. भुंजिउं** जे१। **भुंजणे** जे भां०॥ **५. ०वीसं** जे१॥ **६. 'चरमो'**त्ति जे१॥ **७.** इयं गाथा मूलादर्शेषु नोपलभ्यते। तत्स्थाने अन्या गाथा दृश्यते साचेयम्– **उग्गमदोसा सोलसं णव एसण दोस संक मोत्तूणं। पणुवीसे ते दोसा संकिय निस्संकिए सुद्धो॥**

(वि०टि०) ◆. निष्कारणः = निरुपद्रवः इति मलय०॥ ***. वीरगणिमते गहणे य भोयणे लग्गो** ति पाठः स्यात्॥

आवण्णो पणुवीसं सुयणाणपमाणओ सुद्धो॥५६०॥

छउमत्थो गाहा। व्याख्या– **छद्मस्थः श्रुतज्ञानी गवेषयति ऋजुः** = निर्मायः **प्रयत्नेन आपन्नः पञ्चविंशति**दोषाणामेकतरं तथाऽप्यसौ **श्रुतज्ञानप्रमाणतः शुद्ध** इति गाथार्थः॥५६०॥

अमुमेवार्थं स्पष्टयन्नाह–

ओहो सुओवउत्तो सुयणाणी जदि वि गेण्हइ असुद्धं।
तं केवली वि भुंजइ अपमाण सुयं भवे इहरा॥५६१॥

ओहो गाहा। व्याख्या– **ओघतः** सामान्येन **श्रुतोपयुक्तः श्रुतज्ञानी यद्यपि गृह्णात्यशुद्धं** आधाकर्म्मादिदुष्टं **तत् केवल्यपि भुङ्क्ते अप्रमाणं श्रुतं भवेद् इतरथा**– यदि न भुङ्क्त इति गाथार्थः॥५६१॥ ततः को दोष ? इत्याह–

सुत्तस्स अप्पमाणा चरणाभावो ततो य मोक्खस्स।
मोक्खस्स वि य अभावे[१] दिक्खपवित्ति[२] निरत्था उ॥५६२॥

सुत्तस्स गाहा। व्याख्या– **सूत्रस्य** चाप्रामाण्ये, सप्तम्यर्थे प्रथमा, को दोषः ? इत्याह– **चरणाभाव**श्चरणाभावाच्च **मोक्षा**भावो **मोक्षस्य चाभावाद् दीक्षाप्रवृत्तिर्निरर्थिका** स्यादिति गाथार्थः॥५६२॥ ग्रहणे शङ्कितो भोजने च शङ्कित इत्यस्य प्रथमभङ्गस्य सम्भवमाह–

किण्णु[३] हु खद्धा भिक्खा दिज्जइ ण य तरति पुच्छिउं हिरिमं।
इति संकाए घेत्तुं तं भुंजति संकितो चेव॥५६३॥

किण्णु गाहा। व्याख्या– **किमिति** प्रभूता **भिक्षाद्य दीयते** गृहस्थेन ?, **न च तरति** = शक्नोति **प्रष्टुं लज्जावान् इति**। अनन्तरोक्त[४]या **शङ्कया गृहीत्वा तद् भुङ्क्ते शङ्कित एवे**ति गाथार्थः॥५६३॥

ग्रहणे शङ्कितो न भोजने इत्यस्य द्वितीयभङ्गकस्य सम्भूतिमाह–

हिदएण संकिएणं गहिया अण्णेण सोधिता सा य।
पगयं पहेणगं वा सोउं णिस्संकिय[५] भुंजे॥५६४॥

हियएण गाहा। व्याख्या– **हृदयेन शङ्कितेन गृहीता**, भिक्षेति गम्यते, **अन्येन** साधुना **शोधिता**ऽसौ भिक्षा, कथम् ? इत्याह– **प्रकृतं** = तत्र भिक्षागृहे भोज्यं **प्रहेणकं वे**त्येतत् कथय[६]ता, तत इदं **श्रुत्वा निःशङ्कितं भुङ्क्ते** इति गाथार्थः॥५६४॥ निःशङ्कितग्रहणं शङ्कितभोजनलक्षणं तृतीयभङ्गकमाह–

जारिसिय च्चिय लद्धा खद्धा भिक्खा मए अमुगगेहे।
अण्णेहि वि तारिसिया विगडंत[७] णिसामणे ततिओ॥५६५॥

(टि०) १. ०भावा खं०। भावो जे२॥ २. ०पयत्ता जे१॥ ३. किण्ण हु जे४ भां० विना॥ ४. ०क्तायां शङ्कायां जि०॥ ५. ०किओ खं० जे२। ०किउं जे४ भां०॥ ६. ०यतां जि१॥ ७. वियडेंति जे२। विकरेंत जे१॥ ८. ०श्योपलब्धा जि० जि१॥ ९. ०श्यस्योपलब्धा जि१॥

जारिसिय च्चिय गाहा। व्याख्या– **यादृश्येव लद्धा** बृहती **भिक्षा मयाऽमुकगेहे अन्यै**रपि मुनिभिस्ता[१]**दृश्येव** लब्धा **विकटयताम्** = आलोचयतां साधूनां **निशामने** = श्रवणे **तृतीयो** भङ्गको भवतीति गाथार्थः ॥५६५॥ अत्राह चोदकः–

जइ संका दोसकरी एवं सुद्धं पि होइ असुद्धं।
णिस्संकमेसियं [१]ति य अणेसणिज्जं पि णिद्दोसं॥५६६॥

जइ गाहा। व्याख्या– **यदि शङ्का दोषकरी** एवं सति **शुद्धमपि** वस्त्वशुद्धं भवति **निःशङ्कमेषितमिति अनेषणीयमपि निर्दोषं** स्यादिति गाथार्थः ॥५६६॥

अत्रोत्तरमाह–

अविसुद्धो परिणामो एगयरे [२]अपडिओ उ पक्खंमि।
एसिं पि कुणति णेसिं अणेसिमेसिं विसुद्धो उ॥५६७॥ दारं॥

अविसुद्धो गाहा। व्याख्या– **अविशुद्धः परिणाम एकतरस्मिन् अपतितश्च पक्षे** शङ्कायुक्त इत्यर्थः, **एषणीयमप्यनेषणीयं करोति** विशुद्धपरिणामस्त्वनेषणीयमपि एषणीयं करोतीति गाथार्थः ॥५६७॥ तस्मान्निःशङ्कितं भोक्तव्यम्।

उक्तं **शङ्कितद्वारम्**। इदानीं **म्रक्षितद्वारमुच्यते**– घृतादिना संसृष्टं म्रक्षितमिति, तद् द्विविधमित्याह–

दुविहं च मक्खियं खलु सच्चित्तं चेव होइ अच्चित्तं।
तिविहं पुण सच्चित्तं अच्चित्तं होइ दुविहं तु॥५६८॥

दुविहं च गाहा। व्याख्या– **द्विविधं च म्रक्षितं खलु**शब्दः स्वगतानेकभेदसंसूचकः, तद्यथा– **'सच्चित्तं चेव होइ अचित्तमि'**ति सचित्तेन म्रक्षितं अचित्तेन चेत्यर्थः, **त्रिविधं पुनः सचित्तम्, अचित्तम्रक्षितं भवति द्विविधं तु**॥५६८॥ एतदेव दर्शयन्नाह–

पुढवी-आउ-वणस्सति तिविहं सच्चित्तमक्खियं होदि।
अच्चित्तं [३]पुण दुविहं गरहिय इयरे य भयणा उ॥५६९॥

पुढवी० गाहा। व्याख्या– **पृथिव्युदक-वनस्पतिभिस्त्रिविधं सचित्तम्रक्षितं भवति; अचित्तम्रक्षितं पुनर्द्विविधं - गर्हितमितरच्च, भजना त्वत्र** कार्या तां च वक्ष्यतीति गाथार्थः ॥५६९॥

सचित्तपृथिवीकायादिम्रक्षितस्वरूपमाह–

सुक्केण उ सरक्खेण मक्खियं उल्लेण पुढविकाएण।
सव्वं पि मक्खियं तं एत्तो आउम्मि वोच्छामि॥५७०॥

सुक्केण उ गाहा। व्याख्या– तत्र पृथिवीकायो द्विविधः शुष्कार्द्रभेदात्, तत्र **शुष्केण तु सरजस्केन**

(टि०) १. पि व खं०॥ २. आवडि० जे१। नवडिओ खं०॥ ३. पि य जे४ भां० विना॥

पृथिवीकायेन **म्रक्षितं आर्द्रेण** च, **सर्व्वमप्येतत्** पृथिवी**म्रक्षितम्**। **अत** ऊर्ध्वमुदकम्रक्षितं **वक्ष्यामी**ति गाथार्थः ॥५७०॥

पुर-पच्छकम्म-ससिणिद्धुदउल्ले चउरो आउभेया उ।
उक्कट्ठरसालित्तं परित्तऽणंतं महिरुहेसु॥५७१॥

[१]**पुर-पच्छ०** गाहा। व्याख्या– **पुरःकर्म्म-पश्चात्कर्म्म-सस्निग्धोदकार्द्रस्वरूपा अप्कायम्रक्षित-भेदास्तु चत्वारो** भवन्ति, तुशब्दोऽन्तर्गतभेदसंसूचकः; वनस्पतिम्रक्षितं द्वितीयार्द्धेनाह– **उत्कृष्टरसेन लिप्तं प्रत्येका-ऽनन्त**वनस्पतिसम्बन्धिना, **'महीरुहेसु'** त्ति वनस्पतिकायविषये म्रक्षिते, तत्रोत्कृष्टशब्देन कालिङ्गा-ऽलाबु-त्रपुषफलादीनां शस्त्रकृतानि श्लक्ष्णखण्डानि भण्यन्ते चिञ्चिणिकादिपत्रसमुदायो वा उदूखलखण्डित इति गाथार्थः ॥५७१॥

सेसेहि उ काएहिं तीहि वि तेऊ-समीरण-तसेसु[२]।
[३]सच्चित्तं [४]मीसं वा ण मक्खियं अत्थि उल्लं वा॥५७२॥

सेसेहि उ गाहा। व्याख्या– **शेषैस्तु कायैस्त्रिभिः 'तेउ-समीरण-तसेसु'** त्ति तेजः-समीरण-त्रसैस्तृतीयार्थे सप्तमी **सचित्तं मिश्रं वा न म्रक्षितमस्ति आर्द्रं** वेति गाथार्थः ॥५७२॥

पृथिव्यादिम्रक्षितभङ्गकप्रदर्शनायाह–

सच्चित्तमक्खियम्मी[५] हत्थे मत्ते य होइ चउभंगो।
आदितिए पडिसेहो चरिमो भंगो अणुण्णाओ॥५७३॥

सचित्त० गाहा। व्याख्या– **सचित्तम्रक्षिते हस्ते मात्रे च भवन्ति चत्वारो भङ्गकास्ते** चामी– हस्तः संसृष्टो मात्रकं च प्रथमो भङ्गकः (१) हस्तः संसृष्टो न मात्रकं द्वितीयः (२) मात्रकं संसृष्टं न हस्त इति तृतीयः (३) उभयासंसृष्टश्चतुर्थः (४); **आद्ये** भङ्गक**त्रये** ग्रहण**प्रतिषेधश्चरमभङ्गस्तु** ग्रहणे-ऽ**नुज्ञात** इति गाथार्थः ॥५७३॥ साम्प्रतं अचित्तम्रक्षितं तद् द्विविधं– गर्हितमगर्हितं च, गर्हितं पुनर्द्विधा लोके[६] उभयतश्च, अगर्हितमपि द्विधा– संसक्ता-ऽसंसक्तभेदात्। अमुमेवार्थमाह–

अच्चित्तमक्खियंमी चउसु वि भंगेसु होइ भयणा उ।
अगरहिएण उ गहणं पडिसेहो गरहिए होइ॥५७४॥

अचित्त० गाहा। व्याख्या– **अचित्तम्रक्षिते चतुर्ष्वपि भङ्गेषु** पूर्व्वप्रदर्शितेषु **भवति भजना– अगर्हितेन** संसृष्टस्य देयस्य **ग्रहणम्; प्रतिषेधो गर्हित**संसृष्टस्य **भवति** ग्रहणं प्रतीति गाथार्थः ॥५७४॥

अगर्हितग्रहणव्यवस्थामाह–

संसज्जिमेहि वज्जं अगरहिएहिं पि गोरसदवेहिं।

(टि०) १. ०पुरकम्म गा० ला०॥ **२. ०सेहिं** जे१ जे४ भां०॥ **३. अच्चि०** जे१॥ **४. मीसगं** जे१॥ **५. ०म्मि य ह०** जे२॥ **६. ०के लोकोत्तरे उभ०** जि१॥

(वि०टि०) ❖. 'चिञ्चिणिका' आमली इति भाषायाम्॥

महु-घय-तेल्ल-गुलेहिं मा मच्छिपिपीलियाघातो॥५७५॥

संसज्जिमेहिं गाहा। व्याख्या– **संसक्तिमद्भिर्वर्ज्जनीयं** = वर्ज्यमगर्हितैरपि **गोरसद्रवादिभिः**, संसृष्टमिति शेषः, **मधु-घृत-तैल-गुडादिभिरसंसक्तिमद्भिरपि** यत्संसृष्टं तद्वर्ज्जनीयं, किमिति ? **मा मक्षिका-पिपीलिकादीनां घातः** स्यादिति गाथार्थः ॥५७५॥ गर्हितद्वैविध्यप्रदर्शनायाह–

मंस-वस-सोणियासव लोए[१] वा गरहिएहिं उ[२] विवज्जे।
दुहओ वि गरहिएहिं[३] मुत्तुच्चारेहिं छित्तं पि॥५७६॥ दारं॥

मंस-वस० गाहा। व्याख्या– **मांस-वसा-शोणिता-ऽऽसवादिभिर्लोके वा गर्हितैर्यत्संसृष्टं** तद् **विवर्जयेत्; 'दुहतो वि'**त्ति लोक-लोकोत्तरगर्हितैर्मूत्रोच्चारादिभिः **स्पृष्टमपि** आस्तां संसृष्टं वर्जयेत् सम्बन्धनीयमिति गाथार्थः ॥५७६॥ उक्तं **म्रक्षितद्वारम्**।

सच्चित्तमीसएसुं दुविहं काएसु होइ निक्खित्तं।
एक्केक्कं तं दुविहं अणंतर परंपरं चेव॥५७७॥[४]

निक्षिप्तद्वारमाह– तत्र निक्षिप्तं न्यस्तं स्थापितमित्यनर्थान्तरम्, स्थानमाधेयं च त्रिविधं सचित्त-मिश्रा-ऽचित्तभेदात्। अत्र च तिस्रश्चतुर्भङ्गिका भवन्ति, सचित्त-मिश्रपदाभ्यां एका, सचित्ता-ऽचित्तपदाभ्यां द्वितीया, मिश्रा-ऽचित्तपदाभ्यां तृतीयेति। तत्र आद्यचतुर्भङ्गिकाप्रथमभङ्गकं सचित्ते सचित्तं निक्षिप्तमित्येवं लक्षणं दर्शयन्नाह–

पुढवी-आउक्काए तेऊ-वाऊ-वणस्सइ-तसाणं।
एक्केक्क दुहाणंतर[५] परंपरऽगणिम्मि सत्तविहो॥५७८॥

पुढवी गाहा। व्याख्या– **पृथिव्यप्काय-तेजो-वायु-वनस्पति-त्रसानामुपरि** निक्षेपः, **एकैक-स्मिन्** पृथिव्यादौ निक्षेपोऽनन्तरः **परम्परश्च, अग्नौ** त्वयं विशेषोऽनन्तर-परम्परनिक्षेपः[६] प्रत्येकं **सप्तधेति** गाथार्थः ॥५७८॥ स्वस्थान-परस्थाननिक्षेपप्रदर्शनायाह–

सच्चित्तपुढविकाए सच्चित्तो चेव पुढविणिक्खेवो।
आऊ-तेऊ-वणस्सइ-समीरण-तसेसु एमेव॥५७९॥

सचित्त० गाहा। व्याख्या– **सचित्तपृथिवीकाये सचित्त एव** पृथिवीकायो निक्षिप्तोऽयं स्वस्थान-निक्षेपः; **अप्काय-तेजो-वनस्पति-समीरण-त्रसेष्वेवमेव** सचित्तपृथिवीकायो निक्षिप्तः परस्थाननिक्षेपः, यतः पृथिवीकायस्य अप्कायादीनि परस्थानानीति गाथार्थः ॥५७९॥ पृथिवीकायक्रमेण शेषकायातिदेशमाह–

एमेव सेसगाण वि णिक्खेवो होइ[७] जीवकायाणं।

(टि०) १. लोएसु जे१॥ **२. वज्जेंतु** जे२। **वज्जंतु** जे१॥ **३. ०एसु** जे१॥ **४.** इयं गाथा केवलं जे२ मूलप्रतौ लभ्यते। प्रस्तुतवृत्तौ इयं गाथा न व्याख्याता। **वीरगणिवृत्तौ** तु व्याख्याता॥ **५. दुगभेदो अणंतर** खं०॥ **६. ०निक्षेपे** जि०। **०निक्षेपौ** ला०॥ **७. सेसका०** जे२॥

एक्केक्को सट्ठाणे परट्ठाणे पंच पंचेव॥५८०॥

एमेव गाहा। व्याख्या– **एवमेव** यथा पृथिवीकायस्य तथा **शेषाणामपि निक्षेपो भवति जीवकायानाम्। एकैको** निक्षेपः **स्वस्थाने,** भवतीति शेषः, **परस्थाने पञ्च पञ्च** प्रकारो[१] भवति एकैक-कायस्य, तद्यथा अप्काये अप्कायो निक्षिप्तः स्वस्थाननिक्षेपः स एव पृथिवी-तेजो-वायु-वनस्पति-त्रसेष्वेवं पञ्चधा परस्थाननिक्षेपो भवतीति गाथार्थः॥५८०॥

प्रथमचतुर्भङ्गिकाद्वितीय-तृतीय-चतुर्थभङ्गकान् गाथापादत्रयेण प्रदर्शयन्नाह–

एमेव मीसएसु वि मीसाण सचेयणाण[२] णिक्खेवो।
मीसाणं मीसेसु य दोण्हं पि य होइऽच्चित्तेसु[३]॥५८१॥

एमेव गाहा। व्याख्या– **'एमेवे'**ति यथा सचित्ते सचित्तं प्रथमभङ्गे तथा द्वितीय-तृतीययोरपीति **मिश्रकेषु अपि**शब्दात् सचित्तेषु **मिश्राणां सचेतनानां** च **निक्षेपः**, किमुक्तं भवति– सचेतनेषु मिश्राणां निक्षेपो द्वितीयभङ्गकः, मिश्रेषु सचेतनानां निक्षेपस्तृतीयो, **मिश्राणां मिश्रेषु** निक्षेप इति चतुर्थः।

अत्र चैकैकस्मिन् काये स्वस्थान-परस्थानतः षट्संयोगाश्चतुर्भङ्करूपकाः द्रष्टव्याः, सर्व्वे च षट्त्रिंशद् संयोगा इति। गता प्रथमचतुर्भङ्गिका। द्वितीय-तृतीयचतुर्भङ्गिके गाथाचरमपादेनाह–

'दोण्हं पि य हो(इ) अचित्तेसु'त्ति द्वयोरपि सचित्त-मिश्रयोरचित्तविषयो निक्षेपः, स चैवं भवति– सचित्ते सचित्तं इति प्रथमः (१) सचित्ते अचित्तं इति द्वितीयः (२) अचित्ते सचित्तं इति तृतीयः (३) अचित्ते अचित्तं इति चतुर्थो भङ्गकः (४), इयं द्वितीयचतुर्भङ्गिका, अत्राऽपि षट्कायानङ्गीकृत्य स्वस्थान-परस्थानतः षट्संयोगाश्चतुर्भङ्गात्मका द्रष्टव्याः, मीलिताश्च षट्त्रिंशद् भवन्ति।

तृतीयचतुर्भङ्गिका पुनरियं– मिश्रे मिश्रं इति प्रथमो भङ्गकः (१) मिश्रे अचित्तमिति द्वितीयः (२) अचित्ते मिश्रं तृतीयः (३) अचित्तेऽचित्तं चतुर्थः (४), अत्राऽपि षट्कायानङ्गीकृत्य स्वस्थान-परस्थानतः षट्संयोगा द्रष्टव्याः, सर्व्वेऽपि षट्त्रिंशद्, एवं तिस्रः षट्त्रिंशिका मीलिताश्च अष्टोत्तरशतं संयोगानां भवन्तीति गाथार्थः॥५५१॥ प्रथमचतुर्भङ्गिकाग्रहणप्रतिषेधमाह–

जत्थ उ सचित्तमीसे[४] चउभंगो तत्थ चउसु वि अगेज्झं।
तं तु अणंतर इयरं परित्तऽणंतं च वणकाए॥५८२॥

जत्थ उ गाहा। व्याख्या– **यत्र तु सचित्त-मिश्र**पदाभ्यां **चत्वारो भङ्गास्तत्र चतुर्ष्वपि अग्राह्यम्, तत्तु** निक्षिप्त**मनन्तरं** परम्परं च भवति **'परित्तऽणंतं च वणकाए'**त्ति प्रत्येकवनस्पतिकाये अनन्तवनस्पतिकाये चानन्तर-परम्परनिक्षिप्तं भवतीति गाथार्थः॥५८२॥ प्रकारान्तरेण चतुर्भङ्गिकामाह–

(टि०) १. ०कारो निक्षेपो भवति जि० जि१॥ **२. ०चेयणेसु** खं० विना॥ **३. ०चित्तो** खं०। **०चित्ते** जे२॥ **४. ०मीसो** खं०॥ **५. ०मीसे** खं०। **०मीसा** जे१॥ **६. य** खं०। **ण** जे२॥ **७. ०त्ते** खं०॥ **८. एत्थं चउ०** जे४ भां०॥

(वि०टि०) ❖. मलयगिरिसूरिमते मिश्रेषु सचित्तनिक्षेप इति द्वितीयभङ्गः, सचित्तेषु मिश्रनिक्षेप इति तृतीयभङ्गः।

अहव ण सचित्तमीसो[५] उ[६] एगओ एगओ य अचित्तो[७]।
एत्थ[८] उ चउक्कभंगो तत्थादिदुवे कहा णत्थि॥५८३॥

अहव ण गाहा। व्याख्या– **अथवा णकारो** वाक्यालङ्कारे **सचित्त-मिश्रपदमेकत एकत-श्चाचित्तपदम्,** अत्र चत्वारो भङ्गास्ते चामी– सचित्तमिश्रे[१]◆सचित्तमिश्रं प्रथमः (१) [२]अचित्ते सचित्त-मिश्रमिति द्वितीयः (२) [३]सचित्तमिश्रेऽचित्तं तृतीयः (३) अचित्तेऽचित्तमिति चतुर्थः (४)। अत्राद्य-योर्द्वयोर्भङ्गयोः ▽**'कह'** त्ति ग्रहणकथा **नास्ति,** अत्यन्ताऽशुद्धत्वादिति गाथार्थः॥५८३॥

सचित्ते[४] अचित्तनिक्षेप इत्यस्मिन् भङ्गके विशेषमाह–

जं पुण अचित्तदव्वं णिक्खिप्पइ चेतणेसु[५]* दव्वेसुं।
तहिं मग्गणा उ इणमो अणंतर-परंपरा होइ॥५८४॥

जं पुण गाहा। व्याख्या– **यत् पुरचित्तद्रव्यं निक्षिप्यते सचेतनेषु द्रव्येषु तस्मिन् मार्गणा त्वियं** वक्ष्यमाणलक्षणा **अनन्तर-परम्परर**रूपा **भवती**ति गाथार्थः॥५८४॥ तामेव दर्शयन्नाह–

ओगाहिमादऽणंतरं परंपरं पिढरगादि पुढवीए।
णवणीतादि अणंतरं परंपरं णावमादीसु॥५८५॥

ओगाहिमाइ गाहा। व्याख्या– **उद्गाहिमकाद्यनन्तरं** निक्षिप्तं पृथिव्याम्, **परम्परं पिठरकादि-**निक्षिप्तं [६]भक्तादि **पृथिव्यामेव। नवनीतादि** निक्षिप्तं **अनन्तरमुदके, परम्पर**निक्षिप्तं **नावादिष्वि**ति गाथार्थः॥५८५॥ तेजसि [७]यो निक्षेपः तत्रानन्तर-परम्परारूपा द्विकाः सप्त भवन्ति, तानाह–

विज्झाय मुम्मुरिंगालमेव अप्पत्त-पत्त-समजाले।
वोलीणे सत्त [८]दुगा जंतोलित्ते य जयणाए॥५८६॥

विज्झाय० गाहा। व्याख्या– **विध्यात-मुर्मुरा-ऽङ्गारास्तथा** पिठराद्यप्राप्त-**प्राप्त-समज्वाला व्युत्क्रान्त**ज्वालाश्चेत्येते **सप्तानन्तर-परम्परारूपा द्विका** भवन्ति; **यन्त्रावलिप्ते च** ग्रहणं **यतनया** वक्ष्यतीति गाथार्थः॥५८६॥ विध्यातादिस्वरूपमाह–

(टि०) १. अचि० जि१॥ **२. सचित्ते अचित्तमिश्रमिति** जि०॥ **३. अचित्तमिश्रे सचित्तं** जि०॥ **४. ०त्ते मिश्रे अचि०** जि१॥ **५. काएसु** खं०॥ **६. तक्रादि** जि०॥ **७. तु** ला०॥ **८. दुगं** भां० जे४। **दुवे** जे१॥ **९. ०गाले** खं०॥ **१०. ०ते अग्निरग्निर्दृ०** जि० जि१॥

(वि०टि०) ◆. मलयगिरिसूरिमुद्रितप्रते सच्चित्ते सचित्तमिश्रं इति प्रथमभङ्गो उपदर्शितः॥ ▽. **मलयगिरिसूरिमते तत्थाइतिए** इति मूलपाठः स्यात्। तथा च तट्टीका- ... **आदित्रिके** आदिमे भङ्गत्रये कथा नास्ति इति **मलय०**॥ *. **मलयगिरिसूरिमते 'दव्वेसु'** इति पदस्य स्थाने **'मीसेसु'** इति पाठः स्यात्॥

विज्झाउ त्ति ण दीसइ अग्गी दीसइ य इंदणे छूढे।
आपिंगल अगणिकणा मुम्मुर णिज्जाल इंगाला[९]॥५८७॥

विज्झाउ त्ति गाहा। व्याख्या– '**विज्झाउ त्ति**' यो न **दृश्यते**[१०] **अग्निर्दृश्यते चेन्धने प्रक्षिप्ते** स विध्यातः, ऊष्ममात्रक एवेति भावः, **आपिङ्गला अग्निकणा** भस्मोन्मिश्रा **मुर्मुरो** भवति, **अङ्गारो** ज्वालातीत इति गाथार्थः॥५८७॥

अप्पत्ता उ चउत्थे जाला पिढरं[१] तु पंचमे पत्ता।
छट्ठे पुण कण्णसमा जाला समतिच्छिया चरिमे॥५८८॥

अप्पत्त० गाहा। व्याख्या– '**अप्पत्ता उ चउत्थे जाला पिढर**' त्ति या ज्वाला पिठरं न प्राप्नोति सा **अप्राप्ते**ति उच्यते, तं तु **पिठरं** प्राप्ता **पञ्चमे** भेदे ज्वाला**प्राप्ते**त्यभिधीयते, **षष्ठे पुनः** पिठर**कर्ण्णसमा ज्वाला** समज्वालेति भण्यते, पिठरं **समतिक्रान्ता** ज्वाला **चरमे** सप्तमे व्युत्क्रान्तेति। एतेषु सप्तस्वपि मण्डक-वृन्ताक-पूपिकादीनां अनन्तरनिक्षेपो भवति, परम्परनिक्षेपस्तु पिठरकादिष्वोदनादीनाम्, अग्नि-घट्टनादयस्तत्र दोषा इति गाथार्थः॥५८८॥

परम्परनिक्षेपे[२] यन्त्र-चुल्ल्यादिषु भजनामाह–

पासोलित्तकडाहे परिसाडी णत्थि तं पि य विसालं।
सो वि य अचिरच्छूढो उच्छुरसो नातिउसिणो य॥५८९॥

पासोलित्त० गाहा। व्याख्या– पार्श्वेष्ववलिप्तं पार्श्वावलिप्तं तस्मिन् = **पार्श्वावलिप्ते कटाहे परिशाटी नास्ति तदपि च** कटाहं **विशालं** = विशालमुखं **सोऽपि च अचिरनिक्षिप्त इक्षुरसो नात्युष्णश्चैवम्भूतया** यतनया गृह्यत इति गाथार्थः॥५८९॥

उसिणोदगं पि घेप्पइ गुलरसपरिणामियं तु णऽच्चुसिणं[३]।
जं तु अघट्टियकण्णं घट्टियपडणम्मि मा अग्गी॥५९०॥

उसिणोदगं पि गाहा। व्याख्या– **उष्णोदकमपि गृह्यते गुडरसपरिणामितं** प्रासुकीकृतमित्यर्थः, **नात्युष्णम्, य(त्) त्वघट्टितकर्ण्णं**[४] अघट्टिता–अस्पृष्टाः कटाहकर्ण्णा यस्मिन्नुदकदाने तद् = अघट्टित-कर्ण्णम्, अयं च षोडशभङ्गानामाद्यः शुद्धो भङ्गकः, अत्र च गृह्यते। घट्टितकर्ण्णे[५] तु कटाहे लेपादिपतनादग्निविराधना मा भूदिति न गृह्यत इति गाथार्थः॥५९०॥

द्वितीयभङ्गकप्रदर्शनायाह–

पासोलित्तकडाहे णऽच्चुसिणे अपरिसाडि घट्टंते[६]।

(टि०) १. **च** जे१॥ २. **०क्षेप यन्त्र०** जि० जि१॥ ३. **०सिणा** जे१॥ ४. **०र्ण्णे** जि१॥ ५. **०र्ण्णं** जि१॥ ६. **०ट्टंतो** जे१॥

सोलसभंगविकप्पा पढमेऽणुण्णा ण सेसेसु॥५९१॥

पासोलित्त० गाहा। व्याख्या– **पार्श्वावलिप्तिकटाहे नात्युष्णं** देयं परिशाटी नास्ति तदपि कटाहं घट्टितकर्ण्णमिति द्वितीयो भङ्गास्तत्र न कल्पते ग्रहीतुं देयम्, अवलिप्तकटाहं नात्युष्णं परिशाटीयुक्तं अघट्टितकर्ण्णमिति तृतीयो भङ्गकोऽत्राऽपि न कल्पते, अवलिप्तकटाहं नात्युष्णं परिशाटीयुक्तं घट्टितकर्ण्णं न कल्पते चतुर्थम्, एवं स्वधिया ◆**षोडशभङ्गविकल्पाः** कार्य्यास्तत्रैकस्मिन् **प्रथमभङ्गके अनुज्ञा न शेषेषु** पञ्चदशस्विति गाथार्थः॥५९१॥ अत्युष्णे ग्रहणदोषानाह–

दुविह विराहण उसिणे छड्डुणे[१] हाणी य भाणभेदो य।
वाउक्खित्ताऽणंतर परंपरं[२] पप्पडिय वत्थी॥५९२॥

दुविह गाहा। व्याख्या– **द्विविधा विराधना** आत्मनः संयमस्य च, **'उसिणे'**ति अत्युष्णे गृह्यमाणे **'छड्डुणे'**त्ति भूमिपतने **हानिस्तद्द्रव्यस्य भाजनभेदश्च** भवतीति गाथार्द्धार्थः।

वायुविषयमनन्तर-परम्परनिक्षेपमाह– **वातोत्क्षिप्तं** पर्प्पटिकाद्यनन्तरनिक्षिप्तं **परम्परं** वातापूरितदृति-प्रतिष्ठितं मण्डकादीति गाथार्थः॥५९२॥ वनस्पतिविषयं निक्षिप्तं द्विविधमाह–

हरितादि अणंतरिया परंपरं[३] पिढरगादिसु[४] वणंमि।
पूयादि पिट्ठऽणंतर[५] भरगे कुतुयादिसू[६] इतरा[७]॥५९३॥ दारं॥

(टि०) १. ०ड्डणि जे२। ०ड्डण जे२॥ २. ०परे खं० जे१॥ ३. ०परा खं०॥ ४. ०रमाइ० जे२॥ ५. ०तरा खं०॥ ६. कुडगादि० जे१॥ ७. ०तरं खं० जे१,२॥

(वि०टि०) ◆. षोडशभङ्गविकल्पाश्च एते–

भंग	पार्श्वावलिप्तं	नात्युष्णं	परिशाटी नास्ति	अघट्टितकर्ण्ण	
१	✓	✓	✓	✓	कल्पते
२	✓	✓	✓	×	न कल्पते
३	✓	✓	×	✓	,,
४	✓	✓	×	×	,,
५	✓	×	✓	✓	,,
६	✓	×	✓	×	,,
७	✓	×	×	✓	,,
८	✓	×	×	×	,,
९	×	✓	✓	✓	,,
१०	×	✓	✓	×	,,
११	×	✓	×	✓	,,
१२	×	✓	×	×	,,
१३	×	×	✓	✓	,,
१४	×	×	✓	×	,,
१५	×	×	×	✓	,,
१६	×	×	×	×	,,

हरियाइ गाहा। व्याख्या– **हरितादिषु** न्यस्ताऽपूपकादयोऽनन्तरनिक्षेपः, **परम्परं** हरितन्यस्त-**पिठरकादिषु** मुद्गादयो **वनस्पति**विषयोऽयं निक्षेप इति।

त्रसकायनिक्षेपमाह– **अपूपादि** बलीवर्द्दादि**पृष्टे** निक्षिप्तं **अनन्तर**निक्षेपः, बलीवर्दन्यस्त**भरक-कुतुपादिषु** अपूपक-घृतादि **'इतरे'**त्ति परम्परनिक्षेप इति गाथार्थः ॥५९३॥

गतं **निक्षिप्त**द्वारम्। अधुना **पिहित**द्वारमाह–

सच्चित्ते अच्चित्ते मीसग पिहियम्मि होदि चउभंगो।
आइतिए[१] पडिसेहो चरिमे[२] भंगम्मि भयणा उ॥५९४॥

सच्चित्ते गाहा। व्याख्या- **सचित्तेनाचित्तेन मिश्रेण** च **पिहिते** = स्थगिते **भवति चतुर्भङ्गिका**। **आद्यभङ्गत्रये प्रतिषेधश्चरमे** तु **भङ्गे भजना** भवतीति गाथार्थः ॥५९४॥ अतिदेशं कुर्वन्नाह–

जह चेव य निक्खित्ते संजोगा चेव होंति भंगा य।
एमेव य पिहियंमि वि णाणत्तमिणं ततियभंगे॥५९५॥

जह चेव य गाहा। व्याख्या– **यथैव च निक्षिप्तद्वारे संयोगा भङ्गाश्च भवन्ति एवमेव पिहितेऽपि, नानात्वमिदं** = विशेषोऽयं वक्ष्यमाण**स्तृतीयभङ्गे** अचित्तं सचित्तेन पिहितमित्यस्मिन्निति गाथार्थः ॥५९५॥

अचित्तं भक्तादि सचित्तेन लेष्टु-शिलादिना पृथिवीकायेनानन्तरपिहितं, लेष्टु-शिलागर्भपच्छिकादिना परम्परपिहितं पृथिवीकायेन; अपूपादि हिमदल-करादिना अप्कायेनानन्तरपिहितम्, उदकभृतवर्द्धनिकादिना परम्परपिहितमप्कायेनेति। तेजःकायपिहितं द्विविधमपि स्वयमेवाह निर्युक्तिकारः–

अंगारधूवियादी अणंतरो[३] संतरो सरावादी।
तत्थेव अतिर वाऊ परंपरं[४] बत्थिणा पिहिते॥५९६॥

अंगार० गाहा। व्याख्या– अङ्गारेण धूपितं = **अङ्गारधूपितं** तदादौ अनन्तरपिहितं तेजस्कायेनेति, अङ्गारभृत**सरावादिना** तु परम्परपिहितं व्यञ्जनादि, **तत्रैव** धूपनाङ्गारादौ(?धूपिताङ्गारादौ) अनन्तरवायुपिहितं भवति, यत्राग्निस्तत्र वायुरिति वचनात्, **परम्पर**पिहितं वायुभृत**बस्त्यादिने**ति गाथार्थः ॥५९६॥ अनन्तर-परम्परवनस्पतिकायपिहितमाह–

अइरं फलादिपिहियं वणंमि इयरं तु पच्छ-पिढरादी।
कच्छभ-संचारादी अणंतराणंतरे[५] छट्ठे॥५९७॥

अतिरं गाहा। व्याख्या– **अतिरोहितं** अनन्तरं मातुलिङ्गफलादिना **पिहितं** वनस्पतिकाये[६]न, **इतरं तु** परम्परपिहितं बीजपूरकगर्भ**पच्छिका-पिठरादिना** स्थगितं देयमिति गाथापूर्वार्द्धार्थः।

(टि०) १. **तियभंगे** जे१॥ २. **गहणे आणाइणो दोसा** जे१॥ ३. **०तरा सं** जे१॥ ४. **०परो ब०** खं० जे१,२॥ ५. **०तरपरंपरं** जे१॥ ६. **०काये इतरं** जि०, जि॥ ७. **०दिना तत्र त्र०** जि१॥ ८. **०तीयं अन०** जि१॥ ९. **छट्ठोत्ति** जि० जि१॥

त्रसकायपिहितं द्विविधमप्याह– '**कच्छभ-संचाराई अणंतराणंतरे च्छट्ठे**'त्ति **कच्छपेन** = कूर्मेण तथा **सञ्चारादिना** = पिपीलिकापङ्क्त्यादिना[७] त्रसकायेनानन्तरपिहितम्, अनन्तरमिति वक्तव्ये निर्युक्तिकृता द्वितीयाऽनन्तरग्रहणं[८] कृतं नकारलोपात् ततोऽयमर्थः परम्परपिहितं तच्च कच्छपगर्भपच्छिकादिना स्थगितं '**छट्ठे**[९]'त्ति त्रसकायविषय इति गाथार्थः ॥५९७॥

उक्ता तृतीयभङ्गस्य 'अचित्तं सचित्तेन पिहितम्' इत्यस्य मार्गणा। साम्प्रतं चतुर्थभङ्गकस्य अचित्तमचित्तेन पिहितमित्यस्य चतुर्भङ्गिकया[१] भजनामाह–

गुरु गुरुणा गुरु लहुणा लहुयं गुरुएण[२] दो वि लहुगाइं।
अच्चित्तेण[३] वि पिहिते चउभंगो दोसु[४] अगेज्झं॥५९८॥ दारं॥

गुरु गाहा। व्याख्या– **गुरुद्रव्यं गुरुणा** द्रव्येण पिहितमिति प्रथमः (१), **गुरु लघुने**ति द्वितीयो (२), **लघु गुरुणे**ति तृतीयः (३) उभयलघुश्चतुर्थः (४)। एव**मचित्तेनाऽपि पिहिते** चत्वारो भङ्गा उक्तलक्षणा '**दोसु अगेज्झं**'ति प्रथम-तृतीययोरग्राह्यं द्वितीय-चतुर्थयोस्तु ग्राह्यमिति गाथार्थः ॥५९८॥

उक्तं **पिहित**द्वारम्। इदानीं **संहृत**द्वारमाह– *संहृतं नाम यद् अन्यत्र संहृत्य तद् वा अन्यद् वा ददाति तत् संहृतमुच्यते। तत्र चतुर्भङ्गिकां दर्शयन्नाह–

सच्चित्ते अच्चित्ते मीसग[५] साहारणे होइ चउभंगो।
आदितिए पडिसेहो[६] गहणे आणाइणो दोसा॥५९९॥

सचित्ते गाहा। व्याख्या– **सचित्ता-ऽचित्त-मिश्र**द्रव्याणां **संहरणे** क्रियमाणे **चतुर्भङ्गिका भवति। आद्यभङ्गत्रये प्रतिषेध**स्तस्मिंश्च **ग्रहणे आज्ञा**भङ्गा-ऽनवस्थादयो **दोषा** भवन्तीति गाथार्थः ॥५९९॥ अतिदेशं कुर्वन्नाह–

जह चेव य निक्खित्ते संजोगा चेव होंति भंगा य।
तह चेव य साहरणे णाणत्तमिणं ततियभंगे॥६००॥

जह चेव गाहा। व्याख्या– **यथा चैव निक्षिप्ते संयोगा भङ्गाश्च भवन्ति तथैव संहरणे** द्रष्टव्याः। ◆**नानात्वं इदं** वक्ष्यमाणमचित्तं सचित्ते संहरतीत्येवं लक्षणे **तृतीयभङ्गे** भवतीति गाथार्थः ॥६००॥

नानात्वमाह–

मत्तेण जेण दाहिइ तत्थ अदिज्जं तु होज्ज असणादी।
छोढुं तदण्णहिं तेण देइ अह होइ साहरणा॥६०१॥

(टि०) १. ०ङ्गिकाया जि१॥ **२. वा** जे१॥ **३. सच्चि०** जे१॥ **४. मा गेज्झा** खं०॥ **५. साहारणम्मि** खं०॥ **६. चरिमे भंगम्मि भयणा उ** जे४ भां०॥

(वि०टि०) *. इह येन मात्रकेण कृत्वा भक्तादिकं दातुमिच्छति दात्री तत्रान्यददातव्यं किमपि सचित्तमचित्तं मिश्रं वाऽस्ति ततस्तदन्यत्र भूम्यादौ क्षिप्त्वा तेनान्यद्ददाति.... क्षेपणं च संहरणमुच्यते। इति **मलय०**॥ ◆. नवरं द्वितीय-तृतीयचतुर्भङ्गिकयोः प्रत्येकं तृतीये तृतीये भङ्गेऽनन्तर-परम्परमार्गणाविधौ निक्षिप्तद्वारादिदं वक्ष्यमाणं नानात्वमवसेयम्, निक्षिप्तद्वारेऽन्येन प्रकारेणानन्तरपरम्परमार्गणा कृता अत्र तु संहृतद्वारेऽन्यथा करिष्यते इति भावः। इति **मलय०**॥

मत्तेण गाहा। व्याख्या– '**मत्तेण**'ति भाजनेन **येन दास्यति तत्र भाजनेऽदेयमपि भवेदशनादि** '**छोढुमि**'ति संहृत्य **तदन्यत्र** सचित्ते मुद्गादौ **तेन** भाजनेन **ददाति अथेयं भवति संहरणेति** गाथार्थः ॥६०१॥ यस्मिन् सचित्ते संहरति तदाह–

भोम्मादिसु[१] तं पुण साहरणं होइ छसु वि काएसु।
जं तं दुह अचित्तं साहरणं[२] तत्थ चउभंगो[३] ॥६०२॥

भोम्माइ० गाहा। व्याख्या– **भूम्यादिषु तत्पुनः संहरणं भवति षट्ष्वपि कायेषु** '**जं पुण दुह अचित्तमि**'ति यत् तत् चतुर्थभङ्गके अचित्तमचित्ते संहरति **तत्र चत्वारो भङ्गका** इति गाथार्थः ॥६०२॥ तानेवाह–

सुक्के सुक्कं पढमो सुक्के उल्लं तु बितियओ भंगो।
उल्ले सुक्कं ततिओ[४] उल्ले उल्लं चउत्थो तु॥६०३॥

सुक्के गाहा। व्याख्या– **शुष्के शुष्कं** संहरति **प्रथमो** भङ्गकः (१) **शुष्के आर्द्रमिति द्वितीयः** (२) **आर्द्रे शुष्क**मिति **तृतीयः** (३) **आर्द्रे आर्द्रमिति चतुर्थ** इति गाथार्थः ॥६०३॥

शुष्के शुष्कमित्यादिभङ्गेषु प्रत्येकं चतुर्भङ्गिकां दर्शयन्नाह–

एक्केक्के चउभंगो सुक्कादीएसु चउसु भंगेसु।
थोवे थोवं थोवे बहुयं[५] विवरीय[६] दो अण्णे॥६०४॥

एक्केक्के गाधा। व्याख्या– **एकैकस्मिंश्चतुर्भङ्गिका शुष्कादिषु चतुर्भङ्गेषु** तां चेमां गाथापश्चार्द्धेनाह– **स्तोके स्तोकं** प्रथमः (१) **स्तोके बहुकं** द्वितीयः (२) **एतद्विपरीतौ द्वावन्यौ** भङ्गकाविति, कथम् ? बहुके स्तोकं (३) बहुके बहुकमित्येवंरूपौ तृतीय-चतुर्थाविति गाथार्थः ॥६०४॥

अत्र भजनामाह–

जत्थ उ थोवे थोवं[७] सुक्कं उल्लं व छुभइ तं गेज्झं।
जदि तं तु समुक्खित्तुं[८] थोवाहारं दलइ मत्तं॥६०५॥

जत्थ उ गाहा। व्याख्या– **यत्र तु स्तोके स्तोकं शुष्कमार्द्रं वा प्रक्षिपति तद् ग्राह्यम्, यदि तत् समुत्क्षिप्य स्तोकाधारं मात्रकं दलति** = ददातीति गाथार्थः ॥६०५॥

द्वितीय-चतुर्थभङ्गकयोर्दोषानाह–

उक्खेवे णिक्खेवे महल्लभाणस्स[९] लुद्ध[१०] वहे[११] दाहो।
अचियत्ते वोच्छेदो दोसु[१२] वि भंगेसु दोसाओ॥६०६॥

(टि०) १. **भूमादि०** खं० जे१,२ विना॥ २. **होइ** जे२॥ ३. **०भंगे** जे२॥ ४. **०ओ उ उल्लं उल्लं** खं०॥ ५. **बहुं च विव०** जे४ भां०॥ ६. **दोसु अण्णेसु** जे१॥ ७. **सुक्के** खं० जे१,२ विना॥ ८. **क्खित्तं** जे४ भां०॥ ९. **भाणंमि** जे१ विना॥ १०. **०द्ध या वहो** जे१॥ ११. **वह** खं० जे४ भां०॥ १२. **य** जे२॥

उक्खेवे गाहा। व्याख्या– **उत्क्षेपे** = उत्पाटने **निक्षेपे** = मोचने **महतो मात्रकस्य** दातुः पीडा भवति, **लुब्धता** साधोः, **वधे** = मात्रकभङ्गे **दाहो** भवति, '**अचियत्ते**'ति अप्रीतौ दातुस्तद्द्रव्यादे-**र्व्यवच्छेदो, द्वयोरपि भङ्गकयोर्ग्रहणे दोषा** भवन्तीति गाथार्थः ॥६०६॥

शुष्के आर्द्रमित्यस्मिन् द्वितीयभङ्गके भजनामाह–

थोवे थोवं [१]छूढं सुक्के उल्लं [२]व तं तु आइण्णं।
बहुयं तु अणाइण्णं कडदोसो सो त्ति काऊणं॥६०७॥ दारं॥

थोवे गाहा। व्याख्या– **स्तोके स्तोकं प्रक्षिप्तं** तदपि च **शुष्के आर्द्रं वा तत् त्वाचरितम्,** स्तोकत्वात्; **बहुकं त्वनाचरितं कृतदोषः स इति कृत्वे**ति गाथार्थः ॥६०७॥ गतं **संहृतद्वारम्**। साम्प्रतं **दायकद्वार**माह– ददतीति दायकाः, तत्र यैर्ददद्भिर्ग्राह्यमग्राह्यं वा देयं तानाह–

बाले वुड्ढे मत्ते उम्मत्ते वेविते य जरिते य।
अंधिल्लए पगलिए आरूढे पाउयाहिं च॥६०८॥

बाले गाधा। व्याख्या– **बालो, वृद्धो, मत्तः, उन्मत्तो, वेपमानो ज्वरितश्च अन्धश्च प्रगलितो** = गलत्कुष्ठ इत्यर्थः, **पादुकारूढश्च** अत्र च एकारान्तः शब्दः प्रथमान्तो द्रष्टव्य इति गाथा-पदच्छेदः ॥६०८॥

हत्थंदु-नियलबद्धे [३]विवज्जिए चेव हत्थ-पादेहिं [४]।
तेरासि गुव्विणी बालवच्छ भुंजंति घुसुलिंती॥६०९॥

हत्थिं० गाहा। व्याख्या– **हस्तान्दुक-निगडबद्धो** बद्धशब्दोऽत्र प्रत्येकं योजनीयः, **विवर्जितो हस्त-पादाभ्यां, त्रैराशिकः** = नपुंसक इत्यर्थः, **गुर्विणी, बालवत्सा, भुञ्जाना,** '**घुसुलेंति**'त्ति दध्यादि मथ्नतीति गाथार्थः ॥६०९॥

भज्जंती य दलेंती कंडंती चेव तह य पीसंती।
पिंजंती रुंचंती कत्तंति पमद्दमाणी य॥६१०॥

भज्जंती गाहा। व्याख्या– **भर्ज्जमाना** चणक-यव-धानादि, **दलन्ती** मृद्ग-मसूरादि **कण्डमाना चैव** तण्डुलादि **तथा च पिंषन्ती** तिला-ऽऽमलकादि, **पिञ्जन्ती** रूतादि, '**रुञ्चन्ती**'ति लोठन्यां कर्प्पासं लोठयन्तीत्यर्थः, **कृन्तन्ती** कर्प्पासं कृती वेष्टने ( ) रौधादिकस्य धातोः कर्त्तरि स्त्रियां रूपमेतत्, '**पमद्दमाणी य**'त्ति रूतं कराभ्यां पौनःपुन्येन मृद्नतीति गाथार्थः ॥६१०॥

छक्कायवग्गहत्था समणट्ठा णिक्खिवित्तु ते चेव।

(टि०) १. छोढुं जे२ विना॥ **२. तु** जे४ भां०॥ **३. बद्धो** जे२॥ **४. ०देसु** जे१॥
(वि०टि०) ◆. कृतदोषाः अनन्तरगाथायामुक्तदोषाः॥

ते चेवोगाहंती संघट्टंतारभंती य॥६११॥

छक्काय० गाहा। व्याख्या– **षट्कायव्यग्रहस्ता श्रमणार्थं निक्षिप्य तानेव** षट्कायान्, **अवगाहमाना** तानेव, पादाभ्यां **सङ्घट्टयन्ती** तानेव, **आरभमाणा च** तानेवेति गाथार्थः॥६११॥

संसत्तेण [१]य दव्वेण लित्तहत्था य लित्तमत्ता य।
उव्वत्तंती साहारणं च देंती य चोरियगं॥६१२॥

संसत्तेण गाहा। व्याख्या– **संसक्तेन द्रव्येण लिप्तहस्ता च लिप्तमात्रा च** पिठरकाद्य[२]**पवर्त्य** ददती, **साधारणं ददती चोरितकं** च ददतीति गाथार्थः॥६१२॥

पाहुडियं च ठवेंती सपच्च[३]वाया परं[४] च उद्दिस्स।
आभोगमणाभोगेण दलंती वज्जणिज्जा तु॥६१३॥

पाहुडियं गाहा। व्याख्या– **प्राभृतिकां च स्थापयन्ती, सप्रत्यपाया** दात्री, **परं चोद्दिश्य** यत् स्थापितं तद्ददती, **आभोगेनाशुद्धं** दद[५]ती **अनाभोगेन** वा **'दलंती'**ति ददती **वर्जनीया त्विति** गाथार्थः॥६१३॥

एतेसि दायगाणं गहणं केसिंचि होदि [६]भइयव्वं।
केसिंची[७] अग्गहणं तव्विवरीए भवे गहणं॥६१४॥

एतेसिं गाहा। व्याख्या– **एतेषां दायकानां** मध्ये **ग्रहणं केषाञ्चिद् भवति भाज्यं केषाञ्चिदग्रहणं तद्वैपरीत्ये** सति **भवेद् ग्रहणमिति** गाथार्थः॥६१४॥ बालाद् ग्रहणे दोषानाह–

कप्पट्ठिग[८] अप्पाहण दिण्णे अण्णोण्णगहण पज्जत्तं।
खंतिय मग्गण दिण्णे उड्डाह पदोस चारभडा॥६१५॥

कप्पट्ठिय गाहा। अस्या अर्थः कथानकादवसेयस्तच्चेदम्– काइ भद्दिगा अगारी "समणाणं भिक्खं देज्जासु" त्ति अप्पाहिऊण[❖] कप्पट्ठियं गता खेत्तं। आगतो भिक्खट्ठा साहू। दिण्णं ताए णिरवसेसमोदणाणि। अवरण्हे समागता खंतिया, मग्गिया कप्पट्ठिया भोयणट्ठमोदणं। तीए संलत्तं "दिण्णो साहूस्स सव्वो"। "सुट्ठु दिण्णो, आणेहि कुसणं"। "तं पि तस्सेव दिण्णं"। एवं खीर-दहि-तक्क-पूयलियाइ जाव अंबिलं ति मग्गिज्जंतीए साहियं कप्पट्ठियाए "दिण्णं सयलं समणस्स" त्ति। तओ रुट्ठा सा अगारी भणति "किं ते सयलं दिण्णं ?"। सा भणइ– "सो मग्गइ"त्ति। पच्छा सा तं कलहमाणी आयरियसगासं गया। साहितं सूरिणो जहा– "साहुणा मे घरं सव्वं विलोलियं" ति। ततो तीए समक्खमायरिएणं उवगरणाइ उद्दालेउं णिच्छूब्भंतो सो णिवारिओ तीए त्ति।

एवं बालाद् गृह्यमाणे **उड्डाहः प्रद्वेषः "चारभटा** एत" इति प्रवादः स्यात्, अतो बालान्न ग्राह्यमिति

(टि०) १. तु खं०॥ २. **०द्यपवृत्य** ला०॥ ३. **वायं** खं०॥ ४. **०रं समुद्दि०** जे१॥ ५. **०दतीति अ०** जि१॥ ६. **भयणा उ** खं०॥ ७. **०चि तु अ०** खं०॥ ८. **ट्ठिए** जे२॥

(वि०टि०) ❖. **अप्पाहिऊण** = संदिश्य इति **मलय०**॥

गाथार्थः ॥६१५॥ स्थविरदायकदोषानाह–

थेरो गलंतलालो कंपणहत्थो पडेज्ज वा देंतो।
अपभु त्ति य अचियत्तं एगतरे वा उभयतो वा॥६१६॥

थेरो गाहा। व्याख्या– **स्थविरो** = वृद्ध इत्यर्थः **गलल्लालः कम्पमानहस्तः पतेद्वा ददत्, अप्रभुरिति** कृत्वा **अचियत्तं** = अप्रीतिरेकतरस्मिन् साधौ दातरि वा गृहपतेः समुत्पद्यते, **'उभयतो वावि'**त्ति द्वयोर्वापीति गाथार्थः ॥६१६॥ [१]मत्तग्रहणे दोषानाह–

अवयास भाणभेदो वमणं असुइ त्ति लोगगरहा य।
पंतावणं च मत्ते वमणविवज्जा तु उम्मत्ते॥६१७॥

अवयास गाहा। व्याख्या– **अवयासणं** त्वालिङ्गनं तथा **भाजनभेदश्च वमनं** = छर्दनम्, **अशुचिरयमिति** कृत्वा लोकतो **गर्हा** = जुगुप्सा जायते **'पंतावणं'**ति आहननं **च मत्ते** दातर्य्येते **वनमवर्ज्यस्त्वेत** एव दोषा **उन्मत्तके** दातरि भवन्तीति गाथार्थः ॥६१७॥ वेपितदातृदोषानाह–

[२]वेविय परिसाडणया पासे व [३]छुभेज्ज भाणभेदो [४]वा।
एमेव य जरियंमि वि जरसंकमणं [५]च उड्डाहो॥६१८॥

वेविय गाहा। व्याख्या– दातुर्**वेपनेन परिशाटना** भवति देयस्य पात्रस्य **पार्श्वे वा क्षिपेत्** स हि वेपमानो देयं **भाजनभेदो वा** स्यात्, **एवमेते ज्वरितेऽपि** दातरि दोषा भवन्ति तथा **ज्वरसङ्क्रमणं च**शब्दात् पतनं पित्तादिवमने चो**ड्डाहः** स्यात्, अतस्ताभ्यां सकाशान्न ग्राह्यः पिण्ड इति गाथार्थः ॥६१८॥

अन्धदायकदोषानाह–

उड्डाह काय पडणं अंधे भेदो य पासछुभणं च।
तद्दोसी संकमणं गलंतभिसभिण्णदेहे [६][७]य॥६१९॥

उड्डाह गाधा। व्याख्या– **उड्डाहः** स्यात्, **'काय'** त्ति कायानां वधः, **पतनमन्धे** दातरि **भेदश्च** पात्रस्य **पार्श्वप्रक्षेपणं च** भिक्षायाः।

प्रगलितदोषानाह– **त्वग्दोषी** = कुष्ठी, किम्भूतः ? **गलद्भृशभिन्नदेहस्तस्माद्** ग्रहणे व्याधि-**सङ्क्रमणं** उच्छ्वासादिलगनेन स्यादिति, अतोऽन्ध-कुष्ठिहस्तान्न ग्राह्यः पिण्ड इति गाथार्थः ॥६१९॥

पादुकारूढादिदातृचतुष्टयदोषानाह–

पादुयदुरूढपडणं बद्धे परिताव असुइ खिंसा य।
करछिण्णासुइ खिंसा ते च्चिय पादंमि पडणं च॥६२०॥

पाउय० गाहा। व्याख्या– **पादुकारूढस्य** दातुः **पतनं** स्यात्, **बद्धे** निगडान्दुभिर्दातरि **परितापना,**

(टि०) १. **तत्र ग्रहणे** जि१॥ २. **वेवण** जे१,२ खं०॥ ३. **छुहइ** जे१॥ ४. **य** खं०। **उ** जे१॥ ५. **०मणे** खं०॥ ६. **०देहो** जे१॥ ७. **व** खं०॥

अशुचित्वाद्दातुः साधोः **खिंसा च** = निन्दा स्यात्, चशब्दात् पतनं च दातुः, **छिन्नकराद् ग्रहणेऽशुचित्वात् खिंसादयो** दोषाः, *य एव च्छिन्नकरे दोषास्त एव छिन्नपादेऽपि* **पतनं** *त्वधिकमिति*, तस्मादेतेभ्यो हस्तान्न ग्राह्यमशनादीति गाथार्थः ॥६२०॥ नपुंसकात् पिण्डग्रहणे दोषानाह–

आय-परोभयदोसा अभिक्खगहणंमि [१]खोभणा पंडे।
लोग दुगुंछा संका एरिसगा नूणमेते वि॥६२१॥

आय० गाधा। व्याख्या– **आत्म-परोभयदोषा अभीक्ष्णग्रहणे** भिक्षायाः **क्षोभणात् पण्डके** दातरि, **लोके जुगुप्सा शङ्का** च स्याद् "**ईदृशका नूनमेतेऽपि** श्रमणकाः", तस्मान्नपुंसकान्न ग्राह्या भिक्षेति *गाथार्थः ॥६२१॥ गुर्व्विणीसकाशात् पिण्डग्रहणे* दोषानाह–

गव्विणि गब्भे संघट्टणा उ [२]उट्ठंतवेसमाणीए।
बालाती मंसुंडग मज्जारादी [३]विराहेज्जा॥६२२॥

गुव्विणी गाधा। व्याख्या– **गुर्व्विण्या** भिक्षादानप्रवृत्ताया **गर्भसङ्घट्टना** = गर्भसञ्चलनं भवत्**युत्तिष्ठन्त्या उपविशन्त्याश्च**।

बालवत्सदात्रीदोषानाह– '**बालाती मंसुंडग मज्जाराई विराहेज्जा**'त्ति बालं मांसपिण्डकमिति कृत्वा मार्ज्जारादिर्विराधयेत् खरहस्तग्रहण-मोचन-परितापना-ऽन्तराय-रोदनादिदोषाश्च भवन्तीति, अतो गुर्व्विणी-बालवत्साहस्तान्न ग्राह्यमशनादीति गाथार्थः ॥६२२॥ भुञ्जानादात्रीदोषानाह–

भुंजंती आयमणे उदगं बोट्टी य लोगगरहा य।
घुसुलेंती संसत्ते करम्मि लित्ते भवे रसगा॥६२३॥

भुंजंती गाहा। व्याख्या– **भुञ्जन्ती** = भुञ्जाना भिक्षार्थमा**चमने** उदकोज्झनं कुर्य्याद् अनाचमने दात्र्या **बोटी**रित्यशुचिरिति कृत्वा **लोकगर्हा** स्यात्।

'**घुसुलेंति**' त्ति दध्यादि मथ्नती **संसक्ते** गोरसे तेन च **करे लिप्ते भवेद्बधो रसकानामिति**, अतोऽस्या हस्तान्न ग्राह्यः पिण्ड इति गाथार्थः ॥६२३॥

दग-बीए संघट्टण पीसण-कंड-दल भज्जणे [४] [५]डहणं।
[६]पिंजंत [७]रुंचणाई दिन्ने लित्ते करे उदगं॥६२४॥

दग-बीए गाहा। व्याख्या– **पेषण-कण्डन-दलना**नि कुर्व्वाणा दात्र्य **उदक-बीजानां सङ्घट्टनं** कुर्युः। **भर्जनं** कुर्व्वाणा(?ण)या दात्र्या बीजानां वधः स्यात्, **पिञ्जनं** प्रतीतं, '**रुंचणं**'ति कर्पासलोठनं, कर्त्तनं प्रसिद्धं, 'पमद्दणं विक्खिणणं' रुतस्य कराभ्यां प्रकर्षेण मर्द्दनं प्रमर्दनमित्यर्थः, एतानि कुर्व्वाणा **दत्तायां** भिक्षायां लिप्तकरधावने जलोज्झनं कुर्युस्तस्मादेतेभ्यो हस्तान्न ग्राह्या भिक्षेति गाथार्थः ॥६२४॥

(टि०) १. **खुब्भणा** खं०॥ २. **उट्ठित वेसमाणा उ** भां०॥ ३. **०राहणया** जे२॥ ४. **०ज्जणा** जे१॥ ५. **गहणं** जे१॥ ६. **कत्तेति** जे१॥ ७. **पिंजणाई** जे१। **कत्तणाइं** जे२॥ ८. **०त्थं वा** खं०॥ ९. **०एउगा०** खं०॥ १०. **०कायाणं** जे१॥

षट्कायव्यग्रहस्तादात्रीस्वरूपमाह–

लोण-दग-अगणि-बत्थी फलादि मच्छादि सजिय हत्थंमि।
पाएणोगाहणया संघट्टण सेसकाएणं॥६२५॥

लोण० गाहा। व्याख्या– **लवणं उदकं अग्निर्वायुपूरितबस्तिः फलादि सजीवमत्स्यादयश्च हस्ते** यस्याः सा यदि ददाति एतांश्च लवणादीन् श्रमणार्थं निक्षिप्य वा ददाति ततो न कल्पते पिण्डो ग्रहीतुं, **पादाभ्यां** लवणाद्यवगाहनां कुर्व्वती तथा **सङ्घट्टनां** ◆**शेषकायेन** कुर्व्वाणा यदि ददाति ततो न ग्राह्यं पिण्डादीति गाथार्थः॥६२५॥ आरभमाणादात्रीस्वरूपमाह–

खणमाणी आरभते मज्जइ धोवइ व सिंचइ वा किंचि।
छेद-विसारणमादी छिंदइ छट्ठे फुरुफुरंते॥६२६॥

खणमाणी गाहा। व्याख्या– **खनमाना** पृथिवीमारभते, **मज्जति** स्वयं **धावति वा** वस्त्रादि **सिञ्चति वा किञ्चिदित्येवं** अप्कायमारभते, ज्वलयन्ती समारभतेऽग्निम्, फूत्कुर्व्वाणा दृत्यादि वायुमारभते, शाकादे**श्छेद-विशारणादि** कुर्व्वती वनस्पतिमारभते, **छिनत्ति** मत्स्यादीन् **षष्ठे** त्रसकायसमारम्भे, **'फुरुफुरंते'**त्ति स्फुरन्त इत्येवं षट्कायान् समारम्भमाणाया हस्तान्न ग्राह्या भिक्षेति गाथार्थः॥६२६॥

केचिन्मतप्रदर्शनायाह–

छक्कायवग्गहत्थ त्ति केइ कोलादि कण्णलइयाइं।
सिद्धत्थगपुप्फाणि य सिरम्मि दिण्णाइं वज्जेंति॥६२७॥

छक्काय० गाहा। व्याख्या– **षट्कायव्यग्रहस्तेति केचन** आचार्य्याः **'कोलाइं'** बदरादीनि **कर्णे** पिनद्धानि तथा **सिद्धार्थकपुष्पाणि च शिरसि दत्तानि वर्जयन्ति** = प्रतिषेधयन्तीति गाथार्थः॥६२७॥

अण्णे भणंति दससु वि एसणदोसेसु णत्थि तग्गहणं।
तेण न वज्जं भण्णइ णणु गहणं दायगग्गहणा॥६२८॥

अण्णे गाहा। व्याख्या– **अन्ये भणन्ति दशस्वप्येषणादोषेषु नास्ति तद्ग्रहणं तेन** कारणेन **न वर्ज्जं** कोलादियुक्तदात्रीभिक्षादानम्; अत्र **भण्यते ननु** भणितं सूत्रे **दायकग्रहणादिति** गाथार्थः॥६२८॥

संसक्तद्रव्यदात्रीदोषानाह–

(टि०) १. च ला०॥ **२. ०चए किं०** भां० जे२,४॥ **३. ०फुरेंती** खं०॥ **४. विदारणादि** जि१॥ **५. सिरेइ** जे१॥ **६. त्रसकायानां** जि१॥

(वि०टि०) ◆. शेषकायेन = हस्तादिना इति **मलय०**॥ ***.** विशारणम् = पुष्पफलादेः खण्डानां शोषणायातपे मोचनं इति **मलय०**॥ **§.** हस्तग्रहणं हि किल सूत्रे उपलक्षणं तेन कर्णे शिरसि वा जीवनिकायसम्भवे तद्धस्तान्न कल्पते, तन्मतेन षट्कायव्यग्रहस्तेति पदात् षट्कायं सङ्घट्टयन्तीत्यस्य पदस्य विशेषो दुरुपपाद इति **मलय०**॥

संसज्जिमंमि देसे संसज्जिमदव्वलित्तकरमत्ता।
संचारा उव्वत्तण उक्खिप्पंते वि ते चेव॥६२९॥

संसज्जिम० गाहा। व्याख्या– **संसक्तिम(द्)**द्रव्यवति **देशे संसक्तिम(द्)द्रव्यलिप्तः करो मात्रकं** वा यस्याः सा तथा, सा चैवंविधा भिक्षादात्री वर्ज्जनीया [६]रसकानां जीवानां वधरक्षणार्थमिति, तथा **सञ्चारादीनामाघातः** [*]स्यादिति **अपवृत्त्योखादि** या ददाति सा वर्ज्जनीया, **उत्क्षिप्यापि** ददती वर्ज्जनीया, यतोऽत्र द्वौ दोषौ सञ्चारादिपीडा दात्रीपीडा चेति गाथार्थः॥६२९॥

साधारणं बहूणं तत्थ तु दोसा [१]जहेव अणिसट्ठे।
चोरियए गहणादी भयए सुण्हादि वा [२]दिंते॥६३०॥

साहारणं गाहा। व्याख्या– **साधारणं** = सामान्यं **बहूनां तत्र तु दोषा यथैवानिसृष्टे** तथैव द्रष्टव्याः। तथा **चोरितद्रव्य(?व्या)**दाने **ग्रहण**-बन्धनादयो दोषा **भृतके स्नुषा**-श्वश्रादौ **वा ददतीति** गाथार्थः॥६३०॥

पाहुडिठवियगदोसा तिरि-उड्ढ-महे तिहा अवायाओ।
धम्मियमादी ठवियं परस्स परसंतियं व त्ति॥६३१॥

पाहुडि० गाहा। व्याख्या– **प्राभृतिकां** बल्यादिनिमित्तं संस्थाप्य या ददाति तत्र **स्थापितद्वारे** ये **दोषाः** प्रवर्त्तनादयस्तेऽत्राऽपि भवन्ति। सप्रत्यपायेति यदुक्तं तदपायानाह– **तिर्यग्**पायो गवाद्यभिघात **उद्ध्वं** काष्ठाद्यभिघातोऽधस्ताद् अहिबिल-कण्टकादि **त्रिधा अपाया** भवन्ति, तस्माद्वर्ज्जनीया सप्रत्यपायेति।

'परं चोद्दिश्य' (इति) यदुक्तं तदाह– [§]**धार्मिकाद्यर्थं स्थापितं परस्य 'परसंतियं वे'**ति परकीयं वेति गाथार्थः॥६३१॥

आभोगा-ऽनाभोगदायकद्वयमाह–

अणुकंपा पडिणीयट्ठया [३]व ते कुणइ जाणमाणो वि।
एसणदोसे बिइओ उ कुणइ असढो अयाणंतो॥६३२॥

अणुकंपा गाहा। व्याख्या– **अनुकम्पया प्रत्यनीकार्थतया वा तानेषणादोषान् करोति जानानोऽपि** द्वितीयस्तु **करोत्यशठोऽजानानो**ऽनाभोगत इत्यर्थ इति गाथार्थः॥६३२॥

यदुक्तमेतेषां दायकानां मध्ये केषाञ्चित् ग्रहणं भाज्यं केषाञ्चिदग्रहणमिति तदाह–

भिक्खामेत्ते अविचारणा तु बालेण दिज्जमाणंमि।

(टि०) १. तहेव जि१॥ **२. देंतो** जे१,२॥ **३. च** जे१॥ **४. ०ण्णाए** खं०॥

(वि०टि०) ❖. सञ्चारादीनाम् = पिपीलिकादीनाम् इति ला० टि०॥ ***. उखा** = स्थाली इति **ला० टि०**॥

§. धार्मिकाद्यर्थं अपरसाधुकार्पटिकप्रभृतिनिमित्तं यत् स्थापितं तत्परस्य परमार्थतः सम्बन्धीति न गृह्णीयात् तद्ग्रहणे-ऽदत्तादानदोषसम्भवात्, न कल्पते अदत्तादानदोषात् इति **मलय०**॥

संदिट्ठे वा गहणं अतिबहुय वियालणेऽणुण्णा[४]॥६३३॥

भिक्खा० गाहा। व्याख्या– **भिक्षामात्रके अविचारणा तु बालेन दीयमाने** गृहपति**सन्दिष्टे वा** बाले **ग्रहणम्, अतिबहुकं** ददति बाले **विचारणे** कृते **यद्यनुज्ञा** भवति ततो ग्राह्यमिति गाथार्थः॥६३३॥

स्थविरदायकापवादमाह–

थेर पभु थरथरंते धरिए अण्णेण दढसरीरे वा।
अव्वत्तमत्तसट्ठे अविंभले वा असागरिए॥६३४॥

थेर गाहा। व्याख्या– **स्थविरो** यदि **प्रभुर्भ**वति **'थरथरंते'**त्ति कम्पमानो **यद्यन्येन** विधृतो भवति **दृढशरीरो वा** यदि [१]भवेत् ततो ग्राह्यम्।

मत्तदायकापवादमाह– **अव्यक्तं** मनाग् **मत्तो** यः **श्राद्धकश्चाविह्वलो वा** यदि च सागारिको नास्ति तस्मान्मत्तादप्येवंविधाद् ग्राह्यमशनादीति गाथार्थः॥६३४॥ उन्मत्तकापवादमाह–

सुइ भद्दग दित्तादी दढग्गहे वेविते जरम्मि सिवे।
अण्णधरियं तु सट्ठो देंतंऽधोऽन्नेण[२] वा धरिओ॥६३५॥

सुइ गाहा। व्याख्या– **शुचिर्भद्रकश्च** यदि भवति **दृप्तादि**रुन्मत्तकः, **आदि**शब्दाद् ग्रहगृहीतादयो गृह्यन्ते, ईदृशादुन्मत्तकादपि ग्राह्यम्, तथा **दृढहस्तग्रहो वेपितो**[३] यदि भवति ततो ग्राह्यं तथा ज्वरितादपि ग्राह्यं **ज्वरे शिवे** सति।

अन्धकदायकापवादमाह– **अन्धो**ऽपि **विधृतमन्येन** देयं **श्राद्धो ददात्यन्येन वा धृतः** सन् यदि ददाति ततोऽन्धकादपि ग्राह्यमिति॥६३५॥ प्रगलितदायकापवादमाह–

मंडलपसुत्तिकुट्ठी[◆] असागरिए[४] पाउयागए अचले।
कमबद्धे सवियारे इयरे बेट्ठे असागरिए॥६३६॥

मंडल० गाहा। व्याख्या– **मण्डलप्रसुप्तिकुष्ठयुक्तो** यः कुष्ठी सागारिकरहितः तस्माद् गृह्यते, तथा **'पाउआगए अचले'**त्ति पादुकारूढः स्थानस्थितो यदि ददाति ततः कारणे सति तस्मादपि ग्राह्यम्।

बद्धापवादमाह– **'कमबद्धे सवियारे'**त्ति क्रमयोर्बद्धः सविचारो = यो गन्तुं शक्नोत्यपीडितस्तस्माद् ग्राह्यम्, **इतरस्तु** अविचार **उपविष्टो** यद्यविद्यमानसागारिको ददाति ततः कल्पत इति गाथार्थः॥६३६॥

तथा–

पंडग अप्पडिसेवी वेला थणजीवि थेरितर[५] सव्वं[६]।

(टि०) १. भवेद्दाना ग्राह्यम् जि१॥ **२. ०तोंधो वणेण** जे२॥ **३. ०होऽवेपि०** जि१॥ **४. ०सारीए** जे४ भां०॥ **५. सवियारे** जे२॥ **६. ०व्वे वि** जे१॥ **७. ०त्ते अणाए** खं० जे१॥ **८. अकिंचि०** जे१,२॥

(वि०टि०) ◆. मलयगिरिसूरिमते 'पसूति' इति पाठः स्यात्। तथा च तट्टीका → मण्डलानि वृत्ताकारदद्रुविशेषरूपाणि, प्रसूतिः– नखादिविदारणेऽपि चेतनाया असंवित्तिस्तद्रूपो यः कुष्ठः रोगविशेषः .....इति **मलय०**॥

उक्खित्तमणावाए[७] अकंचिलग्गे[८] ठवंतीए॥६३७॥

पंडग गाहा। व्याख्या– **पण्डकोऽप्रतिसेवी** यस्तस्माद् ग्राह्यम्, तथा गुर्विणी या कालमासिनी दात्री सा परिहार्य्या तद्विपरीताया हस्ताद् ग्राह्यम्, तथा बालवत्सेति **स्तनोपजीवी** बालो यस्याः सा दात्री परिहार्य्या, यस्याः त्वाहारेऽपि बालो लगति तस्या हस्ताद् ग्राह्या भिक्षा स्थविरैरिति; जिनकल्पिकास्तु मूलत एवापन्नसत्त्वा बालवत्सा च या ताभ्यां हस्तान्न गृह्णन्ति, तथा कण्डमानाया **उत्क्षिप्तं** मुशलं **अकाश्चीलग्नबीजं अनपाये** प्रदेशे **स्थापयन्त्या** ग्राह्यमशनादीति गाथार्थः॥६३७॥ तथा–

पीसंती णिप्पिट्ठे[१] फासुं[२] वा घुसलणे असंसत्तं।
कत्तण[३] असंखचुण्णं[४] चुण्णं[५] वा जा अचोक्खलिणी॥६३८॥

पीसंती गाहा। व्याख्या– **पिंषन्ती निःपिष्टे** = पेषणसमाप्तौ **प्रासुकं वा** पिंषन्ती या ददाति तस्याः हस्ताद् ग्राह्यः पिण्डः, तथा '**घुसलणे**'त्ति **असंसक्तं** दध्यादि मथ्नत्या ग्राह्या भिक्षेति, तथा **कर्त्तने** या शङ्खचूर्णं विना कृणत्ति(?ती) **सचूर्णं वा** कृणती **या** न हस्तप्रक्षालनशीला तस्या हस्ताद् ग्राह्यः पिण्ड इति गाथार्थः॥६३८॥ तथा–

उव्वट्टणे संसत्तेण[६] वावि अट्ठिल्लए न घट्टेइ।
पिंजण-पमद्दणेसु य पच्छाकम्मं जहिं णत्थि॥६३९॥

उवट्टणे गाहा। व्याख्या– **उद्वर्त्तने** = कर्प्पासलोठने[७] '**संसत्तेण वावि**'त्ति संसक्तो– हस्तस्थो यदि कर्प्पासो न भवति दात्र्या, उत्तिष्ठन्ती वा '**अट्ठिल्लए**'त्ति कर्कटकान्न **घट्टयति** यदि ततो ग्राह्यम्। तथा **पिञ्जन-प्रमर्द्दनयोः पश्चात्कर्म्म** यथा न भवति तथा ग्राह्या भिक्षेति गाथार्थः॥६३९॥

सेसेसु[८] तु[९] पडिवक्खो ण संभवइ कायगहणमादीसु।
पडिपक्खस्स अभावे नियमा तु[१०] भवे तदग्गहणं॥६४०॥ दारं॥

सेसेसु गाहा। व्याख्या– **शेषेषु तु** पदेषु **प्रतिपक्षः**– अपवादो **न सम्भवति** '**कायगहणमाईसु**'त्ति षट्कायव्यग्रहस्तादिषु, अतः **प्रतिपक्षस्य अभावान्नियमात्तु भवेत् तेष्वग्रहणं** पिण्डस्येति गाथार्थः॥६४०॥ गतं **दायकद्वारम्**। अधुनोन्मिश्रद्वारमाह– तच्च त्रिधा सचित्ता-ऽचित्त-मिश्रभेदात्, आह च–

सच्चित्ते अच्चित्ते मीसग उम्मीसगंमि[११] चउभंगो।
आदितिए पडिसेहो चरिमे भंगम्मि भयणा तु॥६४१॥

सचित्ते गाहा। व्याख्या– सचित्ता-ऽचित्त-मिश्रपदेषु[१२] उन्मिश्रद्वारे चत्वारो भङ्गा भवन्ति।

(टि०) १. फासुयं वा खं० जे२॥ **२. ०सत्ते** खं० जे१॥ **३. ०त्तणे** भां०॥ **४. ०चुण्णे** खं० विना॥ **५. ०ण्णे** जे२ खं०॥ **६. ०त्तणे** जे२॥ **७. ०ने असंस०** जि० जि१॥ **८. ०सेहिं** खं०॥ **९. य** जे१॥ **१०. य** जे१॥ **११. ०म्मीलियं** जे१॥ **१२. ०श्रभेदेषू०** ला०॥ **१३. अत्रा०** जि०॥

(वि०टि०) ❖. 'अट्ठिल्लए' अस्थिकान् कार्पासिकानित्यर्थः इति **मलय०**॥

तत्राद्यभङ्गत्रये **प्रतिषेधश्चरमे भङ्गे** अचित्तेऽचित्तं उन्मिश्र्य ददातीत्येवं लक्षणे **भजना तु** भवतीति गाथार्थः ॥६४१॥ अतिदेशं कुर्व्वन्नाह–

जह चेव य संजोगा कायाणं हेट्ठओ तु साहरणे।
तह चेव य उम्मीसे होइ विसेसो इमो तत्थ॥६४२॥

जह चेव य गाहा। व्याख्या– **यथा चैव संयोगाः कायानां** पृथिव्यादीनां **अधस्तात्तु संहरणे,** प्रदर्शिता इति गम्यते, **तथा चैवोन्मिश्रेऽपि** द्रष्टव्याः, नानात्वमिदं तृतीयभङ्गे यथा पूर्व्वमुक्तं तथैव अचित्तं सचित्ते पृथिव्यादावुन्मिश्र्य ददातीत्येवं लक्षणे तृतीयभङ्गेऽत्रापि द्रष्टव्यम् ॥६४२।

ननु संहृतद्वारोन्मिश्रद्वारयोः कः पुनर्विशेष ? इत्याह–

दायव्वमदायव्वं च दो वि दव्वाइं देइ मीसेउं।
ओयणकुसणादीणं[१] साहरण तदण्णहिं छोढुं॥६४३॥

दायव्वं गाहा। व्याख्या– **दातव्यमदातव्यं च ददाति द्रव्ये द्वे अपि मिश्रयित्वा यथौदनं कुशनेन** मिश्रयित्वा एवंविधमुन्मिश्रलक्षणं भवति, संहरणं तु भिक्षादानार्थं दध्यादिमात्रकस्थितद्रव्यमन्यत्र तत् संहृत्य ददातीत्येवं स्वरूपं **संहरणमिति** गाथार्थः ॥६४३॥ चतुर्थभङ्गभजनामाह–

तं पि य सुक्के सुक्कं भंगा चत्तारि जह तु साहरणे।
अप्पबहुए वि चउरो तहेव आइण्णऽणाइण्णे॥६४४॥

तं पि गाहा। व्याख्या– **तदपि च** यदचित्तेऽचित्तं उन्मिश्र्य ददातीति एतदपि **शुष्के शुष्कमित्याद्येवं** रूपा[*]श्चत्वारो **भङ्गा यथा तु संहरणे** तथाऽत्राऽपि द्रष्टव्याः। [§]**अल्प-बहुक**पदद्वयेऽपि **चत्वारो** भङ्गाः, [□]**आचरिता-ऽनाचरित**स्वरूपास्**तथैव** द्रष्टव्या यथा संहरण इति गाथार्थः ॥६४४॥

गतं **उन्मिश्रद्वारम्**। इदानीं **अपरिणतद्वारं** द्विविधमाह–

अपरिणयं पि य दुविहं दव्वे भावे य दुविहमेक्केक्कं।

(टि०) १. ०दीणि खं०॥

(वि०टि०) ◆. यथा संहरणद्वारे तृतीयभङ्गे स्वस्थान-परस्थानापेक्षया षट्त्रिंशत्संयोगाः प्रदर्शिताः तथैव अत्राऽपि भावनीयाः, तद्यथा सचित्तपृथिवीकायः सचित्तपृथिवीकाये उन्मिश्रः, सचित्तपृथिवीकायः सचित्ताप्काये उन्मिश्र इत्येवं स्वयं संयोगा ऊहनीयाः॥ *. चत्वारो भङ्गा इमे- शुष्के शुष्कम् (१) शुष्के आर्द्रम् (२) आर्द्रे शुष्कम् (३) आर्द्रे आर्द्रम् (४)॥ §. अल्पबहुत्वे अधिकृत्य चत्वारो भङ्गा तद्यथा-"स्तोके शुष्के स्तोकं शुष्कम् (१) स्तोके शुष्के बहुकं शुष्कम् (२) बहुके शुष्के स्तोकं शुष्कम् (३) बहुके शुष्के बहुकं शुष्कमिति (४) एवं शुष्के आर्द्रमित्यादावपि भङ्गत्रिके प्रत्येकं चतुर्भङ्गी भावनीया, सर्वसङ्ख्यया भङ्गाः षोडश" इति **मलय०**॥ □. आचरिता-ऽनाचरितस्वरूपा इमे-"शुष्के शुष्कमित्यादीनां चतुर्णां भङ्गानां प्रत्येकं यौ द्वौ द्वौ भङ्गौ स्तोके स्तोकमुन्मिश्रं बहुके स्तोकमित्येवंरूपौ तौ कल्प्यौ दात्रीपीडादिदोषाभावात् स्तोके बहुकं, बहुके बहुकमित्येवंरूपौ तु यौ द्वौ द्वौ भङ्गौ तावकल्प्यौ तत्र दात्रीपीडादोषसम्भवात् ..." इति **मलय०**॥

दव्वंमि होइ छक्कं भावंमि य होति सज्झिलगा॥६४५॥

अपरिणयं पि य गाहा। व्याख्या– **अपरिणतमपि च द्विविधं द्रव्यविषयं भावविषयं च**, पुनरपि **द्विविधमेकैकं** दातृ-ग्रहीतृसम्बन्धात्। **द्रव्ये भवति** सचेतनं पृथिव्यादिषट्कं **'भावम्मि य होति सज्झिलग'**त्ति भावे च भवति भ्रात्राद्येकतरभावोऽपरिणत इति गाथार्थः॥६४५॥

द्रव्यापरिणतस्वरूपमाह–

जीवत्तंमि अविगते अपरिणयं परिणयं गते जीवे।
दिट्ठंतो दुद्ध-दही[१] इय अपरिणयं परिणयं[२] तं च॥६४६॥

जीवत्तंमि गाहा। व्याख्या– **जीवत्वे** न विगते = **अविगते अपरिणतं** पृथिव्यादिद्रव्यमुच्यते, **परिणतं गते जीवे** भवति। **दृष्टान्तो**ऽत्र **दुग्ध-दधिनी** दुग्धं दधिभावेनानापन्न**मपरिणतं** तदेव दुग्धं दधिभावेनापन्नं **परिणतं** चेति गाथार्थः॥६४६॥ भावापरिणतस्वरूपमाह–

दुगमादीसामण्णे जति परिणमती तु तत्थ एगस्स
देमि त्ति ण सेसाणं अपरिणयं भावतो एवं[५]॥६४७॥

दुगमाई गाधा। व्याख्या– भ्रात्रादि**द्विकादिसामान्ये** देये **यदि परिणमति तु तत्रैकस्य ददामीत्येवं** भावो **न शेषाणामित्यपरिणतं भावत[◆] एवं** स्यादिति गाथार्थः॥६४७॥ ग्रहीतृविषयं भावापरिणतमाह–

एगेण वावि एसिं[६] मणंमि परिणामितं ण इयरेणं।
तं पि हु होदि अगेज्झं सज्झिलगा सामि साहू वा[७]॥६४८॥दारं॥

एक्केण गाहा। व्याख्या– **एकेन** वाऽप्येषणीयं **मनसि परिणामितं नेतरेण** साधुना **तदपि** च **भवति अग्राह्यमिति**[८], भावापरिणतं च भ्रातृ-**स्वामि-साधु**विषयं भवतीति गाथार्थः॥६४८॥

भणित**मपरिणत**द्वारम्। अधुना **लिप्त**द्वारमाह– लिप्तं नाम यत्र दध्यादि[९]द्रव्यलेपो लगति, एतच्च न ग्राह्यमिति। आह च–

घेत्तव्वमलेवकडं लेवकडे मा हु पच्छकम्मं[१०] ति[*]।
न य रसगेहिपसंगो इति वुत्ते चोदओ भणइ॥६४९॥

घेतव्व० गाहा। व्याख्या– **गृहीतव्यमलेपकृतं** वल्ल-चनकादि, **लेपकृते मा भूत् पश्चात्कर्मे**ति अतस्तन्न गृह्णन्ति। अलेपकृतग्रहणे गुणमाह– **न च रसगृद्धिप्रसङ्गो** भवतीत्युक्ते **चोदको भणती**ति

(टि०) १. दहि जे१,२ विना॥ **२. इत्ति परि०** खं०॥ **३. अप०** खं०॥ **४. ०भावापन्नं परिणतमपरिणतं चेति गाथार्थः** जि० जि१॥ **५. एयं** जे२ विना॥ **६. तेसिं** जे४ भां०। **णसिं** खं०॥ **७. य** खं०॥ **८. ०ति य। जीवापरि०** जि० जि१॥ **९. दध्यादेर्देयद्रव्य०** ला०॥ **१०. ०कम्माइं** जे४ भां०॥ **११. अभक्षणं** ला०॥

(वि०टि०) ◆. "अथ साधारणानिसृष्टस्य दातृभावापरिणतस्य च कः परस्परं प्रतिविशेषः ? उच्यते, साधारणानिसृष्टं दायकपरोक्षत्वे, दातृभावापरिणतं तु दायकसमक्षत्वे इति।" इति **मलय०**॥ ***. वीरगणिमते ०कम्माइं** इति पाठः स्यात्॥

गाथार्थः॥६४९॥

जइ पच्छकम्मदोसा हवंति मा चेव भुंजऊ सततं।
तव-नियम-संजमाणं चोदग! हाणी खमंतस्स॥६५०॥

जइ गाहा। व्याख्या– **यदि** लेपकृतग्रहणे **पश्चात्कर्म्मादयो दोषा भवन्ति** तदानीं **मा चैव भुङ्क्तां सततं** = सर्व्वकालमपि। गुरुराह– **तपःसंयमयोगानां** हे **चोदक** ! **हानिर्भवति** सर्व्वकालं [११]क्षपणं कुर्व्वतः साधोः, अतः कारणाद् भोक्तव्यमिति गाथार्थः॥६५०॥

पुनरप्याह चोदको– यदि सर्व्वकालं क्षपणं कर्तुमसमर्थस्ततः षण्मासक्षपणं कृत्वाऽलेपकृतं भुङ्क्ताम्। गुरुराह– यदि तपः-संयमयोगान् कर्तुं शक्नोति ततः षण्मासादपि भुङ्क्ताम्।

चोदक आह– यद्येवं ततः षण्मास[१]क्षपणमेकदिनादिहान्याऽलेपकृतं भुञ्जानस्तावत् करोतु यावच्चतुर्थमिति एवमप्यसंस्तरणेऽल्पलेपं भुङ्क्ताम्। अमुमेवार्थं गाथयाह–

लित्तं ति भाणिऊणं छम्मासा हायए चउत्थं[२] तु।
आयंबिलस्स गहणं असंथरे अप्पलेवं तु॥६५१॥

लित्तं ति गाहा। व्याख्या– **लिप्तं** सदोष**मिति भणित्वा**ऽलेपकृतं भोक्तव्यमिति गुरुवचनम्; चोकदस्त्वाह– यावज्जीवमेव मा भुङ्क्तां, न चेच्छक्नोति ततः **षण्मासा**[३]नुपोष्य आचाम्लेन भुङ्क्तां, न चेच्छक्नोति तत एकदिनादिहान्या तावद् याव**च्चतुर्थ**मुपोष्य **आचाम्लस्य ग्रहणं** [४]करोतु, एवमप्य-**संस्तरणेऽल्पलेपं** गृह्णात्विति गाथार्थः॥६५१॥ एनामेव गाथां विवृण्वन्नाह–

आयंबिल पारणए छम्मास निरंतरं तु खमिऊणं।
जति न तरति छम्मासे एगदिणूणे[५] ततो कुणउ॥६५२॥

आयंबिल गाधा। व्याख्या– यदि सर्व्वकालं क्षपणं कर्तुं न शक्नोति तत **आचाम्लं** करोतु **पारणके षण्मासान्निरन्तरं क्षपणं कृत्वा, यदि न शक्नोति षण्मासानुपवस्तुं एकदिनोनांस्ततः** करोत्विति गाथार्थः॥६५२॥

एवं एक्केक्कदिणं आयंबिलपारणं[६] करेऊणं।
दिवसे दिवसे गेण्हतु आयंबिलमेव निल्लेवं॥६५३॥

एवं गाधा। व्याख्या– **एवं** षण्मासावधेरेकैकदिनं परित्यज्य **आचाम्लेन पारणकं करोतु** तावद् यावच्चतुर्थम्, एवमप्यसमर्थो[७] **दिवसे दिवसे गृहणात्वाचाम्लमेव निर्लेपमिति** गाथार्थः॥६५३॥ गुरुराह–

जदि से ण जोगहाणी संपति एसे व होइ तो खमओ।
खमणंतरे य आयंबिलं तु नियतं तवं कुणउ॥६५४॥

(टि०) १. ०साक्षप० ला०। २. ०त्थादी खं०॥ ३. सामुपो० ला०॥ ४. करोति जि१॥ ५. णूणा खं० विना॥ ६. हवेऊणं जे४ भां०॥ ७. ०मर्थे जि१॥ ८. मरहट्ठग जे१॥

जइ से गाधा। व्याख्या– **यदि** 'से'त्ति साधोर्न **योगहानिः साम्प्रतं एष्यत्काले वा भवति ततः क्षपणं** करोतु, **क्षपणान्तरेऽप्याचाम्लं** करोतु **नियतं** वा तदाचाम्लं **करोतु** यदि शक्नोतीति गाथार्थः ॥६५४॥

चोदक आह–

हेट्ठावणि कोसलया सोवीरग-कूरभोइणो मणुया।
जइ ते वि जवंति तहा किं नाम जती ण जवंति॥६५५॥

हेट्ठा० गाहा। व्याख्या– **'हेट्ठावणि'**त्ति महाराष्ट्रास्तथा **कोशलदेशोद्भवाः सौवीरक-कूरभोजिनो मनुजा यदि तेऽपि यापयन्ति तथा किमिति नाम यतयो न यापयन्ति,** अपि तु यापयन्त्येवेति गाथार्थः ॥६५५॥ गुरुराह–

तिय सीयं समणाणं तिय उण्ह गिहीण तेणऽणुण्णायं।
तक्कादीणं गहणं कट्टरमादीसु भतियव्वं॥६५६॥

तीय सीयं गाहा। व्याख्या– **त्रिकं शीतं श्रमणानां** वक्ष्यमाणं तदेव **त्रिकमुष्णं गृहिणां तेन** कारणेनानुज्ञातं **तक्रादीनां ग्रहणं** साधूनां, **कट्टरादिषु** = घृतवटिकोन्मिश्रतीमनादिषु ग्रहणं **भाज्यमिति** गाथार्थः ॥६५६॥ किं तत् त्रिकम् ? इत्याह–

आहार-उवहि-सेज्जा तिण्णि वि उण्हा गिहीण सीते वि।
तेण उ जीरति तेसिं दुहओ उसिणेण आहारो॥६५७॥

आहार० गाहा। व्याख्या– **आहारोपधि-शय्यास्तिस्रोऽपि उष्णा गृहिणां शीतेऽपि** = शीतकालेऽपि **तेन तु जीर्यति तेषां 'दुहओ'**त्ति उभयतो– बाह्यतोऽभ्यन्तरतश्चोष्णेन **आहार** इति गाथार्थः ॥६५७॥

एयाइं चिय तिण्णि वि जतीण सीयाइं होंति गिम्हे वि।
तेणुवहम्मति अग्गी ततो [१]य दोसा अजीरादी॥६५८॥

एयाइं चिय गाहा। व्याख्या– **एतान्येव त्रीण्यपि** पूर्वोक्तानि **शीतानि भवन्ति ग्रीष्मेऽपि तेन** कारणेनोपहन्यते **अग्निः** जाठरः, **तस्माच्चाग्न्युपघातात् दोषा** भवन्त्यजीर्णादयो, यस्मान्न केवल-मन्तर्गतेनैव जठराग्निना आहारः पच्यते किन्तु तक्रादिनाऽपि आहारपक्तिर्भवतीति, अतोऽनुज्ञातं तक्रादीनां ग्रहणं साधूनामिति गाथार्थः ॥६५८॥ अलेपद्रव्यप्रदर्शनायाह–

ओदण-मंडग-सत्तुग-कुम्मासा रायमास-कल-वल्ला।
तूवरि-मसूर-मुग्गा मासा य अलेवडा सुक्का॥६५९॥

(टि०) १. उ जे१॥ २. अस्या गाथाया अनन्तरं अधिका गाथा जे२ प्रतौ उपलभ्यते सा चेयम् - **जइ एय विप्पहूणा तव नियम गुणा भवे निरवसेसा। आहारमाइयाणं को ताण परिग्गहं कुज्जा॥**

(वि०टि०) ❖. कलाः = वृत्तचनकाः सामान्येन वा चनकाः इति **मलय०**। **कलायः** = त्रिपुटाख्यो धान्यविशेषः **प्र०सा०वृ०गा०** ९९७॥

ओदण० गाहा। व्याख्या– **ओदन-मण्डक-सक्तुक-कुल्माष-राजमाष-कलाय-वल्ल-तुवरी-मसूर-मृद्ग-माषाश्चैतानि अलेपद्रव्याणि शुष्कानीति** गाथार्थः ॥६५९॥ अल्पलेपद्रव्यप्रकाशनायाह–

उब्भिज्ज पेज्ज कूरो तक्कोल्लण-सूव-कंजि-कढियादी।
एए तु अप्पलेवा पच्छाकम्मं तहिं भइयं[२] ॥६६०॥

उब्भज्जि गाहा। व्याख्या– **'उब्भजी'**त्ति भर्जिका वस्तुल-चिल्लीशाकादिकृता, **पेया** यवागूः, **कूरं** कोद्रवौदनम्, **तक्रम्**, **उल्लणं** येनौदनार्द्रीक्रियते, **सूपः**, **काञ्जिकम्**, **क्वथितिकेत्येवमादीनि** एतानि अल्पलेपानि पश्चात्कर्म्म तेषु भाज्यमिति गाथार्थः ॥६६०॥. बहुलेपद्रव्यकथनायाह–

खीर-दहि-जाउ-कट्टर-तेल्ल-घयं फाणियं सपिंडरसं।
इच्चादी बहुलेवं पच्छाकम्मं तहिं नियमा॥६६१॥

खीर० गाहा। व्याख्या– क्षीरं, दधि, **'जायु'**त्ति क्षीरपेया, कट्टरं, तैलं, घृतं, फाणितं, सपिण्ड-रसमित्यादि द्रव्यकदम्बकं बहुलेपं पश्चात्कर्म्म तत्र नियमाद् भवतीति गाथार्थः ॥६६१॥

साम्प्रतं अल्पलेपद्रव्यपश्चात्कर्म्मभजनां अष्टभङ्गिकया कथयन्नाह–

संसट्ठेतर हत्थो[१] मत्तो वि य दव्व सावसेसितरं।
एतेसिं[२] अट्ठ भंगा नियमा गहणं तु ओएसु॥६६२॥दारं॥

संसट्ठेयर गाधा। व्याख्या– तत्र दातुः संसृष्टोऽसंसृष्टो वा **हस्तो** भवति, **मात्रकमपि च** संसृष्टमितरद् वा, **द्रव्यमपि सावशेषं इतरद्** वाऽसावशेषमिति **एषां** त्रयाणां संसृष्टहस्त-संसृष्टमात्र-सावशेषद्रव्यपदानां **अष्टौ भङ्गा** भवन्ति। ते चामी– संसृष्टो हस्तः संसृष्टं मात्रकं सावशेषं द्रव्यमिति प्रथमो भङ्गकः (१) संसृष्टो हस्तः संसृष्टं मात्रकं निरवशेषं द्रव्यमिति द्वितीयो भङ्गकः (२) संसृष्टो हस्तोऽसंसृष्टं मात्रकं सावशेषं द्रव्यमिति तृतीयः (३) इत्येवमष्टौ[३] भङ्गा भावनीयाः। तत्र **नियमाद् ग्रहणं तु** भवति **'ओजेसु'**त्ति विषमेषु प्रथम-तृतीय-पञ्चम-सप्तमभङ्गकेष्विति गाथार्थः ॥६६२॥

गतं **लिप्तद्वारम्**। अधुना **छर्दितद्वारमाह**– छर्दितमुज्झितं त्यक्तं क्षिप्तमित्येकोऽर्थः, तदपि च सचित्ता-ऽचित्त-मिश्रभेदात् त्रिधा भवतीत्याह–

(टि०) १. ०त्थे जे१ खं०॥ **२. ०तेसु** जे१ विना॥ **३. अचित्त** जि०॥

(वि०टि०) ◆. कट्टरं = तीमनोन्मिश्रघृतवटिकारूपं इति **मलय०**॥ ***. फाणितं** = गुडपानकं इति **मलय०**॥ ▽. **सपिण्डरसं** = द्रवगुडो खर्जूरादि च॥ **३. शेषभङ्गकाश्च अमी**– संसृष्टो हस्तोऽसंसृष्टं मात्रकं निरवशेषं द्रव्यं (४) असंसृष्टो हस्तः संसृष्टं मात्रकं सावशेषं द्रव्यं (५) असंसृष्टो हस्तः संसृष्टं मात्रकं निरवशेषं द्रव्यं (६) असंसृष्टो हस्तोऽसंसृष्टं मात्रकं सावशेषं द्रव्यं (७) असंसृष्टो हस्तोऽसंसृष्टं मात्रकं निरवशेषं द्रव्यं (८)॥ □. इह हस्तो मात्रं वा द्वे वा स्वयोगेन संसृष्टे वा भवतोऽसंसृष्टे वा न तद्वशेन पश्चात्कर्म सम्भवति, किं तर्हि ? द्रव्यवशेन, तथाहि– यत्र द्रव्यं सावेशषं तत्रैव साध्वर्थं खरण्टितेऽपि न दात्री प्रक्षालयति, भूयोऽपि परिवेषणसम्भवात् यत्र तु निरवशेषं द्रव्यं तत्र साधुदानानन्तरं नियमतः तद्द्रव्याधारस्थालीं हस्तं मात्रं वा प्रक्षालयति ततो द्वितीयादिषु भङ्गेषु द्रव्ये निरवशेषे पश्चात्कर्मसम्भवान्न कल्पते, प्रथमादिषु तु पश्चात्कर्मासम्भवात् कल्पते इति **मलय०**॥

सच्चित्ते अच्चित्ते मीसग तह छड्डणे य चउभंगो।
चउभंगे पडिसेहो गहणे आणादिणो दोसा॥६६३॥

[३]**सचित्त** गाधा। व्याख्या– **सचित्ता-ऽचित्त-मिश्रद्रव्याणां** आधाराधेयविवक्षया **तथा छर्दने चतुर्भङ्गिका** भवति। **चतुर्भङ्गिकायामपि प्रतिषेधः, ग्रहणे आज्ञाभङ्गादयो दोषा** भवन्तीति गाथार्थः ॥६६३॥ अत्र दोषानाह–

उसिणस्स छड्डणे दिंतओ व डज्झेज्ज कायदाहो वा।
सीयपडणम्मि काया पडिए महुबिंदुआहरणं॥६६४॥दारं॥

उसिणस्स गाहा। व्याख्या– **उष्णस्य** द्रव्यस्य **छर्दने** = समुज्झने **ददमानो वा दह्येत,** तदुष्णं यत्र पतति तत्र **कायानां दाहो वा** स्यात्, **शीतद्रव्यस्य पतने 'काय'**त्ति षट्कायानां घातः **पतिते** च भूमौ द्रव्ये **मधुबिन्दूदाहरण**कथन-दोषा वाच्या इति गाथार्थः॥६६४॥

अभिहितं **छर्दितद्वारम्,** तदभिधानाच्च समाप्ता ग्रहणैषणा।

गृहीतस्य चाहारस्य विधिना ग्रासः कर्त्तव्य इति, अतो ग्रासैषणा प्राप्तेति। सा च नामादिचतुर्विधा भवतीत्याह–

णामं-ठवणा-दविए भावे घासेसणा मुणेयव्वा।
दव्वे मच्छाहरणं भावंमि [१]उ होदि पंचविहा॥६६५॥

णामं० गाहा। व्याख्या– **नाम-स्थापना-द्रव्य-भाव**विषया चतुर्विधा **ग्रासैषणा ज्ञातव्या**। तत्र नाम-स्थापने क्षुण्णत्वादनादृत्य द्रव्य-भावग्रासैषणाद्वयमाह– **द्रव्ये** द्रव्यग्रासैषणायां मत्स्योदाहरणं **भाव**ग्रासैषणा **तु पञ्चविधे**ति गाथार्थः॥६६५॥ द्रव्यग्रासैषणोदाहरणसम्बन्धमाह–

चरियं च कप्पियं वा आहरणं दुविहमेव नायव्वं।
अत्थस्स साहणट्ठा इंधणमिव ओदणट्ठाए॥६६६॥

चरियं च गाधा। स्पष्टार्था॥६६६॥

तत्र कल्पितोदाहरणं इदम्– जधा एगो मच्छिओ मच्छगहणणिमित्तं गओ सरवरं। तत्थ य मंसपेसीसणाहो पक्खित्तो गलो। तत्थ य जुण्णमच्छो तं मंसं पेरंतेसु खाइऊण पच्छा पुच्छेण गलमाहणिऊण लहूमवक्कंतो। गहिउ त्ति काउं कड्ढिओ गलो मच्छरहिओ। पुणो वि तहेव पक्खित्तो गलो सबडिसो, तहेव खाइऊण मंसमवक्कंतो। एवं तिण्णि वाराओ जाव सव्वं मंसं खइयं न य गहिओ मच्छो त्ति।

अह मंसम्मि पहीणे झायंतं मच्छियं भणइ मच्छो।
किं झायसि तं एवं सुण ताव जहा अहिरिओ सि॥६६७॥

अह गाहा। व्याख्या– **अथ मांसे प्रक्षीणे ध्यायन्तं मात्स्यिकं भणति मत्स्यः ''किं ध्यायसि**

(टि०) १. य खं० जे१॥

त्वमेवं ?। **श्रुणु तावद्यथा अह्रीकोऽसि** = निर्ल्लज्जो भवसी''ति गाथार्थः॥६६७॥

तिबलागमुहुम्मुक्को तिक्खुत्तो वलयामुहे।
तिसत्तक्खुत्तो जालेणं सइ छिण्णोदए दहे॥६६८॥

तिबलाग० सिलोगो। **तिन्नो** वारा **बलाकाया मुखान्मुक्तः**, कथम् ? बलाकया गृहीत्वोर्द्धं क्षिप्तस्तिर्य्यग् निपत्य तन्मुखाद् भ्रष्टः, तृतीयवारायां जले निपतितः। **त्रिःकृत्वा(?त्वः) 'वलयामुहे'**त्ति वेलामुखे कटकानुसारेणाऽहं निर्गतः। **त्रिःसप्तकृत्वा(?त्वः)** एकविंशतिवारा इत्यर्थः **'जालेण'** त्ति जालाद् भ्रष्टः, कथम् ? यदा जालं धीवरः प्रक्षिपति तदा अहमधो गत्वा तिष्ठामि एवमेकविंशतिवारा जालाद्[१] भ्रष्टोऽहमिति। **सकृत्** = एकां वारां **च्छिन्नोदकें ह्रदे** मात्सिकेन तीक्ष्णशलाकायां प्रोतेषु मत्स्येषु अहं स्वयमेव मत्सान्तराले वदनेन लगित्वा स्थितः, स च धीवरः कर्द्दमलिप्तान् तान् सरसि प्रक्षालयितुं गतः, तेषु च प्रक्षाल्यमानेषु अहं जलान्तर्निमग्न इति श्लोकार्थः॥६६८॥

एयारिसं ममं सत्तं सढं घट्टियघट्टणं।
इच्छसि गलेण घेत्तुं अहो ते अहिरीयया॥६६९॥

एयारिसं सिलोगो। **ईदृशं मम सत्त्वं शठं 'घट्टियघट्टणं'**त्ति **घट्टितस्य** = धीवरादिना कृतस्योपायस्य **घट्टनं** = चालनं यत् सत्त्वं तत्तथेति **इच्छसि गलेन ग्रहीतुं** मां **अहो ! ते** = तव **निर्ह्रीकता** = निर्लज्जतेति श्लोकार्थः॥६६९॥

द्रव्यग्रासैषणादृष्टान्तस्य भावग्रासैषणायामुपनयः प्रदर्श्यते– मत्स्यस्थानीयः साधुः, मांसस्थानीयं तु भक्तपानम्, मात्स्यिकस्थानीयो रागादिसमुदायो, यथा न च्छलितो मत्स्य उपायग्रसनेन एवं साधुरपि आत्मानमात्मनैव अनुशास्ति भोजनकाले, कथम् ?–

बायालीसेसणसंकडम्मि गहणम्मि[२] जीव न हु छलिओ।
एण्हिं जह न छलिज्जसि भुंजंतो राग-दोसेहिं॥६७०॥

बायालीस० गाहा। व्याख्या– **द्विचत्वारिंशद्भेदैषणासङ्कटे** (ग्रहणे) हे **जीव** ! यथा **न च्छलितस्तथा** साम्प्रतमपि भुञ्जानो **यथा न छल्यसे** तथा विधेयम्॥६७०॥ तामेव भावग्रासैषणामाह–

घासेसणा उ भावे होइ पसत्था[३] य अप्पसत्था य।
अपसत्था पंचविहा तव्विवरीया पसत्था तु॥६७१॥[४]

घासेसणा उ गाहा। व्याख्या– **ग्रासैषणा तु भावे भवति प्रशस्ता च अप्रशस्ता च**; तत्राप्रशस्ता

(टि०) १. ०लान्नष्टो० जि१ विना॥ **२. हिंडंतो** जे२॥ **३. तहेव** जे४ भां०॥ ४. सर्वमूलादर्शेषु अस्या अनन्तरं अधिका गाथा दृश्यते, किन्तु केनापि टीकाकारेण न विवृता। अवचूरिकारेण संक्षेपेण विवृता। साऽधिका गाथा इयम्– **संजोइयमइबहुयं इंगाल सधूमगं अणट्ठाए। पंचविहा अपसत्था तव्विवरीया पसत्था तु॥** ५. **दुविहा उ होइ बहि** जे१॥ ६. **०जोययतो** जे२ खं। **०जोइंते** जे१॥

पञ्चविधा तद्विपरीता प्रशस्ता त्विति गाथार्थः ॥६७१॥

तत्र अप्रशस्तभावग्रासैषणा– संयोजना, अतिबहुकं, साङ्गारं, सधूमकं अनर्थायेत्येवं पञ्चधा, प्रशस्ता त्वेतद्विपरीतेति। तत्र संयोजनामाह–

दव्वे भावे संजोयणा तु दव्वे दुहा[५] तु बहि अंतो।
भिक्खं चिय हिंडंतो संजोए[६] तंमि बाहिरिया॥६७२॥

दव्वे गाधा। व्याख्या– **द्रव्ये भावे संयोजना तु द्रव्ये** संयोजना **द्विधा तु बहिरन्तश्च, भिक्षामेव हिण्डमानः संयोजयति** आहारमेषा बाह्यसंयोजनेति गाथार्थः॥ ६७२॥ तामेव स्पष्टयन्नाह–

खीर-दहि-सूव-कट्टरलंभे गुड-सप्पि-वडग-वालुंके।
अंतो तु तिहा पाए लंबण वदणे विभासा तु॥६७३॥

खीर० गाधा। व्याख्या– **क्षीर-दधि-सूप-कट्टरलाभे** सति **गुड-सर्प्पि-र्वटक-वालुङ्कादी**नां च लाभे भिक्षामटन्नेव संयोजयत्येषा बाह्यसंयोजना; **अन्तस्त्विय**ं **त्रिविधा**, तद्यथा– **पात्रे, लम्बने वदने** च **'विभाषे'**ति व्याख्या, सा चेयं– यद् यद् रसोपकारिद्रव्यं तत् तत् पात्रे संयोजयति, वालुङ्क-वटक-वृन्ताक-कार-चेल्लादि संयोजयति **लम्बने** = कवले, तथा वदने प्रक्षिप्य लम्बनं ततः शालनकं प्रक्षिपति पश्चादिति वदनसंयोजनेति गाथार्थः ॥६७३॥ द्रव्यसंयोजनया त्वात्मानं[१] राग-द्वेषाभ्यां संयोजयतीत्याह–

संजोयणाए दोसा जो संजोएइ भत्तपाणं तु।
दव्वाइं रसहेउं उवघाओ तस्सिमो होदि॥६७४॥

संजोयणाए गाहा। व्याख्या– **संयोजनायां दोषाः, यः संयोजयति भक्तपानं तु द्रव्यादिरसहेतुं उपघातस्तस्यायं भवतीति** गाथार्थः ॥६७४॥

संजोयणा तु भावे संजोइंतो[२] ताइं दव्वाइं।
संजोययंतो[३] कम्मं कम्मेण भवं ततो दुक्खं॥६७५॥

